# ऋग्वेद-संहिता — मण्डल ७

## Ṛgveda-Saṁhitā—Maṇḍala 7

7.001.01a अग्निं नरो दीधितिभिररण्योर्हस्तच्युती जनयन्त प्रशस्तम् ।

7.001.01c दूरेदृशं गृहपतिमथर्युम् ॥

7.001.01a agniṁ naro dīdhitibhir araṇyor hastacyutī janayanta praśastam |
7.001.01c dūredṛśaṁ gṛhapatim atharyum ||

7.001.02a तमग्निमस्ते वसवो न्यृण्वन्सुप्रतिचक्षमवसे कुतश्चित् ।

7.001.02c दक्षाय्यो यो दम आस नित्यः ॥

7.001.02a tam agnim aste vasavo ny ṛṇvan supraticakṣam avase kutaś cit |
7.001.02c dakṣāyyo yo dama āsa nityaḥ ||

7.001.03a प्रेद्धो अग्ने दीदिहि पुरो नोऽजस्रया सूर्म्या यविष्ठ ।

7.001.03c त्वां शश्वन्त उप यन्ति वाजाः ॥

7.001.03a preddho agne dīdihi puro no 'jasrayā sūrmyā yaviṣṭha |
7.001.03c tvāṁ śaśvanta upa yanti vājāḥ ||

7.001.04a प्र ते अग्नयोऽग्निभ्यो वरं निः सुवीरासः शोशुचन्त द्युमन्तः ।

7.001.04c यत्रा नरः समासते सुजाताः ॥

7.001.04a pra te agnayo 'gnibhyo varaṁ niḥ suvīrāsaḥ śośucanta dyumantaḥ |
7.001.04c yatrā naraḥ samāsate sujātāḥ ||

7.001.05a दा नो अग्ने धिया रयिं सुवीरं स्वपत्यं सहस्य प्रशस्तम् ।

7.001.05c न यं यावा तरति यातुमावान् ॥

7.001.05a dā no agne dhiyā rayiṁ suvīraṁ svapatyaṁ sahasya praśastam |
7.001.05c na yaṁ yāvā tarati yātumāvān ||

7.001.06a उप यमेति युवतिः सुदक्षं दोषा वस्तोर्हविष्मती घृताची ।

7.001.06c उप स्वैनमरमतिर्वसूयुः ॥

7.001.06a upa yam eti yuvatiḥ sudakṣaṁ doṣā vastor haviṣmatī ghṛtācī |
7.001.06c upa svainam aramatir vasūyuḥ ||

7.001.07a विश्वा अग्नेऽप दहारातीर्येभिस्तपोभिरदहो जरूथम् ।

7.001.07c प्र निस्वरं चातयस्वामीवाम् ॥

7.001.07a viśvā agne 'pa dahārātīr yebhis tapobhir adaho jarūtham |
7.001.07c pra nisvaraṁ cātayasvāmīvām ||

7.001.08a आ यस्ते अग्न इधते अनीकं वसिष्ठ शुक्र दीदिवः पावक ।

7.001.08c उतो न एभि स्तवथैरिह स्याः ॥

7.001.08a ā yas te agna idhate anīkaṁ vasiṣṭha śukra dīdivaḥ pāvaka |
7.001.08c uto na ebhi stavathair iha syāḥ ||

7.001.09a वि ये ते अग्ने भेजिरे अनीकं मर्ता नरः पित्र्यासः पुरुत्रा ।

7.001.09c उतो न एभिः सुमना इह स्याः ॥

7.001.09a vi ye te agne bhejire anīkam martā naraḥ pitryāsaḥ purutrā |
7.001.09c uto na ebhiḥ sumanā iha syāḥ ||

7.001.10a इमे नरो वृत्रहत्येषु शूरा विश्वा अदेवीरभि सन्तु मायाः ।

7.001.10c ये मे धियं पनयन्त प्रशस्ताम् ॥

7.001.10a ime naro vṛtrahatyeṣu śūrā viśvā adevīr abhi santu māyāḥ |
7.001.10c ye me dhiyam panayanta praśastām ||

7.001.11a मा शूने अग्ने नि षदाम नृणां माशेषसोऽवीरता परि त्वा ।

7.001.11c प्रजावतीषु दुर्यासु दुर्य ॥

7.001.11a mā śūne agne ni ṣadāma nṛṇām māśeṣaso 'vīratā pari tvā |
7.001.11c prajāvatīṣu duryāsu durya ||

7.001.12a यमश्वी नित्यमुपयाति यज्ञं प्रजावन्तं स्वपत्यं क्षयं नः ।

7.001.12c स्वजन्मना शेषसा वावृधानम् ॥

7.001.12a yam aśvī nityam upayāti yajñam prajāvantaṁ svapatyaṁ kṣayaṁ naḥ |
7.001.12c svajanmanā śeṣasā vāvṛdhānam ||

7.001.13a पाहि नो अग्ने रक्षसो अजुष्टात्पाहि धूर्तेरररुषो अघायोः ।

7.001.13c त्वा युजा पृतनायूँरभि ष्याम् ॥

7.001.13a pāhi no agne rakṣaso ajuṣṭāt pāhi dhūrter araruṣo aghāyoḥ |
7.001.13c tvā yujā pṛtanāyūm̐r abhi ṣyām ||

7.001.14a सेदग्निरग्नीँरत्यस्त्वन्यान्यत्र वाजी तनयो वीळुपाणिः ।

7.001.14c सहस्रपाथा अक्षरा समेति ॥

7.001.14a sed agnir agnīm̐r aty astv anyān yatra vājī tanayo vīḷupāṇiḥ |
7.001.14c sahasrapāthā akṣarā sameti ||

7.001.15a सेदग्निर्यो वनुष्यतो निपाति समेद्धारमंहस उरुष्यात् ।

7.001.15c सुजातासः परि चरन्ति वीराः ॥

7.001.15a sed agnir yo vanuṣyato nipāti sameddhāram aṁhasa uruṣyāt |
7.001.15c sujātāsaḥ pari caranti vīrāḥ ||

7.001.16a अयं सो अग्निराहुतः पुरुत्रा यमीशानः समिदिन्धे हविष्मान् ।

7.001.16c परि यमेत्यध्वरेषु होता ॥

7.001.16a ayaṁ so agnir āhutaḥ purutrā yam īśānaḥ sam id indhe haviṣmān |
7.001.16c pari yam ety adhvareṣu hotā ||

7.001.17a त्वे अग्न आहवनानि भूरीशानास आ जुहुयाम नित्या ।

7.001.17c उभा कृण्वन्तो वहतू मियेधे ॥

7.001.17a tve agna āhavanāni bhūrīśānāsa ā juhuyāma nityā |
7.001.17c ubhā kṛṇvanto vahatū miyedhe ||

7.001.18a इमो अग्ने वीततमानि हव्याजस्रो वक्षि देवतातिमच्छ ।

7.001.18c प्रति न ईं सुरभीणि व्यन्तु ॥

7.001.18a imo agne vītatamāni havyājasro vakṣi devatātim accha |
7.001.18c prati na īṁ surabhīṇi vyantu ||

7.001.19a मा नो अग्नेऽवीरते परा दा दुर्वाससेऽमतये मा नो अस्यै ।

7.001.19c मा नः क्षुधे मा रक्षस ऋतावो मा नो दमे मा वन आ जुहूर्थाः ॥

7.001.19a mā no agne 'vīrate parā dā durvāsase 'mataye mā no asyai |

7.001.19c mā naḥ kṣudhe mā rakṣasa ṛtāvo mā no dame mā vana ā juhūrthāḥ ||

7.001.20a नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।

7.001.20c रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥

7.001.20a nū me brahmāṇy agna uc chaśādhi tvaṁ deva maghavadbhyaḥ suṣūdaḥ |

7.001.20c rātau syāmobhayāsa ā te yūyam pāta svastibhiḥ sadā naḥ ||

7.001.21a त्वमग्ने सुहवो रण्वसंदृक्सुदीती सूनो सहसो दिदीहि ।

7.001.21c मा त्वे सचा तनये नित्य आ धङ्मा वीरो अस्मन्नर्यो वि दासीत् ॥

7.001.21a tvam agne suhavo raṇvasandṛk sudītī sūno sahaso didīhi |

7.001.21c mā tve sacā tanaye nitya ā dhaṅ mā vīro asman naryo vi dāsīt ||

7.001.22a मा नो अग्ने दुर्भृतये सचैषु देवेद्धेष्वग्निषु प्र वोचः ।

7.001.22c मा ते अस्मान्दुर्मतयो भृमाच्चिद्देवस्य सूनो सहसो नशन्त ॥

7.001.22a mā no agne durbhṛtaye sacaiṣu deveddheṣv agniṣu pra vocaḥ |

7.001.22c mā te asmān durmatayo bhṛmāc cid devasya sūno sahaso naśanta ||

7.001.23a स मर्तो अग्ने स्वनीक रेवानमर्त्ये य आजुहोति हव्यम् ।

7.001.23c स देवता वसुवनिं दधाति यं सूरिरर्थी पृच्छमान एति ॥

7.001.23a sa marto agne svanīka revān amartye ya ājuhoti havyam |

7.001.23c sa devatā vasuvaniṁ dadhāti yaṁ sūrir arthī pṛcchamāna eti ||

7.001.24a महो नो अग्ने सुवितस्य विद्वान्रयिं सूरिभ्य आ वहा बृहन्तम् ।

7.001.24c येन वयं सहसावन्मदेमाविक्षितास आयुषा सुवीराः ॥

7.001.24a maho no agne suvitasya vidvān rayiṁ sūribhya ā vahā bṛhantam |

7.001.24c yena vayaṁ sahasāvan mademāvikṣitāsa āyuṣā suvīrāḥ ||

7.001.25a नू मे ब्रह्माण्यग्न उच्छशाधि त्वं देव मघवद्भ्यः सुषूदः ।

7.001.25c रातौ स्यामोभयास आ ते यूयं पात स्वस्तिभिः सदा नः ॥

7.001.25a nū me brahmāṇy agna uc chaśādhi tvaṁ deva maghavadbhyaḥ suṣūdaḥ |

7.001.25c rātau syāmobhayāsa ā te yūyam pāta svastibhiḥ sadā naḥ ||

7.002.01a जुषस्व नः समिधमग्ने अद्य शोचा बृहद्यजतं धूममृण्वन् ।

7.002.01c उप स्पृश दिव्यं सानु स्तूपैः सं रश्मिभिस्ततनः सूर्यस्य ॥

7.002.01a juṣasva naḥ samidham agne adya śocā bṛhad yajataṁ dhūmam ṛṇvan |
7.002.01c upa spṛśa divyaṁ sānu stūpaiḥ saṁ raśmibhis tatanaḥ sūryasya ||

7.002.02a नराशंसस्य महिमानमेषामुप स्तोषाम यजतस्य यज्ञैः ।

7.002.02c ये सुक्रतवः शुचयो धियंधाः स्वदन्ति देवा उभयानि हव्या ॥

7.002.02a narāśaṁsasya mahimānam eṣām upa stoṣāma yajatasya yajñaiḥ |
7.002.02c ye sukratavaḥ śucayo dhiyandhāḥ svadanti devā ubhayāni havyā ||

7.002.03a ईळेन्यं वो असुरं सुदक्षमन्तर्दूतं रोदसी सत्यवाचम् ।

7.002.03c मनुष्वदग्निं मनुना समिद्धं समध्वराय सदमिन्महेम ॥

7.002.03a īḻenyaṁ vo asuraṁ sudakṣam antar dūtaṁ rodasī satyavācam |
7.002.03c manuṣvad agnim manunā samiddhaṁ sam adhvarāya sadam in mahema ||

7.002.04a सपर्यवो भरमाणा अभिज्ञु प्र वृञ्जते नमसा बर्हिरग्नौ ।

7.002.04c आजुह्वाना घृतपृष्ठं पृषद्वदध्वर्यवो हविषा मर्जयध्वम् ॥

7.002.04a saparyavo bharamāṇā abhijñu pra vṛñjate namasā barhir agnau |
7.002.04c ājuhvānā ghṛtapṛṣṭham pṛṣadvad adhvaryavo haviṣā marjayadhvam ||

7.002.05a स्वाध्यो३ वि दुरो देवयन्तोऽशिश्रयू रथयुर्देवताता ।

7.002.05c पूर्वी शिशुं न मातरा रिहाणे समग्रुवो न समनेष्वञ्जन् ॥

7.002.05a svādhyo3 vi duro devayanto 'śiśrayū rathayur devatātā |
7.002.05c pūrvī śiśuṁ na mātarā rihāṇe sam agruvo na samaneṣv añjan ||

7.002.06a उत योषणे दिव्ये मही न उषासानक्ता सुदुघेव धेनुः ।

7.002.06c बर्हिषदा पुरुहूते मघोनी आ यज्ञिये सुविताय श्रयेताम् ॥

7.002.06a uta yoṣaṇe divye mahī na uṣāsānaktā sudugheva dhenuḥ |
7.002.06c barhiṣadā puruhūte maghonī ā yajñiye suvitāya śrayetām ||

7.002.07a विप्रा यज्ञेषु मानुषेषु कारू मन्ये वां जातवेदसा यजध्यै ।

7.002.07c ऊर्ध्वं नो अध्वरं कृतं हवेषु ता देवेषु वनथो वार्याणि ॥

7.002.07a viprā yajñeṣu mānuṣeṣu kārū manye vāṁ jātavedasā yajadhyai |
7.002.07c ūrdhvaṁ no adhvaraṁ kṛtaṁ haveṣu tā deveṣu vanatho vāryāṇi ||

7.002.08a आ भारती भारतीभिः सजोषा इळा देवैर्मनुष्येभिरग्निः ।

7.002.08c सरस्वती सारस्वतेभिरर्वाक्तिस्रो देवीर्बर्हिरेदं सदन्तु ॥

7.002.08a ā bhāratī bhāratībhiḥ sajoṣā iḻā devair manuṣyebhir agniḥ |
7.002.08c sarasvatī sārasvatebhir arvāk tisro devīr barhir edaṁ sadantu ||

7.002.09a तन्नस्तुरीपमध पोषयित्नु देव त्वष्टर्वि रराणः स्यस्व ।

7.002.09c यतो वीरः कर्मण्यः सुदक्षो युक्तग्रावा जायते देवकामः ॥

7.002.09a tan nas turīpam adha poṣayitnu deva tvaṣṭar vi rarāṇaḥ syasva |
7.002.09c yato vīraḥ karmaṇyaḥ sudakṣo yuktagrāvā jāyate devakāmaḥ ||

7.002.10a वनस्पतेऽव सृजोप देवानग्निर्हविः शमिता सूदयाति ।

7.002.10c सेदु होता सत्यतरो यजाति यथा देवानां जनिमानि वेद ॥

7.002.10a vanaspate 'va sṛjopa devān agnir haviḥ śamitā sūdayāti |
7.002.10c sed u hotā satyataro yajāti yathā devānāṁ janimāni veda ||

7.002.11a आ याह्यग्ने समिधानो अर्वाङिन्द्रेण देवैः सरथं तुरेभिः ।

7.002.11c बर्हिर्न आस्तामदितिः सुपुत्रा स्वाहा देवा अमृता मादयन्ताम् ॥

7.002.11a ā yāhy agne samidhāno arvāṅ indreṇa devaiḥ sarathaṁ turebhiḥ |
7.002.11c barhir na āstām aditiḥ suputrā svāhā devā amṛtā mādayantām ||

7.003.01a अग्निं वो देवमग्निभिः सजोषा यजिष्ठं दूतमध्वरे कृणुध्वम् ।

7.003.01c यो मर्त्येषु निध्रुविर्ऋतावा तपुर्मूर्धा घृतान्नः पावकः ॥

7.003.01a agniṁ vo devam agnibhiḥ sajoṣā yajiṣṭhaṁ dūtam adhvare kṛṇudhvam |
7.003.01c yo martyeṣu nidhruvir ṛtāvā tapurmūrdhā ghṛtānnaḥ pāvakaḥ ||

7.003.02a प्रोथदश्वो न यवसेऽविष्यन्यदा महः संवरणाद्व्यस्थात् ।

7.003.02c आदस्य वातो अनु वाति शोचिरध स्म ते व्रजनं कृष्णमस्ति ॥

7.003.02a prothad aśvo na yavase 'viṣyan yadā mahaḥ saṁvaraṇād vy asthāt |
7.003.02c ād asya vāto anu vāti śocir adha sma te vrajanaṁ kṛṣṇam asti ||

7.003.03a उद्यस्य ते नवजातस्य वृष्णोऽग्ने चरन्त्यजरा इधानाः ।

7.003.03c अच्छा द्यामरुषो धूम एति सं दूतो अग्न ईयसे हि देवान् ॥

7.003.03a ud yasya te navajātasya vṛṣṇo 'gne caranty ajarā idhānāḥ |
7.003.03c acchā dyām aruṣo dhūma eti saṁ dūto agna īyase hi devān ||

7.003.04a वि यस्य ते पृथिव्यां पाजो अश्रेत्तृषु यदन्ना समवृक्त जम्भैः ।

7.003.04c सेनेव सृष्टा प्रसितिष्ट एति यवं न दस्म जुह्वा विवेक्षि ॥

7.003.04a vi yasya te pṛthivyām pājo aśret tṛṣu yad annā samavṛkta jambhaiḥ |
7.003.04c seneva sṛṣṭā prasitiṣ ṭa eti yavaṁ na dasma juhvā vivekṣi ||

7.003.05a तमिद्दोषा तमुषसि यविष्ठमग्निमत्यं न मर्जयन्त नरः ।

7.003.05c निशिशाना अतिथिमस्य योनौ दीदाय शोचिराहुतस्य वृष्णः ॥

7.003.05a tam id doṣā tam uṣasi yaviṣṭham agnim atyaṁ na marjayanta naraḥ |
7.003.05c niśiśānā atithim asya yonau dīdāya śocir āhutasya vṛṣṇaḥ ||

7.003.06a सुसंदृक्ते स्वनीक प्रतीकं वि यद्रुक्मो न रोचस उपाके ।

7.003.06c दिवो न ते तन्यतुरेति शुष्मश्चित्रो न सूरः प्रति चक्षि भानुम् ॥

7.003.06a susandṛk te svanīka pratīkaṁ vi yad rukmo na rocasa upāke |
7.003.06c divo na te tanyatur eti śuṣmaś citro na sūraḥ prati cakṣi bhānum ||

7.003.07a यथा वः स्वाहाग्नये दाशेम परीळाभिर्घृतवद्भिश्च हव्यैः ।

7.003.07c तेभिर्नो अग्ने अमितैर्महोभिः शतं पूर्भिरायसीभिर्नि पाहि ॥

7.003.07a yathā vaḥ svāhāgnaye dāśema parīḷābhir ghṛtavadbhiś ca havyaiḥ |
7.003.07c tebhir no agne amitair mahobhiḥ śatam pūrbhir āyasībhir ni pāhi ||

7.003.08a या वा ते सन्ति दाशुषे अधृष्टा गिरो वा याभिर्नृवतीरुरुष्याः ।

7.003.08c ताभिर्नः सूनो सहसो नि पाहि स्मत्सूरीञ्जरितॄञ्जातवेदः ॥

7.003.08a yā vā te santi dāśuṣe adhṛṣṭā giro vā yābhir nṛvatīr uruṣyāḥ |

7.003.08c tābhir naḥ sūno sahaso ni pāhi smat sūrīñ jaritṝñ jātavedaḥ ||

7.003.09a निर्यत्पूतेव स्वधितिः शुचिर्गात्स्वया कृपा तन्वा३ रोचमानः ।

7.003.09c आ यो मात्रोरुशेन्यो जनिष्ट देवयज्याय सुक्रतुः पावकः ॥

7.003.09a nir yat pūteva svadhitiḥ śucir gāt svayā kṛpā tanvā3 rocamānaḥ |
7.003.09c ā yo mātror uśenyo janiṣṭa devayajyāya sukratuḥ pāvakaḥ ||

7.003.10a एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।

7.003.10c विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.003.10a etā no agne saubhagā didīhy api kratuṁ sucetasaṁ vatema |
7.003.10c viśvā stotṛbhyo gṛṇate ca santu yūyam pāta svastibhiḥ sadā naḥ ||

7.004.01a प्र वः शुक्राय भानवे भरध्वं हव्यं मतिं चाग्नये सुपूतम् ।

7.004.01c यो दैव्यानि मानुषा जनूंष्यन्तर्विश्वानि विद्मना जिगाति ॥

7.004.01a pra vaḥ śukrāya bhānave bharadhvaṁ havyam matiṁ cāgnaye supūtam |
7.004.01c yo daivyāni mānuṣā janūṁṣy antar viśvāni vidmanā jigāti ||

7.004.02a स गृत्सो अग्निस्तरुणश्चिदस्तु यतो यविष्ठो अजनिष्ट मातुः ।

7.004.02c सं यो वना युवते शुचिदन्भूरि चिदन्ना समिदत्ति सद्यः ॥

7.004.02a sa gṛtso agnis taruṇaś cid astu yato yaviṣṭho ajaniṣṭa mātuḥ |
7.004.02c saṁ yo vanā yuvate śucidan bhūri cid annā sam id atti sadyaḥ ||

7.004.03a अस्य देवस्य संसद्यनीके यं मर्तासः श्येतं जगृभ्रे ।

7.004.03c नि यो गृभं पौरुषेयीमुवोच दुरोकमग्निरायवे शुशोच ॥

7.004.03a asya devasya saṁsady anīke yam martāsaḥ śyetaṁ jagṛbhre |
7.004.03c ni yo gṛbham pauruṣeyīm uvoca durokam agnir āyave śuśoca ||

7.004.04a अयं कविरकविषु प्रचेता मर्तेष्वग्निरमृतो नि धायि ।

7.004.04c स मा नो अत्र जुहुरः सहस्वः सदा त्वे सुमनसः स्याम ॥

7.004.04a ayaṁ kavir akaviṣu pracetā marteṣv agnir amṛto ni dhāyi |
7.004.04c sa mā no atra juhuraḥ sahasvaḥ sadā tve sumanasaḥ syāma ||

7.004.05a आ यो योनिं देवकृतं ससाद क्रत्वा ह्यग्निरमृताँ अतारीत् ।

7.004.05c तमोषधीश्च वनिनश्च गर्भं भूमिश्च विश्वधायसं बिभर्ति ॥

7.004.05a ā yo yonim devakṛtaṁ sasāda kratvā hy a1gnir amṛtām̐ atārīt |
7.004.05c tam oṣadhīś ca vaninaś ca garbham bhūmiś ca viśvadhāyasam bibharti ||

7.004.06a ईशे ह्यग्निरमृतस्य भूरेरीशे रायः सुवीर्यस्य दातोः ।

7.004.06c मा त्वा वयं सहसावन्नवीरा माप्सवः परि षदाम मादुवः ॥

7.004.06a īśe hy a1gnir amṛtasya bhūrer īśe rāyaḥ suvīryasya dātoḥ |
7.004.06c mā tvā vayaṁ sahasāvann avīrā māpsavaḥ pari ṣadāma māduvaḥ ||

7.004.07a परिषद्यं ह्यरणस्य रेक्णो नित्यस्य रायः पतयः स्याम ।

7.004.07c न शेषो अग्ने अन्यजातमस्त्यचेतानस्य मा पथो वि दुक्षः ॥

7.004.07a pariṣadyaṁ hy araṇasya rekṇo nityasya rāyaḥ patayaḥ syāma |
7.004.07c na śeṣo agne anyajātam asty acetānasya mā patho vi dukṣaḥ ||

7.004.08a नहि ग्रभायारणः सुशेवोऽन्योदर्यो मनसा मन्तवा उ ।

7.004.08c अधा चिदोकः पुनरित्स एत्या नो वाज्यभीषाळेतु नव्यः ॥

7.004.08a nahi grabhāyāraṇaḥ suśevo 'nyodaryo manasā mantavā u |
7.004.08c adhā cid okaḥ punar it sa ety ā no vājy abhīṣāḷ etu navyaḥ ||

7.004.09a त्वमग्ने वनुष्यतो नि पाहि त्वमु नः सहसावन्नवद्यात् ।

7.004.09c सं त्वा ध्वस्मन्वदभ्येतु पाथः सं रयि स्पृहयाय्यः सहस्री ॥

7.004.09a tvam agne vanuṣyato ni pāhi tvam u naḥ sahasāvann avadyāt |
7.004.09c saṁ tvā dhvasmanvad abhy etu pāthaḥ saṁ rayi spṛhayāyyaḥ sahasrī ||

7.004.10a एता नो अग्ने सौभगा दिदीह्यपि क्रतुं सुचेतसं वतेम ।

7.004.10c विश्वा स्तोतृभ्यो गृणते च सन्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.004.10a etā no agne saubhagā didīhy api kratuṁ sucetasaṁ vatema |
7.004.10c viśvā stotṛbhyo gṛṇate ca santu yūyam pāta svastibhiḥ sadā naḥ ||

7.005.01a प्राग्नये तवसे भरध्वं गिरं दिवो अरतये पृथिव्याः ।

7.005.01c यो विश्वेषाममृतानामुपस्थे वैश्वानरो वावृधे जागृवद्भिः ॥

7.005.01a prāgnaye tavase bharadhvaṁ giraṁ divo arataye pṛthivyāḥ |
7.005.01c yo viśveṣām amṛtānām upasthe vaiśvānaro vāvṛdhe jāgṛvadbhiḥ ||

7.005.02a पृष्टो दिवि धाय्यग्निः पृथिव्यां नेता सिन्धूनां वृषभ स्तियानाम् ।

7.005.02c स मानुषीरभि विशो वि भाति वैश्वानरो वावृधानो वरेण ॥

7.005.02a pṛṣṭo divi dhāyy agniḥ pṛthivyāṁ netā sindhūnāṁ vṛṣabha stiyānām |
7.005.02c sa mānuṣīr abhi viśo vi bhāti vaiśvānaro vāvṛdhāno vareṇa ||

7.005.03a त्वद्भिया विश आयन्नसिक्नीरसमना जहतीर्भोजनानि ।

7.005.03c वैश्वानर पूरवे शोशुचानः पुरो यदग्ने दरयन्नदीदेः ॥

7.005.03a tvad bhiyā viśa āyann asiknīr asamanā jahatīr bhojanāni |
7.005.03c vaiśvānara pūrave śośucānaḥ puro yad agne darayann adīdeḥ ||

7.005.04a तव त्रिधातु पृथिवी उत द्यौर्वैश्वानर व्रतमग्ने सचन्त ।

7.005.04c त्वं भासा रोदसी आ ततन्थाजस्रेण शोचिषा शोशुचानः ॥

7.005.04a tava tridhātu pṛthivī uta dyaur vaiśvānara vratam agne sacanta |
7.005.04c tvam bhāsā rodasī ā tatanthājasreṇa śociṣā śośucānaḥ ||

7.005.05a त्वामग्ने हरितो वावशाना गिरः सचन्ते धुनयो घृताचीः ।

7.005.05c पतिं कृष्टीनां रथ्यं रयीणां वैश्वानरमुषसां केतुमह्नाम् ॥

7.005.05a tvām agne harito vāvaśānā giraḥ sacante dhunayo ghṛtācīḥ |
7.005.05c patiṁ kṛṣṭīnāṁ rathyaṁ rayīṇāṁ vaiśvānaram uṣasāṁ ketum ahnām ||

7.005.06a त्वे असुर्यं१ वसवो न्यृण्वन्क्रतुं हि ते मित्रमहो जुषन्त ।

7.005.06c त्वं दस्यूँरोकसो अग्न आज उरु ज्योतिर्जनयन्नार्याय ॥

7.005.06a tve asuryaṁ1 vasavo ny ṛṇvan kratuṁ hi te mitramaho juṣanta |
7.005.06c tvaṁ dasyūm̐r okaso agna āja uru jyotir janayann āryāya ||

7.005.07a स जायमानः परमे व्योमन्वायुर्न पाथः परि पासि सद्यः ।

7.005.07c त्वं भुवना जनयन्नभि क्रन्नपत्याय जातवेदो दशस्यन् ॥

7.005.07a sa jāyamānaḥ parame vyoman vāyur na pāthaḥ pari pāsi sadyaḥ |

7.005.07c tvam bhuvanā janayann abhi krann apatyāya jātavedo daśasyan ||

7.005.08a तामग्ने अस्मे इषमेरयस्व वैश्वानर द्युमतीं जातवेदः ।

7.005.08c यया राधः पिन्वसि विश्ववार पृथु श्रवो दाशुषे मर्त्याय ॥

7.005.08a tām agne asme iṣam erayasva vaiśvānara dyumatīṁ jātavedaḥ |
7.005.08c yayā rādhaḥ pinvasi viśvavāra pṛthu śravo dāśuṣe martyāya ||

7.005.09a तं नो अग्ने मघवद्भ्यः पुरुक्षुं रयिं नि वाजं श्रुत्यं युवस्व ।

7.005.09c वैश्वानर महि नः शर्म यच्छ रुद्रेभिरग्ने वसुभिः सजोषाः ॥

7.005.09a taṁ no agne maghavadbhyaḥ purukṣuṁ rayiṁ ni vājaṁ śrutyaṁ yuvasva |
7.005.09c vaiśvānara mahi naḥ śarma yaccha rudrebhir agne vasubhiḥ sajoṣāḥ ||

7.006.01a प्र सम्राजो असुरस्य प्रशस्तिं पुंसः कृष्टीनामनुमाद्यस्य ।

7.006.01c इन्द्रस्येव प्र तवसस्कृतानि वन्दे दारुं वन्दमानो विवक्मि ॥

7.006.01a pra samrājo asurasya praśastim puṁsaḥ kṛṣṭīnām anumādyasya |
7.006.01c indrasyeva pra tavasas kṛtāni vande dāruṁ vandamāno vivakmi ||

7.006.02a कविं केतुं धासिं भानुमद्रेर्हिन्वन्ति शं राज्यं रोदस्योः ।

7.006.02c पुरंदरस्य गीर्भिरा विवासेऽग्नेर्व्रतानि पूर्व्या महानि ॥

7.006.02a kaviṁ ketuṁ dhāsim bhānum adrer hinvanti śaṁ rājyaṁ rodasyoḥ |
7.006.02c purandarasya gīrbhir ā vivāse 'gner vratāni pūrvyā mahāni ||

7.006.03a न्यक्रतून्ग्रथिनो मृध्रवाचः पणीँरश्रद्धाँ अवृधाँ अयज्ञान् ।

7.006.03c प्रप्र तान्दस्यूँरग्निर्विवाय पूर्वश्चकारापराँ अयज्यून् ॥

7.006.03a ny akratūn grathino mṛdhravācaḥ paṇīm̐r aśraddhām̐ avṛdhām̐ ayajñān |
7.006.03c pra-pra tān dasyūm̐r agnir vivāya pūrvaś cakārāparām̐ ayajyūn ||

7.006.04a यो अपाचीने तमसि मदन्तीः प्राचीश्चकार नृतमः शचीभिः ।

7.006.04c तमीशानं वस्वो अग्निं गृणीषेऽनानतं दमयन्तं पृतन्यून् ॥

7.006.04a yo apācīne tamasi madantīḥ prācīś cakāra nṛtamaḥ śacībhiḥ |
7.006.04c tam īśānaṁ vasvo agniṁ gṛṇīṣe 'nānataṁ damayantam pṛtanyūn ||

7.006.05a यो देह्यो३ अनमयद्वधस्नैर्यो अर्यपत्नीरुषसश्चकार ।

7.006.05c स निरुध्या नहुषो यह्वो अग्निर्विशश्चक्रे बलिहृतः सहोभिः ॥

7.006.05a yo dehyo3 anamayad vadhasnair yo aryapatnīr uṣasaś cakāra |
7.006.05c sa nirudhyā nahuṣo yahvo agnir viśaś cakre balihṛtaḥ sahobhiḥ ||

7.006.06a यस्य शर्मन्नुप विश्वे जनास एवैस्तस्थुः सुमतिं भिक्षमाणाः ।

7.006.06c वैश्वानरो वरमा रोदस्योराग्निः ससाद पित्रोरुपस्थम् ॥

7.006.06a yasya śarmann upa viśve janāsa evais tasthuḥ sumatim bhikṣamāṇāḥ |
7.006.06c vaiśvānaro varam ā rodasyor āgniḥ sasāda pitror upastham ||

7.006.07a आ देवो ददे बुध्न्या३ वसूनि वैश्वानर उदिता सूर्यस्य ।

7.006.07c आ समुद्रादवरादा परस्मादाग्निर्ददे दिव आ पृथिव्याः ॥

7.006.07a ā devo dade budhnyā3 vasūni vaiśvānara uditā sūryasya |
7.006.07c ā samudrād avarād ā parasmād āgnir dade diva ā pṛthivyāḥ ||

7.007.01a प्र वो देवं चित्सहसानमग्निमश्वं न वाजिनं हिषे नमोभिः ।

7.007.01c भवा नो दूतो अध्वरस्य विद्वान्त्मना देवेषु विविदे मितद्रुः ॥

7.007.01a pra vo devaṁ cit sahasānam agnim aśvaṁ na vājinaṁ hiṣe namobhiḥ |
7.007.01c bhavā no dūto adhvarasya vidvān tmanā deveṣu vivide mitadruḥ ||

7.007.02a आ याह्यग्ने पथ्या३ अनु स्वा मन्द्रो देवानां सख्यं जुषाणः ।

7.007.02c आ सानु शुष्मैर्नदयन्पृथिव्या जम्भेभिर्विश्वमुशधग्वनानि ॥

7.007.02a ā yāhy agne pathyā3 anu svā mandro devānāṁ sakhyaṁ juṣāṇaḥ |
7.007.02c ā sānu śuṣmair nadayan pṛthivyā jambhebhir viśvam uśadhag vanāni ||

7.007.03a प्राचीनो यज्ञः सुधितं हि बर्हिः प्रीणीते अग्निरीळितो न होता ।

7.007.03c आ मातरा विश्ववारे हुवानो यतो यविष्ठ जज्ञिषे सुशेवः ॥

7.007.03a prācīno yajñaḥ sudhitaṁ hi barhiḥ prīṇīte agnir īḷito na hotā |
7.007.03c ā mātarā viśvavāre huvāno yato yaviṣṭha jajñiṣe suśevaḥ ||

7.007.04a सद्यो अध्वरे रथिरं जनन्त मानुषासो विचेतसो य एषाम् ।

7.007.04c विशामधायि विश्पतिर्दुरोणे३ऽग्निर्मन्द्रो मधुवचा ऋतावा ॥

7.007.04a sadyo adhvare rathiraṁ jananta mānuṣāso vicetaso ya eṣām |
7.007.04c viśām adhāyi viśpatir duroṇe3 'gnir mandro madhuvacā ṛtāvā ||

7.007.05a असादि वृतो वह्निराजगन्वानग्निर्ब्रह्मा नृषदने विधर्ता ।

7.007.05c द्यौश्च यं पृथिवी वावृधाते आ यं होता यजति विश्ववारम् ॥

7.007.05a asādi vṛto vahnir ājaganvān agnir brahmā nṛṣadane vidhartā |
7.007.05c dyauś ca yam pṛthivī vāvṛdhāte ā yaṁ hotā yajati viśvavāram ||

7.007.06a एते द्युम्नेभिर्विश्वमातिरन्त मन्त्रं ये वारं नर्या अतक्षन् ।

7.007.06c प्र ये विशस्तिरन्त श्रोषमाणा आ ये मे अस्य दीधयन्नृतस्य ॥

7.007.06a ete dyumnebhir viśvam ātiranta mantraṁ ye vāraṁ naryā atakṣan |
7.007.06c pra ye viśas tiranta śroṣamāṇā ā ye me asya dīdhayann ṛtasya ||

7.007.07a नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।

7.007.07c इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥

7.007.07a nū tvām agna īmahe vasiṣṭhā īśānaṁ sūno sahaso vasūnām |
7.007.07c iṣaṁ stotṛbhyo maghavadbhya ānaḍ yūyam pāta svastibhiḥ sadā naḥ ||

7.008.01a इन्धे राजा समर्यो नमोभिर्यस्य प्रतीकमाहुतं घृतेन ।

7.008.01c नरो हव्येभिरीळते सबाध आग्निरग्र उषसामशोचि ॥

7.008.01a indhe rājā sam aryo namobhir yasya pratīkam āhutaṁ ghṛtena |
7.008.01c naro havyebhir īḻate sabādha āgnir agra uṣasām aśoci ||

7.008.02a अयमु ष्य सुमहाँ अवेदि होता मन्द्रो मनुषो यह्वो अग्निः ।

7.008.02c वि भा अकः ससृजानः पृथिव्यां कृष्णपविरोषधीभिर्ववक्षे ॥

7.008.02a ayam u ṣya sumahām̐ avedi hotā mandro manuṣo yahvo agniḥ |
7.008.02c vi bhā akaḥ sasṛjānaḥ pṛthivyāṁ kṛṣṇapavir oṣadhībhir vavakṣe ||

7.008.03a कया नो अग्ने वि वसः सुवृक्तिं कामु स्वधामृणवः शस्यमानः ।

7.008.03c कदा भवेम पतयः सुदत्र रायो वन्तारो दुष्टरस्य साधोः ॥

7.008.03a kayā no agne vi vasaḥ suvṛktiṁ kām u svadhām ṛṇavaḥ śasyamānaḥ |
7.008.03c kadā bhavema patayaḥ sudatra rāyo vantāro duṣṭarasya sādhoḥ ||

7.008.04a प्रप्रायमग्निर्भरतस्य शृण्वे वि यत्सूर्यो न रोचते बृहद्भाः ।

7.008.04c अभि यः पूरुं पृतनासु तस्थौ द्युतानो दैव्यो अतिथिः शुशोच ॥

7.008.04a pra-prāyam agnir bharatasya śṛṇve vi yat sūryo na rocate bṛhad bhāḥ |
7.008.04c abhi yaḥ pūrum pṛtanāsu tasthau dyutāno daivyo atithiḥ śuśoca ||

7.008.05a असन्नित्त्वे आहवनानि भूरि भुवो विश्वेभिः सुमना अनीकैः ।

7.008.05c स्तुतश्चिदग्ने शृण्विषे गृणानः स्वयं वर्धस्व तन्वं सुजात ॥

7.008.05a asann it tve āhavanāni bhūri bhuvo viśvebhiḥ sumanā anīkaiḥ |
7.008.05c stutaś cid agne śṛṇviṣe gṛṇānaḥ svayaṁ vardhasva tanvaṁ sujāta ||

7.008.06a इदं वचः शतसाः संसहस्रमुदग्नये जनिषीष्ट द्विबर्हाः ।

7.008.06c शं यत्स्तोतृभ्य आपये भवाति द्युमदमीवचातनं रक्षोहा ॥

7.008.06a idaṁ vacaḥ śatasāḥ saṁsahasram ud agnaye janiṣīṣṭa dvibarhāḥ |
7.008.06c śaṁ yat stotṛbhya āpaye bhavāti dyumad amīvacātanaṁ rakṣohā ||

7.008.07a नू त्वामग्न ईमहे वसिष्ठा ईशानं सूनो सहसो वसूनाम् ।

7.008.07c इषं स्तोतृभ्यो मघवद्भ्य आनड्यूयं पात स्वस्तिभिः सदा नः ॥

7.008.07a nū tvām agna īmahe vasiṣṭhā īśānaṁ sūno sahaso vasūnām |
7.008.07c iṣaṁ stotṛbhyo maghavadbhya ānaḍ yūyam pāta svastibhiḥ sadā naḥ ||

7.009.01a अबोधि जार उषसामुपस्थाद्धोता मन्द्रः कवितमः पावकः ।

7.009.01c दधाति केतुमुभयस्य जन्तोर्हव्या देवेषु द्रविणं सुकृत्सु ॥

7.009.01a abodhi jāra uṣasām upasthād dhotā mandraḥ kavitamaḥ pāvakaḥ |
7.009.01c dadhāti ketum ubhayasya jantor havyā deveṣu draviṇaṁ sukṛtsu ||

7.009.02a स सुक्रतुर्यो वि दुरः पणीनां पुनानो अर्कं पुरुभोजसं नः ।

7.009.02c होता मन्द्रो विशां दमूनास्तिरस्तमो ददृशे राम्याणाम् ॥

7.009.02a sa sukratur yo vi duraḥ paṇīnām punāno arkam purubhojasaṁ naḥ |
7.009.02c hotā mandro viśāṁ damūnās tiras tamo dadṛśe rāmyāṇām ||

7.009.03a अमूरः कविरदितिर्विवस्वान्सुसंसन्मित्रो अतिथिः शिवो नः ।

7.009.03c चित्रभानुरुषसां भात्यग्रेऽपां गर्भः प्रस्व१ आ विवेश ॥

7.009.03a amūraḥ kavir aditir vivasvān susaṁsan mitro atithiḥ śivo naḥ |
7.009.03c citrabhānur uṣasām bhāty agre 'pāṁ garbhaḥ prasva1 ā viveśa ||

7.009.04a ईळेन्यो वो मनुषो युगेषु समनगा अशुचज्जातवेदाः ।

7.009.04c सुसंदृशा भानुना यो विभाति प्रति गावः समिधानं बुधन्त ॥

7.009.04a īlenyo vo manuṣo yugeṣu samanagā aśucaj jātavedāḥ |
7.009.04c susandṛśā bhānunā yo vibhāti prati gāvaḥ samidhānam budhanta ||

7.009.05a अग्ने याहि दूत्यं१ मा रिषण्यो देवाँ अच्छा ब्रह्मकृता गणेन ।

7.009.05c सरस्वतीं मरुतो अश्विनापो यक्षि देवान्रत्नधेयाय विश्वान् ॥

7.009.05a agne yāhi dūtya1m mā riṣaṇyo devām̐ acchā brahmakṛtā gaṇena |
7.009.05c sarasvatīm maruto aśvināpo yakṣi devān ratnadheyāya viśvān ||

7.009.06a त्वामग्ने समिधानो वसिष्ठो जरूथं हन्यक्षि राये पुरंधिम् ।

7.009.06c पुरुणीथा जातवेदो जरस्व यूयं पात स्वस्तिभिः सदा नः ॥

7.009.06a tvām agne samidhāno vasiṣṭho jarūthaṁ han yakṣi rāye purandhim |
7.009.06c puruṇīthā jātavedo jarasva yūyam pāta svastibhiḥ sadā naḥ ||

7.010.01a उषो न जारः पृथु पाजो अश्रेद्दविद्युतद्दीद्यच्छोशुचानः ।

7.010.01c वृषा हरिः शुचिरा भाति भासा धियो हिन्वान उशतीरजीगः ॥

7.010.01a uṣo na jāraḥ pṛthu pājo aśred davidyutad dīdyac chośucānaḥ |
7.010.01c vṛṣā hariḥ śucir ā bhāti bhāsā dhiyo hinvāna uśatīr ajīgaḥ ||

7.010.02a स्व१र्ण वस्तोरुषसामरोचि यज्ञं तन्वाना उशिजो न मन्म ।

7.010.02c अग्निर्जन्मानि देव आ वि विद्वान्द्रवद्दूतो देवयावा वनिष्ठः ॥

7.010.02a sva1r ṇa vastor uṣasām aroci yajñaṁ tanvānā uśijo na manma |
7.010.02c agnir janmāni deva ā vi vidvān dravad dūto devayāvā vaniṣṭhaḥ ||

7.010.03a अच्छा गिरो मतयो देवयन्तीरग्निं यन्ति द्रविणं भिक्षमाणाः ।

7.010.03c सुसंदृशं सुप्रतीकं स्वञ्चं हव्यवाहमरतिं मानुषाणाम् ॥

7.010.03a acchā giro matayo devayantīr agniṁ yanti draviṇam bhikṣamāṇāḥ |
7.010.03c susandṛśaṁ supratīkaṁ svañcaṁ havyavāham aratim mānuṣāṇām ||

7.010.04a इन्द्रं नो अग्ने वसुभिः सजोषा रुद्रं रुद्रेभिरा वहा बृहन्तम् ।

7.010.04c आदित्येभिरदितिं विश्वजन्यां बृहस्पतिमृक्वभिर्विश्ववारम् ॥

7.010.04a indraṁ no agne vasubhiḥ sajoṣā rudraṁ rudrebhir ā vahā bṛhantam |
7.010.04c ādityebhir aditiṁ viśvajanyām bṛhaspatim ṛkvabhir viśvavāram ||

7.010.05a मन्द्रं होतारमुशिजो यविष्ठमग्निं विश ईळते अध्वरेषु ।

7.010.05c स हि क्षपावाँ अभवद्रयीणामतन्द्रो दूतो यजथाय देवान् ॥

7.010.05a mandraṁ hotāram uśijo yaviṣṭham agniṁ viśa īḻate adhvareṣu |
7.010.05c sa hi kṣapāvām̐ abhavad rayīṇām atandro dūto yajathāya devān ||

7.011.01a महाँ अस्यध्वरस्य प्रकेतो न ऋते त्वदमृता मादयन्ते ।

7.011.01c आ विश्वेभिः सरथं याहि देवैर्न्यग्ने होता प्रथमः सदेह ॥

7.011.01a mahām̐ asy adhvarasya praketo na ṛte tvad amṛtā mādayante |
7.011.01c ā viśvebhiḥ sarathaṁ yāhi devair ny agne hotā prathamaḥ sadeha ||

7.011.02a त्वामीळते अजिरं दूत्याय हविष्मन्तः सदमिन्मानुषासः ।

7.011.02c यस्य देवैरासदो बर्हिरग्नेऽहान्यस्मै सुदिना भवन्ति ॥

7.011.02a tvām īḻate ajiraṁ dūtyāya haviṣmantaḥ sadam in mānuṣāsaḥ |
7.011.02c yasya devair āsado barhir agne 'hāny asmai sudinā bhavanti ||

7.011.03a त्रिश्चिदक्तोः प्र चिकितुर्वसूनि त्वे अन्तर्दाशुषे मर्त्याय ।

7.011.03c मनुष्वदग्न इह यक्षि देवान्भवा नो दूतो अभिशस्तिपावा ॥

7.011.03a triś cid aktoḥ pra cikitur vasūni tve antar dāśuṣe martyāya |
7.011.03c manuṣvad agna iha yakṣi devān bhavā no dūto abhiśastipāvā ||

7.011.04a अग्निरीशे बृहतो अध्वरस्याग्निर्विश्वस्य हविषः कृतस्य ।

7.011.04c क्रतुं ह्यस्य वसवो जुषन्ताथा देवा दधिरे हव्यवाहम् ॥

7.011.04a  agnir īśe bṛhato adhvarasyāgnir viśvasya haviṣaḥ kṛtasya |
7.011.04c  kratuṁ hy asya vasavo juṣantāthā devā dadhire havyavāham ||

7.011.05a आग्ने वह हविरद्याय देवानिन्द्रज्येष्ठास इह मादयन्ताम् ।

7.011.05c इमं यज्ञं दिवि देवेषु धेहि यूयं पात स्वस्तिभिः सदा नः ॥

7.011.05a  āgne vaha haviradyāya devān indrajyeṣṭhāsa iha mādayantām |
7.011.05c  imaṁ yajñaṁ divi deveṣu dhehi yūyam pāta svastibhiḥ sadā naḥ ||

7.012.01a अगन्म महा नमसा यविष्ठं यो दीदाय समिद्धः स्वे दुरोणे ।

7.012.01c चित्रभानुं रोदसी अन्तरुर्वी स्वाहुतं विश्वतः प्रत्यञ्चम् ॥

7.012.01a  aganma mahā namasā yaviṣṭhaṁ yo dīdāya samiddhaḥ sve duroṇe |
7.012.01c  citrabhānuṁ rodasī antar urvī svāhutaṁ viśvataḥ pratyañcam ||

7.012.02a स मह्ना विश्वा दुरितानि साह्वानग्नि ष्टवे दम आ जातवेदाः ।

7.012.02c स नो रक्षिषद्दुरितादवद्यादस्मान्गृणत उत नो मघोनः ॥

7.012.02a  sa mahnā viśvā duritāni sāhvān agni ṣṭave dama ā jātavedāḥ |
7.012.02c  sa no rakṣiṣad duritād avadyād asmān gṛṇata uta no maghonaḥ ||

7.012.03a त्वं वरुण उत मित्रो अग्ने त्वां वर्धन्ति मतिभिर्वसिष्ठाः ।

7.012.03c त्वे वसु सुषणनानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.012.03a  tvaṁ varuṇa uta mitro agne tvāṁ vardhanti matibhir vasiṣṭhāḥ |
7.012.03c  tve vasu suṣaṇanāni santu yūyam pāta svastibhiḥ sadā naḥ ||

7.013.01a प्राग्नये विश्वशुचे धियंधेऽसुरघ्ने मन्म धीतिं भरध्वम् ।

7.013.01c भरे हविर्न बर्हिषि प्रीणानो वैश्वानराय यतये मतीनाम् ॥

7.013.01a  prāgnaye viśvaśuce dhiyandhe 'suraghne manma dhītim bharadhvam |
7.013.01c  bhare havir na barhiṣi prīṇāno vaiśvānarāya yataye matīnām ||

7.013.02a त्वमग्ने शोचिषा शोशुचान आ रोदसी अपृणा जायमानः ।

7.013.02c त्वं देवाँ अभिशस्तेरमुञ्चो वैश्वानर जातवेदो महित्वा ॥

7.013.02a  tvam agne śociṣā śośucāna ā rodasī apṛṇā jāyamānaḥ |

7.013.02c tvaṁ devām̐ abhiśaster amuñco vaiśvānara jātavedo mahitvā ||

7.013.03a जातो यदग्ने भुवना व्यख्यः पशून्न गोपा इर्यः परिज्मा ।

7.013.03c वैश्वानर ब्रह्मणे विन्द गातुं यूयं पात स्वस्तिभिः सदा नः ॥

7.013.03a jāto yad agne bhuvanā vy akhyaḥ paśūn na gopā iryaḥ parijmā |
7.013.03c vaiśvānara brahmaṇe vinda gātuṁ yūyam pāta svastibhiḥ sadā naḥ ||

7.014.01a समिधा जातवेदसे देवाय देवहूतिभिः ।

7.014.01c हविर्भिः शुक्रशोचिषे नमस्विनो वयं दाशेमाग्नये ॥

7.014.01a samidhā jātavedase devāya devahūtibhiḥ |
7.014.01c havirbhiḥ śukraśociṣe namasvino vayaṁ dāśemāgnaye ||

7.014.02a वयं ते अग्ने समिधा विधेम वयं दाशेम सुष्टुती यजत्र ।

7.014.02c वयं घृतेनाध्वरस्य होतर्वयं देव हविषा भद्रशोचे ॥

7.014.02a vayaṁ te agne samidhā vidhema vayaṁ dāśema suṣṭutī yajatra |
7.014.02c vayaṁ ghṛtenādhvarasya hotar vayaṁ deva haviṣā bhadraśoce ||

7.014.03a आ नो देवेभिरुप देवहूतिमग्ने याहि वषट्कृतिं जुषाणः ।

7.014.03c तुभ्यं देवाय दाशतः स्याम यूयं पात स्वस्तिभिः सदा नः ॥

7.014.03a ā no devebhir upa devahūtim agne yāhi vaṣaṭkṛtiṁ juṣāṇaḥ |
7.014.03c tubhyaṁ devāya dāśataḥ syāma yūyam pāta svastibhiḥ sadā naḥ ||

7.015.01a उपसद्याय मीळ्हुष आस्ये जुहुता हविः ।

7.015.01c यो नो नेदिष्ठमाप्यम् ॥

7.015.01a upasadyāya mīḷhuṣa āsye juhutā haviḥ |
7.015.01c yo no nediṣṭham āpyam ||

7.015.02a यः पञ्च चर्षणीरभि निषसाद दमेदमे ।

7.015.02c कविर्गृहपतिर्युवा ॥

7.015.02a yaḥ pañca carṣaṇīr abhi niṣasāda dame-dame |
7.015.02c kavir gṛhapatir yuvā ||

7.015.03a स नो वेदो अमात्यमग्नी रक्षतु विश्वतः ।

7.015.03c उतास्मान्पात्वंहसः ॥

7.015.03a sa no vedo amātyam agnī rakṣatu viśvataḥ |
7.015.03c utāsmān pātv aṁhasaḥ ||

7.015.04a नवं नु स्तोममग्नये दिवः श्येनाय जीजनम् ।

7.015.04c वस्वः कुविद्वनाति नः ॥

7.015.04a navaṁ nu stomam agnaye divaḥ śyenāya jījanam |
7.015.04c vasvaḥ kuvid vanāti naḥ ||

7.015.05a स्पार्हा यस्य श्रियो दृशे रयिर्वीरवतो यथा ।

7.015.05c अग्रे यज्ञस्य शोचतः ॥

7.015.05a spārhā yasya śriyo dṛśe rayir vīravato yathā |
7.015.05c agre yajñasya śocataḥ ||

7.015.06a सेमां वेतु वषट्कृतिमग्निर्जुषत नो गिरः ।

7.015.06c यजिष्ठो हव्यवाहनः ॥

7.015.06a semāṁ vetu vaṣaṭkṛtim agnir juṣata no giraḥ |
7.015.06c yajiṣṭho havyavāhanaḥ ||

7.015.07a नि त्वा नक्ष्य विश्पते द्युमन्तं देव धीमहि ।

7.015.07c सुवीरमग्न आहुत ॥

7.015.07a ni tvā nakṣya viśpate dyumantaṁ deva dhīmahi |
7.015.07c suvīram agna āhuta ||

7.015.08a क्षप उस्रश्च दीदिहि स्वग्नयस्त्वया वयम् ।

7.015.08c सुवीरस्त्वमस्मयुः ॥

7.015.08a kṣapa usraś ca dīdihi svagnayas tvayā vayam |
7.015.08c suvīras tvam asmayuḥ ||

7.015.09a उप त्वा सातये नरो विप्रासो यन्ति धीतिभिः ।

7.015.09c उपाक्षरा सहस्रिणी ॥

7.015.09a upa tvā sātaye naro viprāso yanti dhītibhiḥ |
7.015.09c upākṣarā sahasriṇī ||

7.015.10a अग्नी रक्षांसि सेधति शुक्रशोचिरमर्त्यः ।

7.015.10c शुचिः पावक ईड्यः ॥

7.015.10a agnī rakṣāṁsi sedhati śukraśocir amartyaḥ |
7.015.10c śuciḥ pāvaka īḍyaḥ ||

7.015.11a स नो राधांस्या भरेशानः सहसो यहो ।

7.015.11c भगश्च दातु वार्यम् ॥

7.015.11a sa no rādhāṁsy ā bhareśānaḥ sahaso yaho |
7.015.11c bhagaś ca dātu vāryam ||

7.015.12a त्वमग्ने वीरवद्यशो देवश्च सविता भगः ।

7.015.12c दितिश्च दाति वार्यम् ॥

7.015.12a tvam agne vīravad yaśo devaś ca savitā bhagaḥ |
7.015.12c ditiś ca dāti vāryam ||

7.015.13a अग्ने रक्षा णो अंहसः प्रति ष्म देव रीषतः ।

7.015.13c तपिष्ठैरजरो दह ॥

7.015.13a agne rakṣā ṇo aṁhasaḥ prati ṣma deva rīṣataḥ |
7.015.13c tapiṣṭhair ajaro daha ||

7.015.14a अधा मही न आयस्यनाधृष्टो नृपीतये ।

7.015.14c पूर्भवा शतभुजिः ॥

7.015.14a adhā mahī na āyasy anādhṛṣṭo nṛpītaye |
7.015.14c pūr bhavā śatabhujiḥ ||

7.015.15a त्वं नः पाह्यंहसो दोषावस्तरघायतः ।

7.015.15c दिवा नक्तमदाभ्य ॥

7.015.15a tvaṁ naḥ pāhy aṁhaso doṣāvastar aghāyataḥ |

7.015.15c divā naktam adābhya ||

7.016.01a एना वो अग्निं नमसोर्जो नपातमा हुवे ।

7.016.01c प्रियं चेतिष्ठमरतिं स्वध्वरं विश्वस्य दूतममृतम् ॥

7.016.01a enā vo agniṁ namasorjo napātam ā huve |

7.016.01c priyaṁ cetiṣṭham aratiṁ svadhvaraṁ viśvasya dūtam amṛtam ||

7.016.02a स योजते अरुषा विश्वभोजसा स दुद्रवत्स्वाहुतः ।

7.016.02c सुब्रह्मा यज्ञः सुशमी वसूनां देवं राधो जनानाम् ॥

7.016.02a sa yojate aruṣā viśvabhojasā sa dudravat svāhutaḥ |

7.016.02c subrahmā yajñaḥ suśamī vasūnāṁ devaṁ rādho janānām ||

7.016.03a उदस्य शोचिरस्थादाजुह्वानस्य मीळ्हुषः ।

7.016.03c उद्धूमासो अरुषासो दिविस्पृशः समग्निमिन्धते नरः ॥

7.016.03a ud asya śocir asthād ājuhvānasya mīḻhuṣaḥ |

7.016.03c ud dhūmāso aruṣāso divispṛśaḥ sam agnim indhate naraḥ ||

7.016.04a तं त्वा दूतं कृण्महे यशस्तमं देवाँ आ वीतये वह ।

7.016.04c विश्वा सूनो सहसो मर्तभोजना रास्व तद्यत्त्वेमहे ॥

7.016.04a taṁ tvā dūtaṁ kṛṇmahe yaśastamaṁ devām̐ ā vītaye vaha |

7.016.04c viśvā sūno sahaso martabhojanā rāsva tad yat tvemahe ||

7.016.05a त्वमग्ने गृहपतिस्त्वं होता नो अध्वरे ।

7.016.05c त्वं पोता विश्ववार प्रचेता यक्षि वेषि च वार्यम् ॥

7.016.05a tvam agne gṛhapatis tvaṁ hotā no adhvare |

7.016.05c tvam potā viśvavāra pracetā yakṣi veṣi ca vāryam ||

7.016.06a कृधि रत्नं यजमानाय सुक्रतो त्वं हि रत्नधा असि ।

7.016.06c आ न ऋते शिशीहि विश्वमृत्विजं सुशंसो यश्च दक्षते ॥

7.016.06a kṛdhi ratnaṁ yajamānāya sukrato tvaṁ hi ratnadhā asi |

7.016.06c ā na ṛte śiśīhi viśvam ṛtvijaṁ suśaṁso yaś ca dakṣate ||

7.016.07a त्वे अग्ने स्वाहुत प्रियासः सन्तु सूरयः ।

7.016.07c यन्तारो ये मघवानो जनानामूर्वान्दयन्त गोनाम् ॥

7.016.07a tve agne svāhuta priyāsaḥ santu sūrayaḥ |
7.016.07c yantāro ye maghavāno janānām ūrvān dayanta gonām ||

7.016.08a येषामिळा घृतहस्ता दुरोण आँ अपि प्राता निषीदति ।

7.016.08c ताँस्त्रायस्व सहस्य द्रुहो निदो यच्छा नः शर्म दीर्घश्रुत् ॥

7.016.08a yeṣām iḷā ghṛtahastā duroṇa ām̐ api prātā niṣīdati |
7.016.08c tām̐s trāyasva sahasya druho nido yacchā naḥ śarma dīrghaśrut ||

7.016.09a स मन्द्रया च जिह्वया वह्निरासा विदुष्टरः ।

7.016.09c अग्ने रयिं मघवद्भ्यो न आ वह हव्यदातिं च सूदय ॥

7.016.09a sa mandrayā ca jihvayā vahnir āsā viduṣṭaraḥ |
7.016.09c agne rayiṁ maghavadbhyo na ā vaha havyadātiṁ ca sūdaya ||

7.016.10a ये राधांसि ददत्यश्व्या मघा कामेन श्रवसो महः ।

7.016.10c ताँ अंहसः पिपृहि पर्तृभिष्ट्वं शतं पूर्भिर्यविष्ठ्य ॥

7.016.10a ye rādhāṁsi dadaty aśvyā maghā kāmena śravaso mahaḥ |
7.016.10c tām̐ aṁhasaḥ pipṛhi partṛbhiṣ ṭvaṁ śatam pūrbhir yaviṣṭhya ||

7.016.11a देवो वो द्रविणोदाः पूर्णां विवष्ट्यासिचम् ।

7.016.11c उद्वा सिञ्चध्वमुप वा पृणध्वमादिद्वो देव ओहते ॥

7.016.11a devo vo draviṇodāḥ pūrṇāṁ vivaṣṭy āsicam |
7.016.11c ud vā siñcadhvam upa vā pṛṇadhvam ād id vo deva ohate ||

7.016.12a तं होतारमध्वरस्य प्रचेतसं वह्निं देवा अकृण्वत ।

7.016.12c दधाति रत्नं विधते सुवीर्यमग्निर्जनाय दाशुषे ॥

7.016.12a taṁ hotāram adhvarasya pracetasaṁ vahniṁ devā akṛṇvata |
7.016.12c dadhāti ratnaṁ vidhate suvīryam agnir janāya dāśuṣe ||

7.017.01 अग्ने भव सुषमिधा समिद्ध उत बर्हिरुर्विया वि स्तृणीताम् ॥

7.017.01 agne bhava suṣamidhā samiddha uta barhir urviyā vi stṛṇītām ||

7.017.02 उत द्वार उशतीर्वि श्रयन्तामुत देवाँ उशत आ वहेह ॥

7.017.02 uta dvāra uśatīr vi śrayantām uta devām̐ uśata ā vaheha ||

7.017.03 अग्ने वीहि हविषा यक्षि देवान्स्वध्वरा कृणुहि जातवेदः ॥

7.017.03 agne vīhi haviṣā yakṣi devān svadhvarā kṛṇuhi jātavedaḥ ||

7.017.04 स्वध्वरा करति जातवेदा यक्षद्देवाँ अमृतान्पिप्रयच्च ॥

7.017.04 svadhvarā karati jātavedā yakṣad devām̐ amṛtān piprayac ca ||

7.017.05 वंस्व विश्वा वार्याणि प्रचेतः सत्या भवन्त्वाशिषो नो अद्य ॥

7.017.05 vaṁsva viśvā vāryāṇi pracetaḥ satyā bhavantv āśiṣo no adya ||

7.017.06 त्वामु ते दधिरे हव्यवाहं देवासो अग्न ऊर्ज आ नपातम् ॥

7.017.06 tvām u te dadhire havyavāhaṁ devāso agna ūrja ā napātam ||

7.017.07 ते ते देवाय दाशतः स्याम महो नो रत्ना वि दध इयानः ॥

7.017.07 te te devāya dāśataḥ syāma maho no ratnā vi dadha iyānaḥ ||

7.018.01a त्वे ह यत्पितरश्चिन्न इन्द्र विश्वा वामा जरितारो असन्वन् ।

7.018.01c त्वे गावः सुदुघास्त्वे ह्यश्वास्त्वं वसु देवयते वनिष्ठः ॥

7.018.01a tve ha yat pitaraś cin na indra viśvā vāmā jaritāro asanvan |
7.018.01c tve gāvaḥ sudughās tve hy aśvās tvaṁ vasu devayate vaniṣṭhaḥ ||

7.018.02a राजेव हि जनिभिः क्षेष्येवाव द्युभिरभि विदुष्कविः सन् ।

7.018.02c पिशा गिरो मघवन्गोभिरश्वैस्त्वायतः शिशीहि राये अस्मान् ॥

7.018.02a rājeva hi janibhiḥ kṣeṣy evāva dyubhir abhi viduṣ kaviḥ san |
7.018.02c piśā giro maghavan gobhir aśvais tvāyataḥ śiśīhi rāye asmān ||

7.018.03a इमा उ त्वा पस्पृधानासो अत्र मन्द्रा गिरो देवयन्तीरुप स्थुः ।

7.018.03c अर्वाची ते पथ्या राय एतु स्याम ते सुमताविन्द्र शर्मन् ॥

7.018.03a imā u tvā paspṛdhānāso atra mandrā giro devayantīr upa sthuḥ |
7.018.03c arvācī te pathyā rāya etu syāma te sumatāv indra śarman ||

7.018.04a धेनुं न त्वा सूयवसे दुदुक्षन्नुप ब्रह्माणि ससृजे वसिष्ठः ।
7.018.04c त्वामिन्मे गोपतिं विश्व आहा न इन्द्रः सुमतिं गन्त्वच्छ ॥

7.018.04a dhenuṁ na tvā sūyavase dudukṣann upa brahmāṇi sasṛje vasiṣṭhaḥ |
7.018.04c tvām in me gopatiṁ viśva āhā na indraḥ sumatiṁ gantv accha ||

7.018.05a अर्णांसि चित्पप्रथाना सुदास इन्द्रो गाधान्यकृणोत्सुपारा ।
7.018.05c शर्धन्तं शिम्युमुचथस्य नव्यः शापं सिन्धूनामकृणोदशस्तीः ॥

7.018.05a arṇāṁsi cit paprathānā sudāsa indro gādhāny akṛṇot supārā |
7.018.05c śardhantaṁ śimyum ucathasya navyaḥ śāpaṁ sindhūnām akṛṇod aśastīḥ ||

7.018.06a पुरोळा इत्तुर्वशो यक्षुरासीद्राये मत्स्यासो निशिता अपीव ।
7.018.06c श्रुष्टिं चक्रुर्भृगवो द्रुह्यवश्च सखा सखायमतरद्विषूचोः ॥

7.018.06a puroḷā it turvaśo yakṣur āsīd rāye matsyāso niśitā apīva |
7.018.06c śruṣṭiṁ cakrur bhṛgavo druhyavaś ca sakhā sakhāyam atarad viṣūcoḥ ||

7.018.07a आ पक्थासो भलानसो भनन्तालिनासो विषाणिनः शिवासः ।
7.018.07c आ योऽनयत्सधमा आर्यस्य गव्या तृत्सुभ्यो अजगन्युधा नॄन् ॥

7.018.07a ā pakthāso bhalānaso bhanantālināso viṣāṇinaḥ śivāsaḥ |
7.018.07c ā yo 'nayat sadhamā āryasya gavyā tṛtsubhyo ajagan yudhā nṝn ||

7.018.08a दुराध्यो३ अदितिं स्रेवयन्तोऽचेतसो वि जगृभ्रे परुष्णीम् ।
7.018.08c मह्नाविव्यक्पृथिवीं पत्यमानः पशुष्कविरशयच्चायमानः ॥

7.018.08a durādhyo3 aditiṁ srevayanto 'cetaso vi jagṛbhre paruṣṇīm |
7.018.08c mahnāvivyak pṛthivīṁ patyamānaḥ paśuṣ kavir aśayac cāyamānaḥ ||

7.018.09a ईयुरर्थं न न्यर्थं परुष्णीमाशुश्चनेदभिपित्वं जगाम ।
7.018.09c सुदास इन्द्रः सुतुकाँ अमित्रानरन्धयन्मानुषे वध्रिवाचः ॥

7.018.09a īyur arthaṁ na nyartham paruṣṇīm āśuś caned abhipitvaṁ jagāma |
7.018.09c sudāsa indraḥ sutukām̐ amitrān arandhayan mānuṣe vadhrivācaḥ ||

7.018.10a ईयुर्गावो न यवसादगोपा यथाकृतमभि मित्रं चितासः ।

7.018.10c पृश्निगावः पृश्निनिप्रेषितासः श्रुष्टिं चक्रुर्नियुतो रन्तयश्च ॥

7.018.10a īyur gāvo na yavasād agopā yathākṛtam abhi mitraṁ citāsaḥ |
7.018.10c pṛśnigāvaḥ pṛśninipreṣitāsaḥ śruṣṭiṁ cakrur niyuto rantayaś ca ||

7.018.11a एकं च यो विंशतिं च श्रवस्या वैकर्णयोर्जनान्राजा न्यस्तः ।

7.018.11c दस्मो न सद्मन्नि शिशाति बर्हिः शूरः सर्गमकृणोदिन्द्र एषाम् ॥

7.018.11a ekaṁ ca yo viṁśatiṁ ca śravasyā vaikarṇayor janān rājā ny astaḥ |
7.018.11c dasmo na sadman ni śiśāti barhiḥ śūraḥ sargam akṛṇod indra eṣām ||

7.018.12a अध श्रुतं कवषं वृद्धमप्स्वनु द्रुह्युं नि वृणग्वज्रबाहुः ।

7.018.12c वृणाना अत्र सख्याय सख्यं त्वायन्तो ये अमदन्ननु त्वा ॥

7.018.12a adha śrutaṁ kavaṣaṁ vṛddham apsv anu druhyuṁ ni vṛṇag vajrabāhuḥ |
7.018.12c vṛṇānā atra sakhyāya sakhyaṁ tvāyanto ye amadann anu tvā ||

7.018.13a वि सद्यो विश्वा दृंहितान्येषामिन्द्रः पुरः सहसा सप्त दर्दः ।

7.018.13c व्यानवस्य तृत्सवे गयं भाग्जेष्म पूरुं विदथे मृध्रवाचम् ॥

7.018.13a vi sadyo viśvā dṛṁhitāny eṣām indraḥ puraḥ sahasā sapta dardaḥ |
7.018.13c vy ānavasya tṛtsave gayam bhāg jeṣma pūruṁ vidathe mṛdhravācam ||

7.018.14a नि गव्यवोऽनवो द्रुह्यवश्च षष्टिः शता सुषुपुः षट् सहस्रा ।

7.018.14c षष्टिर्वीरासो अधि षड्दुवोयु विश्वेदिन्द्रस्य वीर्या कृतानि ॥

7.018.14a ni gavyavo 'navo druhyavaś ca ṣaṣṭiḥ śatā suṣupuḥ ṣaṭ sahasrā |
7.018.14c ṣaṣṭir vīrāso adhi ṣaḍ duvoyu viśved indrasya vīryā kṛtāni ||

7.018.15a इन्द्रेणैते तृत्सवो वेविषाणा आपो न सृष्टा अधवन्त नीचीः ।

7.018.15c दुर्मित्रासः प्रकलविन्मिमाना जहुर्विश्वानि भोजना सुदासे ॥

7.018.15a indreṇaite tṛtsavo veviṣāṇā āpo na sṛṣṭā adhavanta nīcīḥ |
7.018.15c durmitrāsaḥ prakalavin mimānā jahur viśvāni bhojanā sudāse ||

7.018.16a अर्धं वीरस्य शृतपामनिन्द्रं परा शर्धन्तं नुनुदे अभि क्षाम् ।

7.018.16c इन्द्रो मन्युं मन्युम्यो मिमाय भेजे पथो वर्तनिं पत्यमानः ॥

7.018.16a ardhaṁ vīrasya śṛtapām anindram parā śardhantaṁ nunude abhi kṣām |

7.018.16c  indro manyum manyumyo mimāya bheje patho vartanim patyamānaḥ ||

7.018.17a आध्रेण चित्तद्वेकं चकार सिंह्यं चित्पेत्वेना जघान ।

7.018.17c अव स्रक्तीर्वेश्यावृश्चदिन्द्रः प्रायच्छद्विश्वा भोजना सुदासे ॥

7.018.17a  ādhreṇa cit tad v ekaṁ cakāra siṁhyaṁ cit petvenā jaghāna |
7.018.17c  ava sraktīr veśyāvṛścad indraḥ prāyacchad viśvā bhojanā sudāse ||

7.018.18a शश्वन्तो हि शत्रवो रारधुष्टे भेदस्य चिच्छर्धतो विन्द रन्धिम् ।

7.018.18c मर्ताँ एन स्तुवतो यः कृणोति तिग्मं तस्मिन्नि जहि वज्रमिन्द्र ॥

7.018.18a  śaśvanto hi śatravo rāradhuṣ ṭe bhedasya cic chardhato vinda randhim |
7.018.18c  martām̐ ena stuvato yaḥ kṛṇoti tigmaṁ tasmin ni jahi vajram indra ||

7.018.19a आवदिन्द्रं यमुना तृत्सवश्च प्रात्र भेदं सर्वताता मुषायत् ।

7.018.19c अजासश्च शिग्रवो यक्षवश्च बलिं शीर्षाणि जभ्रुरश्व्यानि ॥

7.018.19a  āvad indraṁ yamunā tṛtsavaś ca prātra bhedaṁ sarvatātā muṣāyat |
7.018.19c  ajāsaś ca śigravo yakṣavaś ca baliṁ śīrṣāṇi jabhrur aśvyāni ||

7.018.20a न त इन्द्र सुमतयो न रायः संचक्षे पूर्वा उषसो न नूत्नाः ।

7.018.20c देवकं चिन्मान्यमानं जघन्थाव त्मना बृहतः शम्बरं भेत् ॥

7.018.20a  na ta indra sumatayo na rāyaḥ sañcakṣe pūrvā uṣaso na nūtnāḥ |
7.018.20c  devakaṁ cin mānyamānaṁ jaghanthāva tmanā bṛhataḥ śambaram bhet ||

7.018.21a प्र ये गृहादममदुस्त्वाया पराशरः शतयातुर्वसिष्ठः ।

7.018.21c न ते भोजस्य सख्यं मृषन्ताधा सूरिभ्यः सुदिना व्युच्छान् ॥

7.018.21a  pra ye gṛhād amamadus tvāyā parāśaraḥ śatayātur vasiṣṭhaḥ |
7.018.21c  na te bhojasya sakhyam mṛṣantādhā sūribhyaḥ sudinā vy ucchān ||

7.018.22a द्वे नप्तुर्देववतः शते गोर्द्वा रथा वधूमन्ता सुदासः ।

7.018.22c अर्हन्नग्ने पैजवनस्य दानं होतेव सद्म पर्येमि रेभन् ॥

7.018.22a  dve naptur devavataḥ śate gor dvā rathā vadhūmantā sudāsaḥ |
7.018.22c  arhann agne paijavanasya dānaṁ hoteva sadma pary emi rebhan ||

7.018.23a चत्वारो मा पैजवनस्य दानाः स्मद्दिष्टयः कृशनिनो निरेके ।

7.018.23c ऋज्रासो मा पृथिविष्ठाः सुदासस्तोकं तोकाय श्रवसे वहन्ति ॥

7.018.23a catvāro mā paijavanasya dānāḥ smaddiṣṭayaḥ kṛśanino nireke |
7.018.23c ṛjrāso mā pṛthiviṣṭhāḥ sudāsas tokaṁ tokāya śravase vahanti ||

7.018.24a यस्य श्रवो रोदसी अन्तरुर्वी शीर्ष्णेशीर्ष्णे विबभाजा विभक्ता ।

7.018.24c सप्तेदिन्द्रं न स्रवतो गृणन्ति नि युध्यामधिमशिशादभीके ॥

7.018.24a yasya śravo rodasī antar urvī śīrṣṇe-śīrṣṇe vibabhājā vibhaktā |
7.018.24c sapted indraṁ na sravato gṛṇanti ni yudhyāmadhim aśiśād abhīke ||

7.018.25a इमं नरो मरुतः सश्चतानु दिवोदासं न पितरं सुदासः ।

7.018.25c अविष्टना पैजवनस्य केतं दूणाशं क्षत्रमजरं दुवोयु ॥

7.018.25a imaṁ naro marutaḥ saścatānu divodāsaṁ na pitaraṁ sudāsaḥ |
7.018.25c aviṣṭanā paijavanasya ketaṁ dūṇāśaṁ kṣatram ajaraṁ duvoyu ||

7.019.01a यस्तिग्मशृङ्गो वृषभो न भीम एकः कृष्टीश्च्यावयति प्र विश्वाः ।

7.019.01c यः शश्वतो अदाशुषो गयस्य प्रयन्तासि सुष्वितराय वेदः ॥

7.019.01a yas tigmaśṛṅgo vṛṣabho na bhīma ekaḥ kṛṣṭīś cyāvayati pra viśvāḥ |
7.019.01c yaḥ śaśvato adāśuṣo gayasya prayantāsi suṣvitarāya vedaḥ ||

7.019.02a त्वं ह त्यदिन्द्र कुत्समावः शुश्रूषमाणस्तन्वा समर्ये ।

7.019.02c दासं यच्छुष्णं कुयवं न्यस्मा अरन्धय आर्जुनेयाय शिक्षन् ॥

7.019.02a tvaṁ ha tyad indra kutsam āvaḥ śuśrūṣamāṇas tanvā samarye |
7.019.02c dāsaṁ yac chuṣṇaṁ kuyavaṁ ny asmā arandhaya ārjuneyāya śikṣan ||

7.019.03a त्वं धृष्णो धृषता वीतहव्यं प्रावो विश्वाभिरूतिभिः सुदासम् ।

7.019.03c प्र पौरुकुत्सिं त्रसदस्युमावः क्षेत्रसाता वृत्रहत्येषु पूरुम् ॥

7.019.03a tvaṁ dhṛṣṇo dhṛṣatā vītahavyam prāvo viśvābhir ūtibhiḥ sudāsam |
7.019.03c pra paurukutsiṁ trasadasyum āvaḥ kṣetrasātā vṛtrahatyeṣu pūrum ||

7.019.04a त्वं नृभिर्नृमणो देववीतौ भूरीणि वृत्रा हर्यश्व हंसि ।

7.019.04c त्वं नि दस्युं चुमुरिं धुनिं चास्वापयो दभीतये सुहन्तु ॥

7.019.04a tvaṁ nṛbhir nṛmaṇo devavītau bhūrīṇi vṛtrā haryaśva haṁsi |
7.019.04c tvaṁ ni dasyuṁ cumuriṁ dhuniṁ cāsvāpayo dabhītaye suhantu ||

7.019.05a तव च्यौत्नानि वज्रहस्त तानि नव यत्पुरो नवतिं च सद्यः ।
7.019.05c निवेशने शततमाविवेषीरहञ्च वृत्रं नमुचिमुताहन् ॥

7.019.05a tava cyautnāni vajrahasta tāni nava yat puro navatiṁ ca sadyaḥ |
7.019.05c niveśane śatatamāviveṣīr ahañ ca vṛtraṁ namucim utāhan ||

7.019.06a सना ता त इन्द्र भोजनानि रातहव्याय दाशुषे सुदासे ।
7.019.06c वृष्णे ते हरी वृषणा युनज्मि व्यन्तु ब्रह्माणि पुरुशाक वाजम् ॥

7.019.06a sanā tā ta indra bhojanāni rātahavyāya dāśuṣe sudāse |
7.019.06c vṛṣṇe te harī vṛṣaṇā yunajmi vyantu brahmāṇi puruśāka vājam ||

7.019.07a मा ते अस्यां सहसावन्परिष्टावघाय भूम हरिवः परादै ।
7.019.07c त्रायस्व नोऽवृकेभिर्वरूथैस्तव प्रियासः सूरिषु स्याम ॥

7.019.07a mā te asyāṁ sahasāvan pariṣṭāv aghāya bhūma harivaḥ parādai |
7.019.07c trāyasva no 'vṛkebhir varūthais tava priyāsaḥ sūriṣu syāma ||

7.019.08a प्रियास इत्ते मघवन्नभिष्टौ नरो मदेम शरणे सखायः ।
7.019.08c नि तुर्वशं नि याद्वं शिशीह्यतिथिग्वाय शंस्यं करिष्यन् ॥

7.019.08a priyāsa it te maghavann abhiṣṭau naro madema śaraṇe sakhāyaḥ |
7.019.08c ni turvaśaṁ ni yādvaṁ śiśīhy atithigvāya śaṁsyaṁ kariṣyan ||

7.019.09a सद्यश्चिन्नु ते मघवन्नभिष्टौ नरः शंसन्त्युक्थशास उक्था ।
7.019.09c ये ते हवेभिर्वि पणीँरदाशन्नस्मान्वृणीष्व युज्याय तस्मै ॥

7.019.09a sadyaś cin nu te maghavann abhiṣṭau naraḥ śaṁsanty ukthaśāsa ukthā |
7.019.09c ye te havebhir vi paṇīm̐r adāśann asmān vṛṇīṣva yujyāya tasmai ||

7.019.10a एते स्तोमा नरां नृतम तुभ्यमस्मद्र्यञ्चो ददतो मघानि ।
7.019.10c तेषामिन्द्र वृत्रहत्ये शिवो भूः सखा च शूरोऽविता च नृणाम् ॥

7.019.10a ete stomā narāṁ nṛtama tubhyam asmadryañco dadato maghāni |
7.019.10c teṣām indra vṛtrahatye śivo bhūḥ sakhā ca śūro 'vitā ca nṛṇām ||

7.019.11a नू इन्द्र शूर स्तवमान ऊती ब्रह्मजूतस्तन्वा वावृधस्व ।

7.019.11c उप नो वाजान्मिमीह्युप स्तीन्यूयं पात स्वस्तिभिः सदा नः ॥

7.019.11a nū indra śūra stavamāna ūtī brahmajūtas tanvā vāvṛdhasva |
7.019.11c upa no vājān mimīhy upa stīn yūyam pāta svastibhiḥ sadā naḥ ||

7.020.01a उग्रो जज्ञे वीर्याय स्वधावाञ्चक्रिरपो नर्यो यत्करिष्यन् ।

7.020.01c जग्मिर्युवा नृषदनमवोभिस्त्राता न इन्द्र एनसो महश्चित् ॥

7.020.01a ugro jajñe vīryāya svadhāvāñ cakrir apo naryo yat kariṣyan |
7.020.01c jagmir yuvā nṛṣadanam avobhis trātā na indra enaso mahaś cit ||

7.020.02a हन्ता वृत्रमिन्द्रः शूशुवानः प्रावीन्नु वीरो जरितारमूती ।

7.020.02c कर्ता सुदासे अह वा उ लोकं दाता वसु मुहुरा दाशुषे भूत् ॥

7.020.02a hantā vṛtram indraḥ śūśuvānaḥ prāvīn nu vīro jaritāram ūtī |
7.020.02c kartā sudāse aha vā u lokaṁ dātā vasu muhur ā dāśuṣe bhūt ||

7.020.03a युध्मो अनर्वा खजकृत्समद्वा शूरः सत्राषाड्जनुषेमषाळ्हः ।

7.020.03c व्यास इन्द्रः पृतनाः स्वोजा अधा विश्वं शत्रूयन्तं जघान ॥

7.020.03a yudhmo anarvā khajakṛt samadvā śūraḥ satrāṣāḍ januṣem aṣāḷhaḥ |
7.020.03c vy āsa indraḥ pṛtanāḥ svojā adhā viśvaṁ śatrūyantaṁ jaghāna ||

7.020.04a उभे चिदिन्द्र रोदसी महित्वा पप्राथ तविषीभिस्तुविष्मः ।

7.020.04c नि वज्रमिन्द्रो हरिवान्मिमिक्षन्समन्धसा मदेषु वा उवोच ॥

7.020.04a ubhe cid indra rodasī mahitvā paprātha taviṣībhis tuviṣmaḥ |
7.020.04c ni vajram indro harivān mimikṣan sam andhasā madeṣu vā uvoca ||

7.020.05a वृषा जजान वृषणं रणाय तमु चिन्नारी नर्यं ससूव ।

7.020.05c प्र यः सेनानीरध नृभ्यो अस्तीनः सत्वा गवेषणः स धृष्णुः ॥

7.020.05a vṛṣā jajāna vṛṣaṇaṁ raṇāya tam u cin nārī naryaṁ sasūva |
7.020.05c pra yaḥ senānīr adha nṛbhyo astīnaḥ satvā gaveṣaṇaḥ sa dhṛṣṇuḥ ||

7.020.06a नू चित्स भ्रेषते जनो न रेषन्मनो यो अस्य घोरमाविवासात् ।

7.020.06c यज्ञैर्य इन्द्रे दधते दुवांसि क्षयत्स राय ऋतपा ऋतेजाः ॥

7.020.06a nū cit sa bhreṣate jano na reṣan mano yo asya ghoram āvivāsāt |
7.020.06c yajñair ya indre dadhate duvāṁsi kṣayat sa rāya ṛtapā ṛtejāḥ ||

7.020.07a यदिन्द्र पूर्वो अपराय शिक्षन्नयज्ज्यायान्कनीयसो देष्णम् ।

7.020.07c अमृत इत्पर्यासीत दूरमा चित्र चित्र्यं भरा रयिं नः ॥

7.020.07a yad indra pūrvo aparāya śikṣann ayaj jyāyān kanīyaso deṣṇam |
7.020.07c amṛta it pary āsīta dūram ā citra citryam bharā rayiṁ naḥ ||

7.020.08a यस्त इन्द्र प्रियो जनो ददाशदसन्निरेके अद्रिवः सखा ते ।

7.020.08c वयं ते अस्यां सुमतौ चनिष्ठाः स्याम वरूथे अघ्नतो नृपीतौ ॥

7.020.08a yas ta indra priyo jano dadāśad asan nireke adrivaḥ sakhā te |
7.020.08c vayaṁ te asyāṁ sumatau caniṣṭhāḥ syāma varūthe aghnato nṛpītau ||

7.020.09a एष स्तोमो अचिक्रदद्वृषा त उत स्तामुर्मघवन्नक्रपिष्ट ।

7.020.09c रायस्कामो जरितारं त आगन्त्वमङ्ग शक्र वस्व आ शको नः ॥

7.020.09a eṣa stomo acikradad vṛṣā ta uta stāmur maghavann akrapiṣṭa |
7.020.09c rāyas kāmo jaritāraṁ ta āgan tvam aṅga śakra vasva ā śako naḥ ||

7.020.10a स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।

7.020.10c वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥

7.020.10a sa na indra tvayatāyā iṣe dhās tmanā ca ye maghavāno junanti |
7.020.10c vasvī ṣu te jaritre astu śaktir yūyam pāta svastibhiḥ sadā naḥ ||

7.021.01a असावि देवं गोऋजीकमन्धो न्यस्मिन्निन्द्रो जनुषेमुवोच ।

7.021.01c बोधामसि त्वा हर्यश्व यज्ञैर्बोधा न स्तोममन्धसो मदेषु ॥

7.021.01a asāvi devaṁ gorjīkam andho ny asminn indro januṣem uvoca |
7.021.01c bodhāmasi tvā haryaśva yajñair bodhā na stomam andhaso madeṣu ||

7.021.02a प्र यन्ति यज्ञं विपयन्ति बर्हिः सोममादो विदथे दुध्रवाचः ।

7.021.02c न्यु भ्रियन्ते यशसो गृभादा दूरउपब्दो वृषणो नृषाचः ॥

7.021.02a pra yanti yajñaṁ vipayanti barhiḥ somamādo vidathe dudhravācaḥ |
7.021.02c ny u bhriyante yaśaso gṛbhād ā dūraüpabdo vṛṣaṇo nṛṣācaḥ ||

7.021.03a त्वमिन्द्र स्रवितवा अपस्कः परिष्ठिता अहिना शूर पूर्वीः ।

7.021.03c त्वद्वावक्रे रथ्यो३ न धेना रेजन्ते विश्वा कृत्रिमाणि भीषा ॥

7.021.03a tvam indra sravitavā apas kaḥ pariṣṭhitā ahinā śūra pūrvīḥ |
7.021.03c tvad vāvakre rathyo3 na dhenā rejante viśvā kṛtrimāṇi bhīṣā ||

7.021.04a भीमो विवेषायुधेभिरेषामपांसि विश्वा नर्याणि विद्वान् ।

7.021.04c इन्द्रः पुरो जर्हृषाणो वि दूधोद्वि वज्रहस्तो महिना जघान ॥

7.021.04a bhīmo viveṣāyudhebhir eṣām apāṁsi viśvā naryāṇi vidvān |
7.021.04c indraḥ puro jarhṛṣāṇo vi dūdhod vi vajrahasto mahinā jaghāna ||

7.021.05a न यातव इन्द्र जूजुवुर्नो न वन्दना शविष्ठ वेद्याभिः ।

7.021.05c स शर्धदर्यो विषुणस्य जन्तोर्मा शिश्नदेवा अपि गुर्ऋतं नः ॥

7.021.05a na yātava indra jūjuvur no na vandanā śaviṣṭha vedyābhiḥ |
7.021.05c sa śardhad aryo viṣuṇasya jantor mā śiśnadevā api gur ṛtaṁ naḥ ||

7.021.06a अभि क्रत्वेन्द्र भूरध ज्मन्न ते विव्यङ्महिमानं रजांसि ।

7.021.06c स्वेना हि वृत्रं शवसा जघन्थ न शत्रुरन्तं विविदद्युधा ते ॥

7.021.06a abhi kratvendra bhūr adha jman na te vivyaṅ mahimānaṁ rajāṁsi |
7.021.06c svenā hi vṛtraṁ śavasā jaghantha na śatrur antaṁ vividad yudhā te ||

7.021.07a देवाश्चित्ते असुर्याय पूर्वेऽनु क्षत्राय ममिरे सहांसि ।

7.021.07c इन्द्रो मघानि दयते विषह्येन्द्रं वाजस्य जोहुवन्त सातौ ॥

7.021.07a devāś cit te asuryāya pūrve 'nu kṣatrāya mamire sahāṁsi |
7.021.07c indro maghāni dayate viṣahyendraṁ vājasya johuvanta sātau ||

7.021.08a कीरिश्चिद्धि त्वामवसे जुहावेशानमिन्द्र सौभगस्य भूरेः ।

7.021.08c अवो बभूथ शतमूते अस्मे अभिक्षत्तुस्त्वावतो वरूता ॥

7.021.08a kīriś cid dhi tvām avase juhāveśānam indra saubhagasya bhūreḥ |
7.021.08c avo babhūtha śatamūte asme abhikṣattus tvāvato varūtā ||

7.021.09a सखायस्त इन्द्र विश्वह स्याम नमोवृधासो महिना तरुत्र ।

7.021.09c वन्वन्तु स्मा तेऽवसा समीके३ऽभीतिमर्यो वनुषां शवांसि ॥

7.021.09a sakhāyas ta indra viśvaha syāma namovṛdhāso mahinā tarutra |
7.021.09c vanvantu smā te 'vasā samīke3 'bhītim aryo vanuṣāṁ śavāṁsi ||

7.021.10a स न इन्द्र त्वयताया इषे धास्त्मना च ये मघवानो जुनन्ति ।

7.021.10c वस्वी षु ते जरित्रे अस्तु शक्तिर्यूयं पात स्वस्तिभिः सदा नः ॥

7.021.10a sa na indra tvayatāyā iṣe dhās tmanā ca ye maghavāno junanti |
7.021.10c vasvī ṣu te jaritre astu śaktir yūyam pāta svastibhiḥ sadā naḥ ||

7.022.01a पिबा सोममिन्द्र मन्दतु त्वा यं ते सुषाव हर्यश्वाद्रिः ।

7.022.01c सोतुर्बाहुभ्यां सुयतो नार्वा ॥

7.022.01a pibā somam indra mandatu tvā yaṁ te suṣāva haryaśvādriḥ |
7.022.01c sotur bāhubhyāṁ suyato nārvā ||

7.022.02a यस्ते मदो युज्यश्चारुरस्ति येन वृत्राणि हर्यश्व हंसि ।

7.022.02c स त्वामिन्द्र प्रभूवसो ममत्तु ॥

7.022.02a yas te mado yujyaś cārur asti yena vṛtrāṇi haryaśva haṁsi |
7.022.02c sa tvām indra prabhūvaso mamattu ||

7.022.03a बोधा सु मे मघवन्वाचमेमां यां ते वसिष्ठो अर्चति प्रशस्तिम् ।

7.022.03c इमा ब्रह्म सधमादे जुषस्व ॥

7.022.03a bodhā su me maghavan vācam emāṁ yāṁ te vasiṣṭho arcati praśastim |
7.022.03c imā brahma sadhamāde juṣasva ||

7.022.04a श्रुधी हवं विपिपानस्याद्रेर्बोधा विप्रस्यार्चतो मनीषाम् ।

7.022.04c कृष्वा दुवांस्यन्तमा सचेमा ॥

7.022.04a śrudhī havaṁ vipipānasyādrer bodhā viprasyārcato manīṣām |
7.022.04c kṛṣvā duvāṁsy antamā sacemā ||

7.022.05a न ते गिरो अपि मृष्ये तुरस्य न सुष्टुतिमसुर्यस्य विद्वान् ।

7.022.05c सदा ते नाम स्वयशो विवक्मि ॥

7.022.05a na te giro api mṛṣye turasya na suṣṭutim asuryasya vidvān |
7.022.05c sadā te nāma svayaśo vivakmi ||

7.022.06a भूरि हि ते सवना मानुषेषु भूरि मनीषी हवते त्वामित् ।

7.022.06c मारे अस्मन्मघवञ्ज्योक्कः ॥

7.022.06a bhūri hi te savanā mānuṣeṣu bhūri manīṣī havate tvām it |
7.022.06c māre asman maghavañ jyok kaḥ ||

7.022.07a तुभ्येदिमा सवना शूर विश्वा तुभ्यं ब्रह्माणि वर्धना कृणोमि ।

7.022.07c त्वं नृभिर्हव्यो विश्वधासि ॥

7.022.07a tubhyed imā savanā śūra viśvā tubhyam brahmāṇi vardhanā kṛṇomi |
7.022.07c tvaṁ nṛbhir havyo viśvadhāsi ||

7.022.08a नू चिन्नु ते मन्यमानस्य दस्मोदश्नुवन्ति महिमानमुग्र ।

7.022.08c न वीर्यमिन्द्र ते न राधः ॥

7.022.08a nū cin nu te manyamānasya dasmod aśnuvanti mahimānam ugra |
7.022.08c na vīryam indra te na rādhaḥ ||

7.022.09a ये च पूर्व ऋषयो ये च नूत्ना इन्द्र ब्रह्माणि जनयन्त विप्राः ।

7.022.09c अस्मे ते सन्तु सख्या शिवानि यूयं पात स्वस्तिभिः सदा नः ॥

7.022.09a ye ca pūrva ṛṣayo ye ca nūtnā indra brahmāṇi janayanta viprāḥ |
7.022.09c asme te santu sakhyā śivāni yūyam pāta svastibhiḥ sadā naḥ ||

7.023.01a उदु ब्रह्माण्यैरत श्रवस्येन्द्रं समर्ये महया वसिष्ठ ।

7.023.01c आ यो विश्वानि शवसा ततानोपश्रोता म ईवतो वचांसि ॥

7.023.01a ud u brahmāṇy airata śravasyendraṁ samarye mahayā vasiṣṭha |
7.023.01c ā yo viśvāni śavasā tatānopaśrotā ma īvato vacāṁsi ||

7.023.02a अयामि घोष इन्द्र देवजामिरिरज्यन्त यच्छुरुधो विवाचि ।

7.023.02c नहि स्वमायुश्चिकिते जनेषु तानीदंहांस्यति पर्ष्यस्मान् ॥

7.023.02a ayāmi ghoṣa indra devajāmir irajyanta yac churudho vivāci |
7.023.02c nahi svam āyuś cikite janeṣu tānīd aṁhāṁsy ati parṣy asmān ||

7.023.03a युजे रथं गवेषणं हरिभ्यामुप ब्रह्माणि जुजुषाणमस्थुः ।

7.023.03c वि बाधिष्ट स्य रोदसी महित्वेन्द्रो वृत्राण्यप्रती जघन्वान् ॥

7.023.03a yuje rathaṁ gaveṣaṇaṁ haribhyām upa brahmāṇi jujuṣāṇam asthuḥ |
7.023.03c vi bādhiṣṭa sya rodasī mahitvendro vṛtrāṇy apratī jaghanvān ||

7.023.04a आपश्चित्पिप्यु स्तर्यो३ न गावो नक्षन्नृतं जरितारस्त इन्द्र ।

7.023.04c याहि वायुर्न नियुतो नो अच्छा त्वं हि धीभिर्दयसे वि वाजान् ॥

7.023.04a āpaś cit pipyu staryo3 na gāvo nakṣann ṛtaṁ jaritāras ta indra |
7.023.04c yāhi vāyur na niyuto no acchā tvaṁ hi dhībhir dayase vi vājān ||

7.023.05a ते त्वा मदा इन्द्र मादयन्तु शुष्मिणं तुविराधसं जरित्रे ।

7.023.05c एको देवत्रा दयसे हि मर्तानस्मिञ्छूर सवने मादयस्व ॥

7.023.05a te tvā madā indra mādayantu śuṣmiṇaṁ tuvirādhasaṁ jaritre |
7.023.05c eko devatrā dayase hi martān asmiñ chūra savane mādayasva ||

7.023.06a एवेदिन्द्रं वृषणं वज्रबाहुं वसिष्ठासो अभ्यर्चन्त्यर्कैः ।

7.023.06c स न स्तुतो वीरवद्धातु गोमद्यूयं पात स्वस्तिभिः सदा नः ॥

7.023.06a eved indraṁ vṛṣaṇaṁ vajrabāhuṁ vasiṣṭhāso abhy arcanty arkaiḥ |
7.023.06c sa na stuto vīravad dhātu gomad yūyam pāta svastibhiḥ sadā naḥ ||

7.024.01a योनिष्ट इन्द्र सदने अकारि तमा नृभिः पुरुहूत प्र याहि ।

7.024.01c असो यथा नोऽविता वृधे च ददो वसूनि ममदश्च सोमैः ॥

7.024.01a yoniṣ ṭa indra sadane akāri tam ā nṛbhiḥ puruhūta pra yāhi |
7.024.01c aso yathā no 'vitā vṛdhe ca dado vasūni mamadaś ca somaiḥ ||

7.024.02a गृभीतं ते मन इन्द्र द्विबर्हाः सुतः सोमः परिषिक्ता मधूनि ।

7.024.02c विसृष्टधेना भरते सुवृक्तिरियमिन्द्रं जोहुवती मनीषा ॥

7.024.02a gṛbhītaṁ te mana indra dvibarhāḥ sutaḥ somaḥ pariṣiktā madhūni |
7.024.02c visṛṣṭadhenā bharate suvṛktir iyam indraṁ johuvatī manīṣā ||

7.024.03a आ नो दिव आ पृथिव्या ऋजीषिन्निदं बर्हिः सोमपेयाय याहि ।

7.024.03c वहन्तु त्वा हरयो मद्र्यञ्चमाङ्गूषमच्छा तवसं मदाय ॥

7.024.03a ā no diva ā pṛthivyā ṛjīṣinn idam barhiḥ somapeyāya yāhi |
7.024.03c vahantu tvā harayo madryañcam āṅgūṣam acchā tavasam madāya ||

7.024.04a आ नो विश्वाभिरूतिभिः सजोषा ब्रह्म जुषाणो हर्यश्व याहि ।

7.024.04c वरीवृजत्स्थविरेभिः सुशिप्रास्मे दधद्वृषणं शुष्ममिन्द्र ॥

7.024.04a ā no viśvābhir ūtibhiḥ sajoṣā brahma juṣāṇo haryaśva yāhi |
7.024.04c varīvṛjat sthavirebhiḥ suśiprāsme dadhad vṛṣaṇaṁ śuṣmam indra ||

7.024.05a एष स्तोमो मह उग्राय वाहे धुरी३वात्यो न वाजयन्नधायि ।

7.024.05c इन्द्र त्वायमर्क ईट्टे वसूनां दिवीव द्यामधि नः श्रोमतं धाः ॥

7.024.05a eṣa stomo maha ugrāya vāhe dhurī3vātyo na vājayann adhāyi |
7.024.05c indra tvāyam arka iṭṭe vasūnāṁ divīva dyām adhi naḥ śromataṁ dhāḥ ||

7.024.06a एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।

7.024.06c इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥

7.024.06a evā na indra vāryasya pūrdhi pra te mahīṁ sumatiṁ vevidāma |
7.024.06c iṣam pinva maghavadbhyaḥ suvīrāṁ yūyam pāta svastibhiḥ sadā naḥ ||

7.025.01a आ ते मह इन्द्रोत्युग्र समन्यवो यत्समरन्त सेनाः ।

7.025.01c पताति दिद्युन्नर्यस्य बाह्वोर्मा ते मनो विष्वद्र्य१ग्वि चारीत् ॥

7.025.01a ā te maha indroty ugra samanyavo yat samaranta senāḥ |
7.025.01c patāti didyun naryasya bāhvor mā te mano viṣvadrya1g vi cārīt ||

7.025.02a नि दुर्ग इन्द्र श्नथिह्यमित्राँ अभि ये नो मर्तासो अमन्ति ।

7.025.02c आरे तं शंसं कृणुहि निनित्सोरा नो भर सम्भरणं वसूनाम् ॥

7.025.02a ni durga indra śnathihy amitrāṁ abhi ye no martāso amanti |
7.025.02c āre taṁ śaṁsaṁ kṛṇuhi ninitsor ā no bhara sambharaṇaṁ vasūnām ||

7.025.03a शतं ते शिप्रिन्नूतयः सुदासे सहस्रं शंसा उत रातिरस्तु ।

7.025.03c जहि वधर्वनुषो मर्त्यस्यास्मे द्युम्नमधि रत्नं च धेहि ॥

7.025.03a śataṁ te śiprinn ūtayaḥ sudāse sahasraṁ śaṁsā uta rātir astu |
7.025.03c jahi vadhar vanuṣo martyasyāsme dyumnam adhi ratnaṁ ca dhehi ||

7.025.04a त्वावतो हीन्द्र क्रत्वे अस्मि त्वावतोऽवितुः शूर रातौ ।

7.025.04c विश्वेदहानि तविषीव उग्रँ ओकः कृणुष्व हरिवो न मर्धीः ॥

7.025.04a tvāvato hīndra kratve asmi tvāvato 'vituḥ śūra rātau |
7.025.04c viśved ahāni taviṣīva ugram̐ okaḥ kṛṇuṣva harivo na mardhīḥ ||

7.025.05a कुत्सा एते हर्यश्वाय शूषमिन्द्रे सहो देवजूतमियानाः ।

7.025.05c सत्रा कृधि सुहना शूर वृत्रा वयं तरुत्राः सनुयाम वाजम् ॥

7.025.05a kutsā ete haryaśvāya śūṣam indre saho devajūtam iyānāḥ |
7.025.05c satrā kṛdhi suhanā śūra vṛtrā vayaṁ tarutrāḥ sanuyāma vājam ||

7.025.06a एवा न इन्द्र वार्यस्य पूर्धि प्र ते महीं सुमतिं वेविदाम ।

7.025.06c इषं पिन्व मघवद्भ्यः सुवीरां यूयं पात स्वस्तिभिः सदा नः ॥

7.025.06a evā na indra vāryasya pūrdhi pra te mahīṁ sumatiṁ vevidāma |
7.025.06c iṣam pinva maghavadbhyaḥ suvīrāṁ yūyam pāta svastibhiḥ sadā naḥ ||

7.026.01a न सोम इन्द्रमसुतो ममाद नाब्रह्माणो मघवानं सुतासः ।

7.026.01c तस्मा उक्थं जनये यज्जुजोषन्नृवन्नवीयः शृणवद्यथा नः ॥

7.026.01a na soma indram asuto mamāda nābrahmāṇo maghavānaṁ sutāsaḥ |
7.026.01c tasmā ukthaṁ janaye yaj jujoṣan nṛvan navīyaḥ śṛṇavad yathā naḥ ||

7.026.02a उक्थौक्थे सोम इन्द्रं ममाद नीथेनीथे मघवानं सुतासः ।

7.026.02c यदीं सबाधः पितरं न पुत्राः समानदक्षा अवसे हवन्ते ॥

7.026.02a uktha-ukthe soma indram mamāda nīthe-nīthe maghavānaṁ sutāsaḥ |
7.026.02c yad īṁ sabādhaḥ pitaraṁ na putrāḥ samānadakṣā avase havante ||

7.026.03a चकार ता कृणवन्नूनमन्या यानि ब्रुवन्ति वेधसः सुतेषु ।

7.026.03c जनीरिव पतिरेकः समानो नि मामृजे पुर इन्द्रः सु सर्वाः ॥

7.026.03a cakāra tā kṛṇavan nūnam anyā yāni bruvanti vedhasaḥ suteṣu |
7.026.03c janīr iva patir ekaḥ samāno ni māmṛje pura indraḥ su sarvāḥ ||

7.026.04a एवा तमाहुरुत शृण्व इन्द्र एको विभक्ता तरणिर्मघानाम् ।
7.026.04c मिथस्तुर ऊतयो यस्य पूर्वीरस्मे भद्राणि सश्चत प्रियाणि ॥

7.026.04a evā tam āhur uta śṛṇva indra eko vibhaktā taraṇir maghānām |
7.026.04c mithastura ūtayo yasya pūrvīr asme bhadrāṇi saścata priyāṇi ||

7.026.05a एवा वसिष्ठ इन्द्रमूतये नृन्कृष्टीनां वृषभं सुते गृणाति ।
7.026.05c सहस्रिण उप नो माहि वाजान्यूयं पात स्वस्तिभिः सदा नः ॥

7.026.05a evā vasiṣṭha indram ūtaye nṝn kṛṣṭīnām vṛṣabhaṁ sute gṛṇāti |
7.026.05c sahasriṇa upa no māhi vājān yūyam pāta svastibhiḥ sadā naḥ ||

7.027.01a इन्द्रं नरो नेमधिता हवन्ते यत्पार्या युनजते धियस्ताः ।
7.027.01c शूरो नृषाता शवसश्चकान आ गोमति व्रजे भजा त्वं नः ॥

7.027.01a indraṁ naro nemadhitā havante yat pāryā yunajate dhiyas tāḥ |
7.027.01c śūro nṛṣātā śavasaś cakāna ā gomati vraje bhajā tvaṁ naḥ ||

7.027.02a य इन्द्र शुष्मो मघवन्ते अस्ति शिक्षा सखिभ्यः पुरुहूत नृभ्यः ।
7.027.02c त्वं हि दृळ्हा मघवन्विचेता अपा वृधि परिवृतं न राधः ॥

7.027.02a ya indra śuṣmo maghavan te asti śikṣā sakhibhyaḥ puruhūta nṛbhyaḥ |
7.027.02c tvaṁ hi dṛḷhā maghavan vicetā apā vṛdhi parivṛtaṁ na rādhaḥ ||

7.027.03a इन्द्रो राजा जगतश्चर्षणीनामधि क्षमि विषुरूपं यदस्ति ।
7.027.03c ततो ददाति दाशुषे वसूनि चोदद्राध उपस्तुतश्चिदर्वाक् ॥

7.027.03a indro rājā jagataś carṣaṇīnām adhi kṣami viṣurūpaṁ yad asti |
7.027.03c tato dadāti dāśuṣe vasūni codad rādha upastutaś cid arvāk ||

7.027.04a नू चिन्न इन्द्रो मघवा सहूती दानो वाजं नि यमते न ऊती ।
7.027.04c अनूना यस्य दक्षिणा पीपाय वामं नृभ्यो अभिवीता सखिभ्यः ॥

7.027.04a nū cin na indro maghavā sahūtī dāno vājaṁ ni yamate na ūtī |
7.027.04c anūnā yasya dakṣiṇā pīpāya vāmaṁ nṛbhyo abhivītā sakhibhyaḥ ||

7.027.05a नू इन्द्र राये वरिवस्कृधी न आ ते मनो ववृत्याम मघाय ।

7.027.05c गोमदश्वावद्रथवद्व्यन्तो यूयं पात स्वस्तिभिः सदा नः ॥

7.027.05a nū indra rāye varivas kṛdhī na ā te mano vavṛtyāma maghāya |
7.027.05c gomad aśvāvad rathavad vyanto yūyam pāta svastibhiḥ sadā naḥ ||

7.028.01a ब्रह्मा ण इन्द्रोप याहि विद्वानर्वाञ्चस्ते हरयः सन्तु युक्ताः ।

7.028.01c विश्वे चिद्धि त्वा विहवन्त मर्ता अस्माकमिच्छृणुहि विश्वमिन्व ॥

7.028.01a brahmā ṇa indropa yāhi vidvān arvāñcas te harayaḥ santu yuktāḥ |
7.028.01c viśve cid dhi tvā vihavanta martā asmākam ic chṛṇuhi viśvaminva ||

7.028.02a हवं त इन्द्र महिमा व्यानड्ब्रह्म यत्पासि शवसिन्नृषीणाम् ।

7.028.02c आ यद्वज्रं दधिषे हस्त उग्र घोरः सन्क्रत्वा जनिष्ठा अषाळ्हः ॥

7.028.02a havaṁ ta indra mahimā vy ānaḍ brahma yat pāsi śavasinn ṛṣīṇām |
7.028.02c ā yad vajraṁ dadhiṣe hasta ugra ghoraḥ san kratvā janiṣṭhā aṣāḻhaḥ ||

7.028.03a तव प्रणीतीन्द्र जोहुवानान्सं यन्नॄन्न रोदसी निनेथ ।

7.028.03c महे क्षत्राय शवसे हि जज्ञेऽतूतुजिं चित्तूतुजिरशिश्नत् ॥

7.028.03a tava praṇītīndra johuvānān saṁ yan nṝn na rodasī ninetha |
7.028.03c mahe kṣatrāya śavase hi jajñe 'tūtujiṁ cit tūtujir aśiśnat ||

7.028.04a एभिर्न इन्द्राहभिर्दशस्य दुर्मित्रासो हि क्षितयः पवन्ते ।

7.028.04c प्रति यच्चष्टे अनृतमनेना अव द्विता वरुणो मायी नः सात् ॥

7.028.04a ebhir na indrāhabhir daśasya durmitrāso hi kṣitayaḥ pavante |
7.028.04c prati yac caṣṭe anṛtam anenā ava dvitā varuṇo māyī naḥ sāt ||

7.028.05a वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।

7.028.05c यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥

7.028.05a vocemed indram maghavānam enam maho rāyo rādhaso yad dadan naḥ |
7.028.05c yo arcato brahmakṛtim aviṣṭho yūyam pāta svastibhiḥ sadā naḥ ||

7.029.01a अयं सोम इन्द्र तुभ्यं सुन्व आ तु प्र याहि हरिवस्तदोकाः ।

7.029.01c पिबा त्व१स्य सुषुतस्य चारोर्ददो मघानि मघवन्नियानः ॥

7.029.01a ayaṁ soma indra tubhyaṁ sunva ā tu pra yāhi harivas tadokāḥ |
7.029.01c pibā tv a1sya suṣutasya cāror dado maghāni maghavann iyānaḥ ||

7.029.02a ब्रह्मन्वीर ब्रह्मकृतिं जुषाणोऽर्वाचीनो हरिभिर्याहि तूयम् ।

7.029.02c अस्मिन्नू षु सवने मादयस्वोप ब्रह्माणि शृणव इमा नः ॥

7.029.02a brahman vīra brahmakṛtiṁ juṣāṇo 'rvācīno haribhir yāhi tūyam |
7.029.02c asminn ū ṣu savane mādayasvopa brahmāṇi śṛṇava imā naḥ ||

7.029.03a का ते अस्त्यरंकृतिः सूक्तैः कदा नूनं ते मघवन्दाशेम ।

7.029.03c विश्वा मतीरा ततने त्वायाधा म इन्द्र शृणवो हवेमा ॥

7.029.03a kā te asty araṅkṛtiḥ sūktaiḥ kadā nūnaṁ te maghavan dāśema |
7.029.03c viśvā matīr ā tatane tvāyādhā ma indra śṛṇavo havemā ||

7.029.04a उतो घा ते पुरुष्या३ इदासन्येषां पूर्वेषामशृणोरृषीणाम् ।

7.029.04c अधाहं त्वा मघवञ्जोहवीमि त्वं न इन्द्रासि प्रमतिः पितेव ॥

7.029.04a uto ghā te puruṣyā3 id āsan yeṣām pūrveṣām aśṛṇor ṛṣīṇām |
7.029.04c adhāhaṁ tvā maghavañ johavīmi tvaṁ na indrāsi pramatiḥ piteva ||

7.029.05a वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।

7.029.05c यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥

7.029.05a vocemed indram maghavānam enam maho rāyo rādhaso yad dadan naḥ |
7.029.05c yo arcato brahmakṛtim aviṣṭho yūyam pāta svastibhiḥ sadā naḥ ||

7.030.01a आ नो देव शवसा याहि शुष्मिन्भवा वृध इन्द्र रायो अस्य ।

7.030.01c महे नृम्णाय नृपते सुवज्र महि क्षत्राय पौंस्याय शूर ॥

7.030.01a ā no deva śavasā yāhi śuṣmin bhavā vṛdha indra rāyo asya |
7.030.01c mahe nṛmṇāya nṛpate suvajra mahi kṣatrāya pauṁsyāya śūra ||

7.030.02a हवन्त उ त्वा हव्यं विवाचि तनूषु शूराः सूर्यस्य सातौ ।

7.030.02c त्वं विश्वेषु सेन्यो जनेषु त्वं वृत्राणि रन्धया सुहन्तु ॥

7.030.02a havanta u tvā havyaṁ vivāci tanūṣu śūrāḥ sūryasya sātau |
7.030.02c tvaṁ viśveṣu senyo janeṣu tvaṁ vṛtrāṇi randhayā suhantu ||

7.030.03a अहा यदिन्द्र सुदिना व्युच्छान्दधो यत्केतुमुपमं समत्सु ।

7.030.03c न्यग्निः सीददसुरो न होता हुवानो अत्र सुभगाय देवान् ॥

7.030.03a ahā yad indra sudinā vyucchān dadho yat ketum upamaṁ samatsu |
7.030.03c ny a1gniḥ sīdad asuro na hotā huvāno atra subhagāya devān ||

7.030.04a वयं ते त इन्द्र ये च देव स्तवन्त शूर ददतो मघानि ।

7.030.04c यच्छा सूरिभ्य उपमं वरूथं स्वाभुवो जरणामश्नवन्त ॥

7.030.04a vayaṁ te ta indra ye ca deva stavanta śūra dadato maghāni |
7.030.04c yacchā sūribhya upamaṁ varūthaṁ svābhuvo jaraṇām aśnavanta ||

7.030.05a वोचेमेदिन्द्रं मघवानमेनं महो रायो राधसो यद्ददन्नः ।

7.030.05c यो अर्चतो ब्रह्मकृतिमविष्ठो यूयं पात स्वस्तिभिः सदा नः ॥

7.030.05a vocemed indram maghavānam enam maho rāyo rādhaso yad dadan naḥ |
7.030.05c yo arcato brahmakṛtim aviṣṭho yūyam pāta svastibhiḥ sadā naḥ ||

7.031.01a प्र व इन्द्राय मादनं हर्यश्वाय गायत ।

7.031.01c सखायः सोमपाव्ने ॥

7.031.01a pra va indrāya mādanaṁ haryaśvāya gāyata |
7.031.01c sakhāyaḥ somapāvne ||

7.031.02a शंसेदुक्थं सुदानव उत द्युक्षं यथा नरः ।

7.031.02c चकृमा सत्यराधसे ॥

7.031.02a śaṁsed ukthaṁ sudānava uta dyukṣaṁ yathā naraḥ |
7.031.02c cakṛmā satyarādhase ||

7.031.03a त्वं न इन्द्र वाजयुस्त्वं गव्युः शतक्रतो ।

7.031.03c त्वं हिरण्ययुर्वसो ॥

7.031.03a tvaṁ na indra vājayus tvaṁ gavyuḥ śatakrato |
7.031.03c tvaṁ hiraṇyayur vaso ||

7.031.04a वयमिन्द्र त्वायवोऽभि प्र णोनुमो वृषन् ।
7.031.04c विद्धी त्व१स्य नो वसो ॥

7.031.04a vayam indra tvāyavo 'bhi pra ṇonumo vṛṣan |
7.031.04c viddhī tv a1sya no vaso ||

7.031.05a मा नो निदे च वक्तवेऽर्यो रन्धीरराव्णे ।
7.031.05c त्वे अपि क्रतुर्मम ॥

7.031.05a mā no nide ca vaktave 'ryo randhīr arāvṇe |
7.031.05c tve api kratur mama ||

7.031.06a त्वं वर्मासि सप्रथः पुरोयोधश्च वृत्रहन् ।
7.031.06c त्वया प्रति ब्रुवे युजा ॥

7.031.06a tvaṁ varmāsi saprathaḥ puroyodhaś ca vṛtrahan |
7.031.06c tvayā prati bruve yujā ||

7.031.07a महाँ उतासि यस्य तेऽनु स्वधावरी सहः ।
7.031.07c मम्नाते इन्द्र रोदसी ॥

7.031.07a mahām̐ utāsi yasya te 'nu svadhāvarī sahaḥ |
7.031.07c mamnāte indra rodasī ||

7.031.08a तं त्वा मरुत्वती परि भुवद्वाणी सयावरी ।
7.031.08c नक्षमाणा सह द्युभिः ॥

7.031.08a taṁ tvā marutvatī pari bhuvad vāṇī sayāvarī |
7.031.08c nakṣamāṇā saha dyubhiḥ ||

7.031.09a ऊर्ध्वासस्त्वान्विन्दवो भुवन्दस्ममुप द्यवि ।
7.031.09c सं ते नमन्त कृष्टयः ॥

7.031.09a ūrdhvāsas tvānv indavo bhuvan dasmam upa dyavi |
7.031.09c saṁ te namanta kṛṣṭayaḥ ||

7.031.10a प्र वो महे महिवृधे भरध्वं प्रचेतसे प्र सुमतिं कृणुध्वम् ।

7.031.10c विशः पूर्वीः प्र चरा चर्षणिप्राः ॥

7.031.10a  pra vo mahe mahivṛdhe bharadhvam pracetase pra sumatiṁ kṛṇudhvam |
7.031.10c  viśaḥ pūrvīḥ pra carā carṣaṇiprāḥ ||

7.031.11a उरुव्यचसे महिने सुवृक्तिमिन्द्राय ब्रह्म जनयन्त विप्राः ।

7.031.11c तस्य व्रतानि न मिनन्ति धीराः ॥

7.031.11a  uruvyacase mahine suvṛktim indrāya brahma janayanta viprāḥ |
7.031.11c  tasya vratāni na minanti dhīrāḥ ||

7.031.12a इन्द्रं वाणीरनुत्तमन्युमेव सत्रा राजानं दधिरे सहध्यै ।

7.031.12c हर्यश्वाय बर्हया समापीन् ॥

7.031.12a  indraṁ vāṇīr anuttamanyum eva satrā rājānaṁ dadhire sahadhyai |
7.031.12c  haryaśvāya barhayā sam āpīn ||

7.032.01a मो षु त्वा वाघतश्चनारे अस्मन्नि रीरमन् ।

7.032.01c आरात्ताच्चित्सधमादं न आ गहीह वा सन्नुप श्रुधि ॥

7.032.01a  mo ṣu tvā vāghataś canāre asman ni rīraman |
7.032.01c  ārāttāc cit sadhamādaṁ na ā gahīha vā sann upa śrudhi ||

7.032.02a इमे हि ते ब्रह्मकृतः सुते सचा मधौ न मक्ष आसते ।

7.032.02c इन्द्रे कामं जरितारो वसूयवो रथे न पादमा दधुः ॥

7.032.02a  ime hi te brahmakṛtaḥ sute sacā madhau na makṣa āsate |
7.032.02c  indre kāmaṁ jaritāro vasūyavo rathe na pādam ā dadhuḥ ||

7.032.03 रायस्कामो वज्रहस्तं सुदक्षिणं पुत्रो न पितरं हुवे ॥

7.032.03   rāyaskāmo vajrahastaṁ sudakṣiṇam putro na pitaraṁ huve ||

7.032.04a इम इन्द्राय सुन्विरे सोमासो दध्याशिरः ।

7.032.04c ताँ आ मदाय वज्रहस्त पीतये हरिभ्यां याह्योक आ ॥

7.032.04a  ima indrāya sunvire somāso dadhyāśiraḥ |

7.032.04c tām̐ ā madāya vajrahasta pītaye haribhyāṁ yāhy oka ā ||

7.032.05a श्रवच्छ्रुत्कर्ण ईयते वसूनां नू चिन्नो मर्धिषद्गिरः ।

7.032.05c सद्यश्चिद्यः सहस्राणि शता ददन्नकिर्दित्सन्तमा मिनत् ॥

7.032.05a śravac chrutkarṇa īyate vasūnāṁ nū cin no mardhiṣad giraḥ |
7.032.05c sadyaś cid yaḥ sahasrāṇi śatā dadan nakir ditsantam ā minat ||

7.032.06a स वीरो अप्रतिष्कुत इन्द्रेण शूशुवे नृभिः ।

7.032.06c यस्ते गभीरा सवनानि वृत्रहन्सुनोत्या च धावति ॥

7.032.06a sa vīro apratiṣkuta indreṇa śūśuve nṛbhiḥ |
7.032.06c yas te gabhīrā savanāni vṛtrahan sunoty ā ca dhāvati ||

7.032.07a भवा वरूथं मघवन्मघोनां यत्समजासि शर्धतः ।

7.032.07c वि त्वाहतस्य वेदनं भजेमह्या दूणाशो भरा गयम् ॥

7.032.07a bhavā varūtham maghavan maghonāṁ yat samajāsi śardhataḥ |
7.032.07c vi tvāhatasya vedanam bhajemahy ā dūṇāśo bharā gayam ||

7.032.08a सुनोता सोमपाव्ने सोममिन्द्राय वज्रिणे ।

7.032.08c पचता पक्तीरवसे कृणुध्वमित्पृणन्नित्पृणते मयः ॥

7.032.08a sunotā somapāvne somam indrāya vajriṇe |
7.032.08c pacatā paktīr avase kṛṇudhvam it pṛṇann it pṛṇate mayaḥ ||

7.032.09a मा स्रेधत सोमिनो दक्षता महे कृणुध्वं राय आतुजे ।

7.032.09c तरणिरिज्जयति क्षेति पुष्यति न देवासः कवत्नवे ॥

7.032.09a mā sredhata somino dakṣatā mahe kṛṇudhvaṁ rāya ātuje |
7.032.09c taraṇir ij jayati kṣeti puṣyati na devāsaḥ kavatnave ||

7.032.10a नकिः सुदासो रथं पर्यास न रीरमत् ।

7.032.10c इन्द्रो यस्याविता यस्य मरुतो गमत्स गोमति व्रजे ॥

7.032.10a nakiḥ sudāso ratham pary āsa na rīramat |
7.032.10c indro yasyāvitā yasya maruto gamat sa gomati vraje ||

7.032.11a गमद्वाजं वाजयन्निन्द्र मर्त्यो यस्य त्वमविता भुवः ।

7.032.11c अस्माकं बोध्यविता रथानामस्माकं शूर नृणाम् ॥

7.032.11a gamad vājaṁ vājayann indra martyo yasya tvam avitā bhuvaḥ |
7.032.11c asmākam bodhy avitā rathānām asmākaṁ śūra nṛṇām ||

7.032.12a उदिन्न्वस्य रिच्यतेऽंशो धनं न जिग्युषः ।

7.032.12c य इन्द्रो हरिवान्न दभन्ति तं रिपो दक्षं दधाति सोमिनि ॥

7.032.12a ud in nv asya ricyate 'ṁśo dhanaṁ na jigyuṣaḥ |
7.032.12c ya indro harivān na dabhanti taṁ ripo dakṣaṁ dadhāti somini ||

7.032.13a मन्त्रमखर्वं सुधितं सुपेशसं दधात यज्ञियेष्वा ।

7.032.13c पूर्वीश्चन प्रसितयस्तरन्ति तं य इन्द्रे कर्मणा भुवत् ॥

7.032.13a mantram akharvaṁ sudhitaṁ supeśasaṁ dadhāta yajñiyeṣv ā |
7.032.13c pūrvīś cana prasitayas taranti taṁ ya indre karmaṇā bhuvat ||

7.032.14a कस्तमिन्द्र त्वावसुमा मर्त्यो दधर्षति ।

7.032.14c श्रद्धा इत्ते मघवन्पार्ये दिवि वाजी वाजं सिषासति ॥

7.032.14a kas tam indra tvāvasum ā martyo dadharṣati |
7.032.14c śraddhā it te maghavan pārye divi vājī vājaṁ siṣāsati ||

7.032.15a मघोनः स्म वृत्रहत्येषु चोदय ये ददति प्रिया वसु ।

7.032.15c तव प्रणीती हर्यश्व सूरिभिर्विश्वा तरेम दुरिता ॥

7.032.15a maghonaḥ sma vṛtrahatyeṣu codaya ye dadati priyā vasu |
7.032.15c tava praṇītī haryaśva sūribhir viśvā tarema duritā ||

7.032.16a तवेदिन्द्रावमं वसु त्वं पुष्यसि मध्यमम् ।

7.032.16c सत्रा विश्वस्य परमस्य राजसि नकिष्ट्वा गोषु वृण्वते ॥

7.032.16a taved indrāvamaṁ vasu tvam puṣyasi madhyamam |
7.032.16c satrā viśvasya paramasya rājasi nakiṣ ṭvā goṣu vṛṇvate ||

7.032.17a त्वं विश्वस्य धनदा असि श्रुतो य ईं भवन्त्याजयः ।

7.032.17c तवायं विश्वः पुरुहूत पार्थिवोऽवस्युर्नाम भिक्षते ॥

7.032.17a tvaṁ viśvasya dhanadā asi śruto ya īm bhavanty ājayaḥ |

7.032.17c tavāyaṁ viśvaḥ puruhūta pārthivo 'vasyur nāma bhikṣate ||

7.032.18a यदिन्द्र यावतस्त्वमेतावदहमीशीय ।

7.032.18c स्तोतारमिद्दिधिषेय रदावसो न पापत्वाय रासीय ॥

7.032.18a yad indra yāvatas tvam etāvad aham īśīya |
7.032.18c stotāram id didhiṣeya radāvaso na pāpatvāya rāsīya ||

7.032.19a शिक्षेयमिन्महयते दिवेदिवे राय आ कुहचिद्विदे ।

7.032.19c नहि त्वदन्यन्मघवन्न आप्यं वस्यो अस्ति पिता चन ॥

7.032.19a śikṣeyam in mahayate dive-dive rāya ā kuhacidvide |
7.032.19c nahi tvad anyan maghavan na āpyaṁ vasyo asti pitā cana ||

7.032.20a तरणिरित्सिषासति वाजं पुरंध्या युजा ।

7.032.20c आ व इन्द्रं पुरुहूतं नमे गिरा नेमिं तष्टेव सुद्र्वम् ॥

7.032.20a taraṇir it siṣāsati vājam purandhyā yujā |
7.032.20c ā va indram puruhūtaṁ name girā nemiṁ taṣṭeva sudrvam ||

7.032.21a न दुष्टुती मर्त्यो विन्दते वसु न स्रेधन्तं रयिर्नशत् ।

7.032.21c सुशक्तिरिन्मघवन्तुभ्यं मावते देष्णं यत्पार्ये दिवि ॥

7.032.21a na duṣṭutī martyo vindate vasu na sredhantaṁ rayir naśat |
7.032.21c suśaktir in maghavan tubhyam māvate deṣṇaṁ yat pārye divi ||

7.032.22a अभि त्वा शूर नोनुमोऽदुग्धा इव धेनवः ।

7.032.22c ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः ॥

7.032.22a abhi tvā śūra nonumo 'dugdhā iva dhenavaḥ |
7.032.22c īśānam asya jagataḥ svardṛśam īśānam indra tasthuṣaḥ ||

7.032.23a न त्वावाँ अन्यो दिव्यो न पार्थिवो न जातो न जनिष्यते ।

7.032.23c अश्वायन्तो मघवन्निन्द्र वाजिनो गव्यन्तस्त्वा हवामहे ॥

7.032.23a na tvāvāṁ̐ anyo divyo na pārthivo na jāto na janiṣyate |
7.032.23c aśvāyanto maghavann indra vājino gavyantas tvā havāmahe ||

7.032.24a अभी षतस्तदा भरेन्द्र ज्यायः कनीयसः ।

7.032.24c पुरूवसुर्हि मघवन्सनादसि भरेभरे च हव्यः ॥

7.032.24a abhī ṣatas tad ā bharendra jyāyaḥ kanīyasaḥ |
7.032.24c purūvasur hi maghavan sanād asi bhare-bhare ca havyaḥ ||

7.032.25a परा णुदस्व मघवन्नमित्रान्सुवेदा नो वसू कृधि ।

7.032.25c अस्माकं बोध्यविता महाधने भवा वृधः सखीनाम् ॥

7.032.25a parā ṇudasva maghavann amitrān suvedā no vasū kṛdhi |
7.032.25c asmākam bodhy avitā mahādhane bhavā vṛdhaḥ sakhīnām ||

7.032.26a इन्द्र क्रतुं न आ भर पिता पुत्रेभ्यो यथा ।

7.032.26c शिक्षा णो अस्मिन्पुरुहूत यामनि जीवा ज्योतिरशीमहि ॥

7.032.26a indra kratuṁ na ā bhara pitā putrebhyo yathā |
7.032.26c śikṣā ṇo asmin puruhūta yāmani jīvā jyotir aśīmahi ||

7.032.27a मा नो अज्ञाता वृजना दुराध्यो३ माशिवासो अव क्रमुः ।

7.032.27c त्वया वयं प्रवतः शश्वतीरपोऽति शूर तरामसि ॥

7.032.27a mā no ajñātā vṛjanā durādhyo3 māśivāso ava kramuḥ |
7.032.27c tvayā vayam pravataḥ śaśvatīr apo 'ti śūra tarāmasi ||

7.033.01a श्वित्यञ्चो मा दक्षिणतस्कपर्दा धियंजिन्वासो अभि हि प्रमन्दुः ।

7.033.01c उत्तिष्ठन्वोचे परि बर्हिषो नॄन्न मे दूरादवितवे वसिष्ठाः ॥

7.033.01a śvityañco mā dakṣiṇataskapardā dhiyañjinvāso abhi hi pramanduḥ |
7.033.01c uttiṣṭhan voce pari barhiṣo nṝn na me dūrād avitave vasiṣṭhāḥ ||

7.033.02a दूरादिन्द्रमनयन्ना सुतेन तिरो वैशन्तमति पान्तमुग्रम् ।

7.033.02c पाशद्युम्नस्य वायतस्य सोमात्सुतादिन्द्रोऽवृणीता वसिष्ठान् ॥

7.033.02a dūrād indram anayann ā sutena tiro vaiśantam ati pāntam ugram |
7.033.02c pāśadyumnasya vāyatasya somāt sutād indro 'vṛṇītā vasiṣṭhān ||

7.033.03a एवेन्नु कं सिन्धुमेभिस्ततारेवेन्नु कं भेदमेभिर्जघान ।

7.033.03c एवेन्नु कं दाशराज्ञे सुदासं प्रावदिन्द्रो ब्रह्मणा वो वसिष्ठाः ॥

7.033.03a even nu kaṁ sindhum ebhis tatāreven nu kam bhedam ebhir jaghāna |
7.033.03c even nu kaṁ dāśarājñe sudāsam prāvad indro brahmaṇā vo vasiṣṭhāḥ ||

7.033.04a जुष्टी नरो ब्रह्मणा वः पितॄणामक्षमव्ययं न किला रिषाथ ।

7.033.04c यच्छक्वरीषु बृहता रवेणेन्द्रे शुष्ममदधाता वसिष्ठाः ॥

7.033.04a juṣṭī naro brahmaṇā vaḥ pitṝṇām akṣam avyayaṁ na kilā riṣātha |
7.033.04c yac chakvarīṣu bṛhatā raveṇendre śuṣmam adadhātā vasiṣṭhāḥ ||

7.033.05a उद्द्यामिवेत्तृष्णजो नाथितासोऽदीधयुर्दाशराज्ञे वृतासः ।

7.033.05c वसिष्ठस्य स्तुवत इन्द्रो अश्रोदुरुं तृत्सुभ्यो अकृणोदु लोकम् ॥

7.033.05a ud dyām ivet tṛṣṇajo nāthitāso 'dīdhayur dāśarājñe vṛtāsaḥ |
7.033.05c vasiṣṭhasya stuvata indro aśrod uruṁ tṛtsubhyo akṛṇod u lokam ||

7.033.06a दण्डा इवेद्गोअजनास आसन्परिच्छिन्ना भरता अर्भकासः ।

7.033.06c अभवच्च पुरएता वसिष्ठ आदित्तृत्सूनां विशो अप्रथन्त ॥

7.033.06a daṇḍā ived goajanāsa āsan paricchinnā bharatā arbhakāsaḥ |
7.033.06c abhavac ca puraetā vasiṣṭha ād it tṛtsūnāṁ viśo aprathanta ||

7.033.07a त्रयः कृण्वन्ति भुवनेषु रेतस्तिस्रः प्रजा आर्या ज्योतिरग्राः ।

7.033.07c त्रयो घर्मास उषसं सचन्ते सर्वाँ इत्ताँ अनु विदुर्वसिष्ठाः ॥

7.033.07a trayaḥ kṛṇvanti bhuvaneṣu retas tisraḥ prajā āryā jyotiragrāḥ |
7.033.07c trayo gharmāsa uṣasaṁ sacante sarvām̐ it tām̐ anu vidur vasiṣṭhāḥ ||

7.033.08a सूर्यस्येव वक्षथो ज्योतिरेषां समुद्रस्येव महिमा गभीरः ।

7.033.08c वातस्येव प्रजवो नान्येन स्तोमो वसिष्ठा अन्वेतवे वः ॥

7.033.08a sūryasyeva vakṣatho jyotir eṣāṁ samudrasyeva mahimā gabhīraḥ |
7.033.08c vātasyeva prajavo nānyena stomo vasiṣṭhā anvetave vaḥ ||

7.033.09a त इन्निण्यं हृदयस्य प्रकेतैः सहस्रवल्शमभि सं चरन्ति ।

7.033.09c यमेन ततं परिधिं वयन्तोऽप्सरस उप सेदुर्वसिष्ठाः ॥

7.033.09a ta in niṇyaṁ hṛdayasya praketaiḥ sahasravalśam abhi saṁ caranti |
7.033.09c yamena tatam paridhiṁ vayanto 'psarasa upa sedur vasiṣṭhāḥ ||

7.033.10a विद्युतो ज्योतिः परि संजिहानं मित्रावरुणा यदपश्यतां त्वा ।

7.033.10c तत्ते जन्मोतैकं वसिष्ठागस्त्यो यत्त्वा विश आजभार ॥

7.033.10a vidyuto jyotiḥ pari sañjihānam mitrāvaruṇā yad apaśyatāṁ tvā |
7.033.10c tat te janmotaikaṁ vasiṣṭhāgastyo yat tvā viśa ājabhāra ||

7.033.11a उतासि मैत्रावरुणो वसिष्ठोर्वश्या ब्रह्मन्मनसोऽधि जातः ।

7.033.11c द्रप्सं स्कन्नं ब्रह्मणा दैव्येन विश्वे देवाः पुष्करे त्वाददन्त ॥

7.033.11a utāsi maitrāvaruṇo vasiṣṭhorvaśyā brahman manaso 'dhi jātaḥ |
7.033.11c drapsaṁ skannam brahmaṇā daivyena viśve devāḥ puṣkare tvādadanta ||

7.033.12a स प्रकेत उभयस्य प्रविद्वान्सहस्रदान उत वा सदानः ।

7.033.12c यमेन ततं परिधिं वयिष्यन्नप्सरसः परि जज्ञे वसिष्ठः ॥

7.033.12a sa praketa ubhayasya pravidvān sahasradāna uta vā sadānaḥ |
7.033.12c yamena tatam paridhiṁ vayiṣyann apsarasaḥ pari jajñe vasiṣṭhaḥ ||

7.033.13a सत्रे ह जाताविषिता नमोभिः कुम्भे रेतः सिषिचतुः समानम् ।

7.033.13c ततो ह मान उदियाय मध्यात्ततो जातमृषिमाहुर्वसिष्ठम् ॥

7.033.13a satre ha jātāv iṣitā namobhiḥ kumbhe retaḥ siṣicatuḥ samānam |
7.033.13c tato ha māna ud iyāya madhyāt tato jātam ṛṣim āhur vasiṣṭham ||

7.033.14a उक्थभृतं सामभृतं बिभर्ति ग्रावाणं बिभ्रत्प्र वदात्यग्रे ।

7.033.14c उपैनमाध्वं सुमनस्यमाना आ वो गच्छाति प्रतृदो वसिष्ठः ॥

7.033.14a ukthabhṛtaṁ sāmabhṛtam bibharti grāvāṇam bibhrat pra vadāty agre |
7.033.14c upainam ādhvaṁ sumanasyamānā ā vo gacchāti pratṛdo vasiṣṭhaḥ ||

7.034.01 प्र शुक्रैतु देवी मनीषा अस्मत्सुतष्टो रथो न वाजी ॥

7.034.01 pra śukraitu devī manīṣā asmat sutaṣṭo ratho na vājī ||

7.034.02 विदुः पृथिव्या दिवो जनित्रं शृण्वन्त्यापो अध क्षरन्तीः ॥

7.034.02 viduḥ pṛthivyā divo janitraṁ śṛṇvanty āpo adha kṣarantīḥ ||

7.034.03 आपश्चिदस्मै पिन्वन्त पृथ्वीर्वृत्रेषु शूरा मंसन्त उग्राः ॥

7.034.03 āpa̍ś cid asmai̱ pinva̍nta pṛ̱thvīr vṛ̱treṣu̱ śūrā̱ maṁsa̍nta u̱grāḥ ||

7.034.04 आ धूर्ष्वस्मै दधाताश्वानिन्द्रो न वज्री हिरण्यबाहुः ॥

7.034.04 ā dhū̱rṣv a̍smai̱ dadhā̱tāśvā̱n indro̱ na va̱jrī hira̍ṇyabāhuḥ ||

7.034.05 अभि प्र स्थाताहेव यज्ञं यातेव पत्मन्त्मना हिनोत ॥

7.034.05 a̱bhi pra sthā̱tāhe̍va ya̱jñaṁ yāte̍va̱ patma̱n tmanā̍ hinota ||

7.034.06 त्मना समत्सु हिनोत यज्ञं दधात केतुं जनाय वीरम् ॥

7.034.06 tmanā̍ sa̱matsu̍ hi̱nota̍ ya̱jñaṁ dadhā̍ta ke̱tuṁ janā̍ya vī̱ram ||

7.034.07 उदस्य शुष्माद्भानुर्नार्त बिभर्ति भारं पृथिवी न भूम ॥

7.034.07 ud a̍sya̱ śuṣmā̍d bhā̱nur nārta̱ bibha̍rti bhā̱ram pṛ̍thi̱vī na bhūma̍ ||

7.034.08 ह्वयामि देवाँ अयातुरग्ने साधन्नृतेन धियं दधामि ॥

7.034.08 hvayā̍mi de̱vāṁ̐ ayā̍tur agne̱ sādha̍nn ṛ̱tena̱ dhiya̍ṁ dadhāmi ||

7.034.09 अभि वो देवीं धियं दधिध्वं प्र वो देवत्रा वाचं कृणुध्वम् ॥

7.034.09 a̱bhi vo̍ de̱vīṁ dhiya̍ṁ dadhidhva̱m pra vo̍ deva̱trā vāca̍ṁ kṛṇudhvam ||

7.034.10 आ चष्ट आसां पाथो नदीनां वरुण उग्रः सहस्रचक्षाः ॥

7.034.10 ā ca̍ṣṭa āsā̱m pātho̍ na̱dīnā̱ṁ varu̍ṇa u̱graḥ sa̱hasra̍cakṣāḥ ||

7.034.11 राजा राष्ट्रानां पेशो नदीनामनुत्तमस्मै क्षत्रं विश्वायु ॥

7.034.11 rājā̍ rā̱ṣṭrānā̱m peśo̍ na̱dīnā̱m anu̍ttam asmai kṣa̱traṁ vi̱śvāyu̍ ||

7.034.12 अविष्टो अस्मान्विश्वासु विक्ष्वद्युं कृणोत शंसं निनित्सोः ॥

7.034.12 avi̍ṣṭo a̱smān viśvā̍su vi̱kṣv adyu̍ṁ kṛṇota̱ śaṁsa̍ṁ nini̱tsoḥ ||

7.034.13 व्येतु दिद्युद्द्विषामशेवा युयोत विष्वग्रपस्तनूनाम् ॥

7.034.13 vy e̍tu di̱dyud dvi̱ṣām aśe̍vā yu̱yota̱ viṣva̱g rapa̍s ta̱nūnā̍m ||

7.034.14 अवीन्नो अग्निर्हव्यान्नमोभिः प्रेष्ठो अस्मा अधायि स्तोमः ॥

7.034.14 avī̍n no a̱gnir ha̱vyān namo̍bhi̱ḥ preṣṭho̍ asmā adhāyi̱ stoma̍ḥ ||

7.034.15 सजूर्देवेभिरपां नपातं सखायं कृध्वं शिवो नो अस्तु ॥

7.034.15 sa̱jūr de̱vebhi̍r a̱pāṁ napā̍ta̱ṁ sakhā̍yaṁ kṛdhvaṁ śi̱vo no̍ astu ||

7.034.16 अब्जामुक्थैरहिं गृणीषे बुध्ने नदीनां रजस्सु षीदन् ॥

7.034.16 abjām ukthair ahiṁ gṛṇīṣe budhne nadīnāṁ rajassu ṣīdan ||

7.034.17 मा नोऽहिर्बुध्न्यो रिषे धान्मा यज्ञो अस्य स्रिधदृतायोः ॥

7.034.17 mā no 'hir budhnyo riṣe dhān mā yajño asya sridhad ṛtāyoḥ ||

7.034.18 उत न एषु नृषु श्रवो धुः प्र राये यन्तु शर्धन्तो अर्यः ॥

7.034.18 uta na eṣu nṛṣu śravo dhuḥ pra rāye yantu śardhanto aryaḥ ||

7.034.19 तपन्ति शत्रुं स्व१र्ण भूमा महासेनासो अमेभिरेषाम् ॥

7.034.19 tapanti śatruṁ sva1r ṇa bhūmā mahāsenāso amebhir eṣām ||

7.034.20 आ यन्नः पत्नीर्गमन्त्यच्छा त्वष्टा सुपाणिर्दधातु वीरान् ॥

7.034.20 ā yan naḥ patnīr gamanty acchā tvaṣṭā supāṇir dadhātu vīrān ||

7.034.21 प्रति न स्तोमं त्वष्टा जुषेत स्यादस्मे अरमतिर्वसूयुः ॥

7.034.21 prati na stomaṁ tvaṣṭā juṣeta syād asme aramatir vasūyuḥ ||

7.034.22a ता नो रासन्रातिषाचो वसून्या रोदसी वरुणानी शृणोतु ।

7.034.22c वरूत्रीभिः सुशरणो नो अस्तु त्वष्टा सुदत्रो वि दधातु रायः ॥

7.034.22a tā no rāsan rātiṣāco vasūny ā rodasī varuṇānī śṛṇotu |
7.034.22c varūtrībhiḥ suśaraṇo no astu tvaṣṭā sudatro vi dadhātu rāyaḥ ||

7.034.23a तन्नो रायः पर्वतास्तन्न आपस्तद्रातिषाच ओषधीरुत द्यौः ।

7.034.23c वनस्पतिभिः पृथिवी सजोषा उभे रोदसी परि पासतो नः ॥

7.034.23a tan no rāyaḥ parvatās tan na āpas tad rātiṣāca oṣadhīr uta dyauḥ |
7.034.23c vanaspatibhiḥ pṛthivī sajoṣā ubhe rodasī pari pāsato naḥ ||

7.034.24a अनु तदुर्वी रोदसी जिहातामनु द्युक्षो वरुण इन्द्रसखा ।

7.034.24c अनु विश्वे मरुतो ये सहासो रायः स्याम धरुणं धियध्यै ॥

7.034.24a anu tad urvī rodasī jihātām anu dyukṣo varuṇa indrasakhā |
7.034.24c anu viśve maruto ye sahāso rāyaḥ syāma dharuṇaṁ dhiyadhyai ||

7.034.25a तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।

7.034.25c शर्मन्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥

7.034.25a tan na indro varuṇo mitro agnir āpa oṣadhīr vanino juṣanta |
7.034.25c śarman syāma marutām upasthe yūyam pāta svastibhiḥ sadā naḥ ||

7.035.01a शं न इन्द्राग्नी भवतामवोभिः शं न इन्द्रावरुणा रातहव्या ।

7.035.01c शमिन्द्रासोमा सुविताय शं योः शं न इन्द्रापूषणा वाजसातौ ॥

7.035.01a śaṁ na indrāgnī bhavatām avobhiḥ śaṁ na indrāvaruṇā rātahavyā |
7.035.01c śam indrāsomā suvitāya śaṁ yoḥ śaṁ na indrāpūṣaṇā vājasātau ||

7.035.02a शं नो भगः शमु नः शंसो अस्तु शं नः पुरंधिः शमु सन्तु रायः ।

7.035.02c शं नः सत्यस्य सुयमस्य शंसः शं नो अर्यमा पुरुजातो अस्तु ॥

7.035.02a śaṁ no bhagaḥ śam u naḥ śaṁso astu śaṁ naḥ purandhiḥ śam u santu rāyaḥ |
7.035.02c śaṁ naḥ satyasya suyamasya śaṁsaḥ śaṁ no aryamā purujāto astu ||

7.035.03a शं नो धाता शमु धर्ता नो अस्तु शं न उरूची भवतु स्वधाभिः ।

7.035.03c शं रोदसी बृहती शं नो अद्रिः शं नो देवानां सुहवानि सन्तु ॥

7.035.03a śaṁ no dhātā śam u dhartā no astu śaṁ na urūcī bhavatu svadhābhiḥ |
7.035.03c śaṁ rodasī bṛhatī śaṁ no adriḥ śaṁ no devānāṁ suhavāni santu ||

7.035.04a शं नो अग्निर्ज्योतिरनीको अस्तु शं नो मित्रावरुणावश्विना शम् ।

7.035.04c शं नः सुकृतां सुकृतानि सन्तु शं न इषिरो अभि वातु वातः ॥

7.035.04a śaṁ no agnir jyotiranīko astu śaṁ no mitrāvaruṇāv aśvinā śam |
7.035.04c śaṁ naḥ sukṛtāṁ sukṛtāni santu śaṁ na iṣiro abhi vātu vātaḥ ||

7.035.05a शं नो द्यावापृथिवी पूर्वहूतौ शमन्तरिक्षं दृशये नो अस्तु ।

7.035.05c शं न ओषधीर्वनिनो भवन्तु शं नो रजसस्पतिरस्तु जिष्णुः ॥

7.035.05a śaṁ no dyāvāpṛthivī pūrvahūtau śam antarikṣaṁ dṛśaye no astu |
7.035.05c śaṁ na oṣadhīr vanino bhavantu śaṁ no rajasas patir astu jiṣṇuḥ ||

7.035.06a शं न इन्द्रो वसुभिर्देवो अस्तु शमादित्येभिर्वरुणः सुशंसः ।

7.035.06c शं नो रुद्रो रुद्रेभिर्जलाषः शं नस्त्वष्टा ग्नाभिरिह शृणोतु ॥

7.035.06a śaṁ na indro vasubhir devo astu śam ādityebhir varuṇaḥ suśaṁsaḥ |
7.035.06c śaṁ no rudro rudrebhir jalāṣaḥ śaṁ nas tvaṣṭā gnābhir iha śṛṇotu ||

7.035.07a शं नः सोमो भवतु ब्रह्म शं नः शं नो ग्रावाणः शमु सन्तु यज्ञाः ।

7.035.07c शं नः स्वरूणां मितयो भवन्तु शं नः प्रस्व१ः शम्वस्तु वेदिः ॥

7.035.07a śaṁ naḥ somo bhavatu brahma śaṁ naḥ śaṁ no grāvāṇaḥ śam u santu yajñāḥ |
7.035.07c śaṁ naḥ svarūṇām mitayo bhavantu śaṁ naḥ prasva1ḥ śam v astu vediḥ ||

7.035.08a शं नः सूर्य उरुचक्षा उदेतु शं नश्चतस्रः प्रदिशो भवन्तु ।

7.035.08c शं नः पर्वता ध्रुवयो भवन्तु शं नः सिन्धवः शमु सन्त्वापः ॥

7.035.08a śaṁ naḥ sūrya urucakṣā ud etu śaṁ naś catasraḥ pradiśo bhavantu |
7.035.08c śaṁ naḥ parvatā dhruvayo bhavantu śaṁ naḥ sindhavaḥ śam u santv āpaḥ ||

7.035.09a शं नो अदितिर्भवतु व्रतेभिः शं नो भवन्तु मरुतः स्वर्काः ।

7.035.09c शं नो विष्णुः शमु पूषा नो अस्तु शं नो भवित्रं शम्वस्तु वायुः ॥

7.035.09a śaṁ no aditir bhavatu vratebhiḥ śaṁ no bhavantu marutaḥ svarkāḥ |
7.035.09c śaṁ no viṣṇuḥ śam u pūṣā no astu śaṁ no bhavitraṁ śam v astu vāyuḥ ||

7.035.10a शं नो देवः सविता त्रायमाणः शं नो भवन्तूषसो विभातीः ।

7.035.10c शं नः पर्जन्यो भवतु प्रजाभ्यः शं नः क्षेत्रस्य पतिरस्तु शम्भुः ॥

7.035.10a śaṁ no devaḥ savitā trāyamāṇaḥ śaṁ no bhavantūṣaso vibhātīḥ |
7.035.10c śaṁ naḥ parjanyo bhavatu prajābhyaḥ śaṁ naḥ kṣetrasya patir astu śambhuḥ ||

7.035.11a शं नो देवा विश्वदेवा भवन्तु शं सरस्वती सह धीभिरस्तु ।

7.035.11c शमभिषाचः शमु रातिषाचः शं नो दिव्याः पार्थिवाः शं नो अप्याः ॥

7.035.11a śaṁ no devā viśvadevā bhavantu śaṁ sarasvatī saha dhībhir astu |
7.035.11c śam abhiṣācaḥ śam u rātiṣācaḥ śaṁ no divyāḥ pārthivāḥ śaṁ no apyāḥ ||

7.035.12a शं नः सत्यस्य पतयो भवन्तु शं नो अर्वन्तः शमु सन्तु गावः ।

7.035.12c शं न ऋभवः सुकृतः सुहस्ताः शं नो भवन्तु पितरो हवेषु ॥

7.035.12a śaṁ naḥ satyasya patayo bhavantu śaṁ no arvantaḥ śam u santu gāvaḥ |
7.035.12c śaṁ na ṛbhavaḥ sukṛtaḥ suhastāḥ śaṁ no bhavantu pitaro haveṣu ||

7.035.13a शं नो अज एकपाद्देवो अस्तु शं नोऽहिर्बुध्न्य१ः शं समुद्रः ।

7.035.13c शं नो अपां नपात्पेरुरस्तु शं नः पृश्निर्भवतु देवगोपा ॥

7.035.13a śaṁ no aja ekapād devo astu śaṁ no 'hir budhnya1ḥ śaṁ samudraḥ |
7.035.13c śaṁ no apāṁ napāt perur astu śaṁ naḥ pṛśnir bhavatu devagopā ||

7.035.14a आदित्या रुद्रा वसवो जुषन्तेदं ब्रह्म क्रियमाणं नवीयः ।

7.035.14c शृण्वन्तु नो दिव्याः पार्थिवासो गोजाता उत ये यज्ञियासः ॥

7.035.14a ādityā rudrā vasavo juṣantedam brahma kriyamāṇaṁ navīyaḥ |
7.035.14c śṛṇvantu no divyāḥ pārthivāso gojātā uta ye yajñiyāsaḥ ||

7.035.15a ये देवानां यज्ञिया यज्ञियानां मनोर्यजत्रा अमृता ऋतज्ञाः ।

7.035.15c ते नो रासन्तामुरुगायमद्य यूयं पात स्वस्तिभिः सदा नः ॥

7.035.15a ye devānāṁ yajñiyā yajñiyānām manor yajatrā amṛtā ṛtajñāḥ |
7.035.15c te no rāsantām urugāyam adya yūyam pāta svastibhiḥ sadā naḥ ||

7.036.01a प्र ब्रह्मैतु सदनादृतस्य वि रश्मिभिः ससृजे सूर्यो गाः ।

7.036.01c वि सानुना पृथिवी सस्र उर्वी पृथु प्रतीकमध्येधे अग्निः ॥

7.036.01a pra brahmaitu sadanād ṛtasya vi raśmibhiḥ sasṛje sūryo gāḥ |
7.036.01c vi sānunā pṛthivī sasra urvī pṛthu pratīkam adhy edhe agniḥ ||

7.036.02a इमां वां मित्रावरुणा सुवृक्तिमिषं न कृण्वे असुरा नवीयः ।

7.036.02c इनो वामन्यः पदवीरदब्धो जनं च मित्रो यतति ब्रुवाणः ॥

7.036.02a imāṁ vām mitrāvaruṇā suvṛktim iṣaṁ na kṛṇve asurā navīyaḥ |
7.036.02c ino vām anyaḥ padavīr adabdho janaṁ ca mitro yatati bruvāṇaḥ ||

7.036.03a आ वातस्य ध्रजतो रन्त इत्या अपीपयन्त धेनवो न सूदाः ।

7.036.03c महो दिवः सदने जायमानोऽचिक्रदद्वृषभः सस्मिन्नूधन् ॥

7.036.03a ā vātasya dhrajato ranta ityā apīpayanta dhenavo na sūdāḥ |
7.036.03c maho divaḥ sadane jāyamāno 'cikradad vṛṣabhaḥ sasminn ūdhan ||

7.036.04a गिरा य एता युनजद्धरी त इन्द्र प्रिया सुरथा शूर धायू ।

7.036.04c प्र यो मन्युं रिरिक्षतो मिनात्या सुक्रतुमर्यमणं ववृत्याम् ॥

7.036.04a girā ya etā yunajad dharī ta indra priyā surathā śūra dhāyū |
7.036.04c pra yo manyuṁ ririkṣato mināty ā sukratum aryamaṇaṁ vavṛtyām ||

7.036.05a यजन्ते अस्य सख्यं वयश्च नमस्विनः स्व ऋतस्य धामन् ।

7.036.05c वि पृक्षो बाबधे नृभि स्तवान इदं नमो रुद्राय प्रेष्ठम् ॥

7.036.05a yajante asya sakhyaṁ vayaś ca namasvinaḥ sva ṛtasya dhāman |
7.036.05c vi pṛkṣo bābadhe nṛbhi stavāna idaṁ namo rudrāya preṣṭham ||

7.036.06a आ यत्साकं यशसो वावशानाः सरस्वती सप्तथी सिन्धुमाता ।

7.036.06c याः सुष्वयन्त सुदुघाः सुधारा अभि स्वेन पयसा पीप्यानाः ॥

7.036.06a ā yat sākaṁ yaśaso vāvaśānāḥ sarasvatī saptathī sindhumātā |
7.036.06c yāḥ suṣvayanta sudughāḥ sudhārā abhi svena payasā pīpyānāḥ ||

7.036.07a उत त्ये नो मरुतो मन्दसाना धियं तोकं च वाजिनोऽवन्तु ।

7.036.07c मा नः परि ख्यदक्षरा चरन्त्यवीवृधन्युज्यं ते रयिं नः ॥

7.036.07a uta tye no maruto mandasānā dhiyaṁ tokaṁ ca vājino 'vantu |
7.036.07c mā naḥ pari khyad akṣarā caranty avīvṛdhan yujyaṁ te rayiṁ naḥ ||

7.036.08a प्र वो महीमरमतिं कृणुध्वं प्र पूषणं विदथ्यं१ न वीरम् ।

7.036.08c भगं धियोऽवितारं नो अस्याः सातौ वाजं रातिषाचं पुरंधिम् ॥

7.036.08a pra vo mahīm aramatiṁ kṛṇudhvam pra pūṣaṇaṁ vidathyaṁ1 na vīram |
7.036.08c bhagaṁ dhiyo 'vitāraṁ no asyāḥ sātau vājaṁ rātiṣācam purandhim ||

7.036.09a अच्छायं वो मरुतः श्लोक एत्वच्छा विष्णुं निषिक्तपामवोभिः ।

7.036.09c उत प्रजायै गृणते वयो धुर्यूयं पात स्वस्तिभिः सदा नः ॥

7.036.09a acchāyaṁ vo marutaḥ śloka etv acchā viṣṇuṁ niṣiktapām avobhiḥ |
7.036.09c uta prajāyai gṛṇate vayo dhur yūyam pāta svastibhiḥ sadā naḥ ||

7.037.01a आ वो वाहिष्ठो वहतु स्तवध्यै रथो वाजा ऋभुक्षणो अमृक्तः ।

7.037.01c अभि त्रिपृष्ठैः सवनेषु सोमैर्मदे सुशिप्रा महभिः पृणध्वम् ॥

7.037.01a ā vo vāhiṣṭho vahatu stavadhyai ratho vājā ṛbhukṣaṇo amṛktaḥ |
7.037.01c abhi tripṛṣṭhaiḥ savaneṣu somair made suśiprā mahabhiḥ pṛṇadhvam ||

7.037.02a यूयं ह रत्नं मघवत्सु धत्थ स्वर्दृश ऋभुक्षणो अमृक्तम् ।

7.037.02c सं यज्ञेषु स्वधावन्तः पिबध्वं वि नो राधांसि मतिभिर्दयध्वम् ॥

7.037.02a yūyaṁ ha ratnam maghavatsu dhattha svardṛśa ṛbhukṣaṇo amṛktam |
7.037.02c saṁ yajñeṣu svadhāvantaḥ pibadhvaṁ vi no rādhāṁsi matibhir dayadhvam ||

7.037.03a उवोचिथ हि मघवन्देष्णं महो अर्भस्य वसुनो विभागे ।

7.037.03c उभा ते पूर्णा वसुना गभस्ती न सूनृता नि यमते वसव्या ॥

7.037.03a uvocitha hi maghavan deṣṇam maho arbhasya vasuno vibhāge |
7.037.03c ubhā te pūrṇā vasunā gabhastī na sūnṛtā ni yamate vasavyā ||

7.037.04a त्वमिन्द्र स्वयशा ऋभुक्षा वाजो न साधुरस्तमेष्यृक्वा ।

7.037.04c वयं नु ते दाश्वांसः स्याम ब्रह्म कृण्वन्तो हरिवो वसिष्ठाः ॥

7.037.04a tvam indra svayaśā ṛbhukṣā vājo na sādhur astam eṣy ṛkvā |
7.037.04c vayaṁ nu te dāśvāṁsaḥ syāma brahma kṛṇvanto harivo vasiṣṭhāḥ ||

7.037.05a सनितासि प्रवतो दाशुषे चिद्याभिर्विवेषो हर्यश्व धीभिः ।

7.037.05c ववन्मा नु ते युज्याभिरूती कदा न इन्द्र राय आ दशस्येः ॥

7.037.05a sanitāsi pravato dāśuṣe cid yābhir viveṣo haryaśva dhībhiḥ |
7.037.05c vavanmā nu te yujyābhir ūtī kadā na indra rāya ā daśasyeḥ ||

7.037.06a वासयसीव वेधसस्त्वं नः कदा न इन्द्र वचसो बुबोधः ।

7.037.06c अस्तं तात्या धिया रयिं सुवीरं पृक्षो नो अर्वा न्युहीत वाजी ॥

7.037.06a vāsayasīva vedhasas tvaṁ naḥ kadā na indra vacaso bubodhaḥ |
7.037.06c astaṁ tātyā dhiyā rayiṁ suvīram pṛkṣo no arvā ny uhīta vājī ||

7.037.07a अभि यं देवी निर्ऋतिश्चिदीशे नक्षन्त इन्द्रं शरदः सुपृक्षः ।

7.037.07c उप त्रिबन्धुर्जरदष्टिमेत्यस्ववेशं यं कृणवन्त मर्ताः ॥

7.037.07a abhi yaṁ devī nirṛtiś cid īśe nakṣanta indraṁ śaradaḥ supṛkṣaḥ |
7.037.07c upa tribandhur jaradaṣṭim ety asvaveśaṁ yaṁ kṛṇavanta martāḥ ||

7.037.08a आ नो राधांसि सवित स्तवध्या आ रायो यन्तु पर्वतस्य रातौ ।

7.037.08c सदा नो दिव्यः पायुः सिषक्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.037.08a ā no rādhāṁsi savita stavadhyā ā rāyo yantu parvatasya rātau |
7.037.08c sadā no divyaḥ pāyuḥ siṣaktu yūyam pāta svastibhiḥ sadā naḥ ||

7.038.01a उदु ष्य देवः सविता ययाम हिरण्ययीममतिं यामशिश्रेत् ।

7.038.01c नूनं भगो हव्यो मानुषेभिर्वि यो रत्ना पुरूवसुर्दधाति ॥

7.038.01a ud u ṣya devaḥ savitā yayāma hiraṇyayīm amatiṁ yām aśiśret |
7.038.01c nūnam bhago havyo mānuṣebhir vi yo ratnā purūvasur dadhāti ||

7.038.02a उदु तिष्ठ सवितः श्रुध्य१स्य हिरण्यपाणे प्रभृतावृतस्य ।

7.038.02c व्यु१र्वीं पृथ्वीममतिं सृजान आ नृभ्यो मर्तभोजनं सुवानः ॥

7.038.02a ud u tiṣṭha savitaḥ śrudhy a1sya hiraṇyapāṇe prabhṛtāv ṛtasya |
7.038.02c vy u1rvīm pṛthvīm amatiṁ sṛjāna ā nṛbhyo martabhojanaṁ suvānaḥ ||

7.038.03a अपि ष्टुतः सविता देवो अस्तु यमा चिद्विश्वे वसवो गृणन्ति ।

7.038.03c स न स्तोमान्नमस्य१श्चनो धाद्विश्वेभिः पातु पायुभिर्नि सूरीन् ॥

7.038.03a api ṣṭutaḥ savitā devo astu yam ā cid viśve vasavo gṛṇanti |
7.038.03c sa na stomān namasya1ś cano dhād viśvebhiḥ pātu pāyubhir ni sūrīn ||

7.038.04a अभि यं देव्यदितिर्गृणाति सवं देवस्य सवितुर्जुषाणा ।

7.038.04c अभि सम्राजो वरुणो गृणन्त्यभि मित्रासो अर्यमा सजोषाः ॥

7.038.04a abhi yaṁ devy aditir gṛṇāti savaṁ devasya savitur juṣāṇā |
7.038.04c abhi samrājo varuṇo gṛṇanty abhi mitrāso aryamā sajoṣāḥ ||

7.038.05a अभि ये मिथो वनुषः सपन्ते रातिं दिवो रातिषाचः पृथिव्याः ।

7.038.05c अहिर्बुध्न्य उत नः शृणोतु वरूत्र्येकधेनुभिर्नि पातु ॥

7.038.05a abhi ye mitho vanuṣaḥ sapante rātiṁ divo rātiṣācaḥ pṛthivyāḥ |
7.038.05c ahir budhnya uta naḥ śṛṇotu varūtry ekadhenubhir ni pātu ||

7.038.06a अनु तन्नो जास्पतिर्मंसीष्ट रत्नं देवस्य सवितुरियानः ।

7.038.06c भगमुग्रोऽवसे जोहवीति भगमनुग्रो अध याति रत्नम् ॥

7.038.06a anu tan no jāspatir maṁsīṣṭa ratnaṁ devasya savitur iyānaḥ |
7.038.06c bhagam ugro 'vase johavīti bhagam anugro adha yāti ratnam ||

7.038.07a शं नो भवन्तु वाजिनो हवेषु देवताता मितद्रवः स्वर्काः ।

7.038.07c जम्भयन्तोऽहिं वृकं रक्षांसि सनेम्यस्मद्युयवन्नमीवाः ॥

7.038.07a śaṁ no bhavantu vājino haveṣu devatātā mitadravaḥ svarkāḥ |
7.038.07c jambhayanto 'hiṁ vṛkaṁ rakṣāṁsi sanemy asmad yuyavann amīvāḥ ||

7.038.08a वाजेवाजेऽवत वाजिनो नो धनेषु विप्रा अमृता ऋतज्ञाः ।

7.038.08c अस्य मध्वः पिबत मादयध्वं तृप्ता यात पथिभिर्देवयानैः ॥

7.038.08a vāje-vāje 'vata vājino no dhaneṣu viprā amṛtā ṛtajñāḥ |
7.038.08c asya madhvaḥ pibata mādayadhvaṁ tṛptā yāta pathibhir devayānaiḥ ||

7.039.01a ऊर्ध्वो अग्निः सुमतिं वस्वो अश्रेत्प्रतीची जूर्णिर्देवतातिमेति ।

7.039.01c भेजाते अद्री रथ्येव पन्थामृतं होता न इषितो यजाति ॥

7.039.01a ūrdhvo agniḥ sumatiṁ vasvo aśret pratīcī jūrṇir devatātim eti |
7.039.01c bhejāte adrī rathyeva panthām ṛtaṁ hotā na iṣito yajāti ||

7.039.02a प्र वावृजे सुप्रया बर्हिरेषामा विश्पतीव बीरिट इयाते ।

7.039.02c विशामक्तोरुषसः पूर्वहूतौ वायुः पूषा स्वस्तये नियुत्वान् ॥

7.039.02a pra vāvṛje suprayā barhir eṣām ā viśpatīva bīriṭa iyāte |
7.039.02c viśām aktor uṣasaḥ pūrvahūtau vāyuḥ pūṣā svastaye niyutvān ||

7.039.03a ज्मया अत्र वसवो रन्त देवा उरावन्तरिक्षे मर्जयन्त शुभ्राः ।

7.039.03c अर्वाक्पथ उरुज्रयः कृणुध्वं श्रोता दूतस्य जग्मुषो नो अस्य ॥

7.039.03a jmayā atra vasavo ranta devā urāv antarikṣe marjayanta śubhrāḥ |
7.039.03c arvāk patha urujrayaḥ kṛṇudhvaṁ śrotā dūtasya jagmuṣo no asya ||

7.039.04a ते हि यज्ञेषु यज्ञियास ऊमाः सधस्थं विश्वे अभि सन्ति देवाः ।

7.039.04c ताँ अध्वर उशतो यक्ष्यग्ने श्रुष्टी भगं नासत्या पुरंधिम् ॥

7.039.04a te hi yajñeṣu yajñiyāsa ūmāḥ sadhasthaṁ viśve abhi santi devāḥ |

7.039.04c tām̐ adhvara uśato yakṣy agne śruṣṭī bhagaṁ nāsatyā purandhim ||

7.039.05a आग्ने गिरो दिव आ पृथिव्या मित्रं वह वरुणमिन्द्रमग्निम् ।

7.039.05c आर्यमणमदितिं विष्णुमेषां सरस्वती मरुतो मादयन्ताम् ॥

7.039.05a āgne giro diva ā pṛthivyā mitraṁ vaha varuṇam indram agnim |

7.039.05c āryamaṇam aditiṁ viṣṇum eṣāṁ sarasvatī maruto mādayantām ||

7.039.06a ररे हव्यं मतिभिर्यज्ञियानां नक्षत्कामं मर्त्यानामसिन्वन् ।

7.039.06c धाता रयिमविदस्यं सदासां सक्षीमहि युज्येभिर्नु देवैः ॥

7.039.06a rare havyam matibhir yajñiyānāṁ nakṣat kāmam martyānām asinvan |

7.039.06c dhātā rayim avidasyaṁ sadāsāṁ sakṣīmahi yujyebhir nu devaiḥ ||

7.039.07a नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।

7.039.07c यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥

7.039.07a nū rodasī abhiṣṭute vasiṣṭhair ṛtāvāno varuṇo mitro agniḥ |

7.039.07c yacchantu candrā upamaṁ no arkaṁ yūyam pāta svastibhiḥ sadā naḥ ||

7.040.01a ओ श्रुष्टिर्विदथ्या३ समेतु प्रति स्तोमं दधीमहि तुराणाम् ।

7.040.01c यदद्य देवः सविता सुवाति स्यामास्य रत्निनो विभागे ॥

7.040.01a o śruṣṭir vidathyā3 sam etu prati stomaṁ dadhīmahi turāṇām |

7.040.01c yad adya devaḥ savitā suvāti syāmāsya ratnino vibhāge ||

7.040.02a मित्रस्तन्नो वरुणो रोदसी च द्युभक्तमिन्द्रो अर्यमा ददातु ।

7.040.02c दिदेष्टु देव्यदिती रेक्णो वायुश्च यन्नियुवैते भगश्च ॥

7.040.02a mitras tan no varuṇo rodasī ca dyubhaktam indro aryamā dadātu |

7.040.02c dideṣṭu devy aditī rekṇo vāyuś ca yan niyuvaite bhagaś ca ||

7.040.03a सेदुग्रो अस्तु मरुतः स शुष्मी यं मर्त्यं पृषदश्वा अवाथ ।

7.040.03c उतेमग्निः सरस्वती जुनन्ति न तस्य रायः पर्येतास्ति ॥

7.040.03a sed ugro astu marutaḥ sa śuṣmī yam martyam pṛṣadaśvā avātha |

7.040.03c utem agniḥ sarasvatī junanti na tasya rāyaḥ paryetāsti ||

7.040.04a अयं हि नेता वरुण ऋतस्य मित्रो राजानो अर्यमापो धुः ।

7.040.04c सुहवा देव्यदितिरनर्वा ते नो अंहो अति पर्षन्नरिष्टान् ॥

7.040.04a a̱yaṁ hi ne̱tā varu̍ṇa ṛ̱tasya̍ mi̱tro rājā̍no arya̱māpo̱ dhuḥ |
7.040.04c su̱havā̍ de̱vy aditi̍r ana̱rvā te no̱ aṁho̱ ati̍ parṣa̱nn ari̍ṣṭān ||

7.040.05a अस्य देवस्य मीळ्हुषो वया विष्णोरेषस्य प्रभृथे हविर्भिः ।

7.040.05c विदे हि रुद्रो रुद्रियं महित्वं यासिष्टं वर्तिरश्विनाविरावत् ॥

7.040.05a a̱sya de̱vasya̍ mī̱ḻhuṣo̍ va̱yā viṣṇo̍r e̱ṣasya̍ prabhṛ̱the ha̱virbhi̍ḥ |
7.040.05c vi̱de hi ru̱dro ru̱driya̍m mahi̱tvaṁ yā̍si̱ṣṭaṁ va̱rtir a̍śvinā̱v irā̍vat ||

7.040.06a मात्र पूषन्नाघृण इरस्यो वरूत्री यद्रातिषाचश्च रासन् ।

7.040.06c मयोभुवो नो अर्वन्तो नि पान्तु वृष्टिं परिज्मा वातो ददातु ॥

7.040.06a mātra̍ pūṣann āghṛṇa irasyo̱ varū̍trī̱ yad rā̍ti̱ṣācaś ca̱ rāsa̍n |
7.040.06c ma̱yo̱bhuvo̍ no̱ arva̍nto̱ ni pā̍ntu vṛ̱ṣṭim pari̍jmā̱ vāto̍ dadātu ||

7.040.07a नू रोदसी अभिष्टुते वसिष्ठैर्ऋतावानो वरुणो मित्रो अग्निः ।

7.040.07c यच्छन्तु चन्द्रा उपमं नो अर्कं यूयं पात स्वस्तिभिः सदा नः ॥

7.040.07a nū roda̍sī a̱bhiṣṭu̍te̱ vasi̍ṣṭhair ṛ̱tāvā̍no̱ varu̍ṇo mi̱tro a̱gniḥ |
7.040.07c yaccha̍ntu ca̱ndrā u̍pa̱maṁ no̍ a̱rkaṁ yū̱yam pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ||

7.041.01a प्रातरग्निं प्रातरिन्द्रं हवामहे प्रातर्मित्रावरुणा प्रातरश्विना ।

7.041.01c प्रातर्भगं पूषणं ब्रह्मणस्पतिं प्रातः सोममुत रुद्रं हुवेम ॥

7.041.01a prā̱tar a̱gnim prā̱tar indra̍ṁ havāmahe prā̱tar mi̱trāvaru̍ṇā prā̱tar a̱śvinā̍ |
7.041.01c prā̱tar bhaga̍m pū̱ṣaṇa̱m brahma̍ṇa̱s pati̍m prā̱taḥ soma̍m u̱ta ru̱draṁ hu̍vema ||

7.041.02a प्रातर्जितं भगमुग्रं हुवेम वयं पुत्रमदितेर्यो विधर्ता ।

7.041.02c आध्रश्चिद्यं मन्यमानस्तुरश्चिद्राजा चिद्यं भगं भक्षीत्याह ॥

7.041.02a prā̱ta̱rjita̱m bhaga̍m u̱graṁ hu̍vema va̱yam pu̱tram adite̱r yo vi̍dha̱rtā |
7.041.02c ā̱dhraś ci̱d yam manya̍mānas tu̱raś ci̱d rājā̍ ci̱d yam bhaga̍m bha̱kṣīty āha̍ ||

7.041.03a भग प्रणेतर्भग सत्यराधो भगेमां धियमुदवा ददन्नः ।

7.041.03c भग प्र णो जनय गोभिरश्वैर्भग प्र नृभिर्नृवन्तः स्याम ॥

7.041.03a bhaga praṇetar bhaga satyarādho bhagemāṁ dhiyam ud avā dadan naḥ |
7.041.03c bhaga pra ṇo janaya gobhir aśvair bhaga pra nṛbhir nṛvantaḥ syāma ||

7.041.04a उतेदानीं भगवन्तः स्यामोत प्रपित्व उत मध्ये अह्नाम् ।

7.041.04c उतोदिता मघवन्सूर्यस्य वयं देवानां सुमतौ स्याम ॥

7.041.04a utedānīm bhagavantaḥ syāmota prapitva uta madhye ahnām |
7.041.04c uteditā maghavan sūryasya vayaṁ devānāṁ sumatau syāma ||

7.041.05a भग एव भगवाँ अस्तु देवास्तेन वयं भगवन्तः स्याम ।

7.041.05c तं त्वा भग सर्व इज्जोहवीति स नो भग पुरएता भवेह ॥

7.041.05a bhaga eva bhagavām̐ astu devās tena vayam bhagavantaḥ syāma |
7.041.05c taṁ tvā bhaga sarva ij johavīti sa no bhaga puraetā bhaveha ||

7.041.06a समध्वरायोषसो नमन्त दधिक्रावेव शुचये पदाय ।

7.041.06c अर्वाचीनं वसुविदं भगं नो रथमिवाश्वा वाजिन आ वहन्तु ॥

7.041.06a sam adhvarāyoṣaso namanta dadhikrāveva śucaye padāya |
7.041.06c arvācīnaṁ vasuvidam bhagaṁ no ratham ivāśvā vājina ā vahantu ||

7.041.07a अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।

7.041.07c घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥

7.041.07a aśvāvatīr gomatīr na uṣāso vīravatīḥ sadam ucchantu bhadrāḥ |
7.041.07c ghṛtaṁ duhānā viśvataḥ prapītā yūyam pāta svastibhiḥ sadā naḥ ||

7.042.01a प्र ब्रह्माणो अङ्गिरसो नक्षन्त प्र क्रन्दनुर्नभन्यस्य वेतु ।

7.042.01c प्र धेनव उदप्रुतो नवन्त युज्यातामद्री अध्वरस्य पेशः ॥

7.042.01a pra brahmāṇo aṅgiraso nakṣanta pra krandanur nabhanyasya vetu |
7.042.01c pra dhenava udapruto navanta yujyātām adrī adhvarasya peśaḥ ||

7.042.02a सुगस्ते अग्ने सनवित्तो अध्वा युक्ष्वा सुते हरितो रोहितश्च ।

7.042.02c ये वा सद्मन्नरुषा वीरवाहो हुवे देवानां जनिमानि सत्तः ॥

7.042.02a sugas te agne sanavitto adhvā yukṣvā sute harito rohitaś ca |
7.042.02c ye vā sadmann aruṣā vīravāho huve devānām janimāni sattaḥ ||

7.042.03a समु वो यज्ञं महयन्नमोभिः प्र होता मन्द्रो रिरिच उपाके ।

7.042.03c यजस्व सु पुर्वणीक देवाना यज्ञियामरमतिं ववृत्याः ॥

7.042.03a sam u vo yajñam mahayan namobhiḥ pra hotā mandro ririca upāke |
7.042.03c yajasva su purvaṇīka devān ā yajñiyām aramatiṁ vavṛtyāḥ ||

7.042.04a यदा वीरस्य रेवतो दुरोणे स्योनशीरतिथिराचिकेतत् ।

7.042.04c सुप्रीतो अग्निः सुधितो दम आ स विशे दाति वार्यमियत्यै ॥

7.042.04a yadā vīrasya revato duroṇe syonaśīr atithir āciketat |
7.042.04c suprīto agniḥ sudhito dama ā sa viśe dāti vāryam iyatyai ||

7.042.05a इमं नो अग्ने अध्वरं जुषस्व मरुत्स्विन्द्रे यशसं कृधी नः ।

7.042.05c आ नक्ता बर्हिः सदतामुषासोशन्ता मित्रावरुणा यजेह ॥

7.042.05a imaṁ no agne adhvaraṁ juṣasva marutsv indre yaśasaṁ kṛdhī naḥ |
7.042.05c ā naktā barhiḥ sadatām uṣāsośantā mitrāvaruṇā yajeha ||

7.042.06a एवाग्निं सहस्यं१ वसिष्ठो रायस्कामो विश्वप्स्न्यस्य स्तौत् ।

7.042.06c इषं रयिं पप्रथद्वाजमस्मे यूयं पात स्वस्तिभिः सदा नः ॥

7.042.06a evāgniṁ sahasyaṁ1 vasiṣṭho rāyaskāmo viśvapsnyasya staut |
7.042.06c iṣaṁ rayim paprathad vājam asme yūyam pāta svastibhiḥ sadā naḥ ||

7.043.01a प्र वो यज्ञेषु देवयन्तो अर्चन्द्यावा नमोभिः पृथिवी इषध्यै ।

7.043.01c येषां ब्रह्माण्यसमानि विप्रा विष्वग्वियन्ति वनिनो न शाखाः ॥

7.043.01a pra vo yajñeṣu devayanto arcan dyāvā namobhiḥ pṛthivī iṣadhyai |
7.043.01c yeṣām brahmāṇy asamāni viprā viṣvag viyanti vanino na śākhāḥ ||

7.043.02a प्र यज्ञ एतु हेत्वो न सप्तिरुद्यच्छध्वं समनसो घृताचीः ।

7.043.02c स्तृणीत बर्हिरध्वराय साधूर्ध्वा शोचींषि देवयून्यस्थुः ॥

7.043.02a pra yajña etu hetvo na saptir ud yacchadhvaṁ samanaso ghṛtācīḥ |
7.043.02c stṛṇīta barhir adhvarāya sādhūrdhvā śocīṁṣi devayūny asthuḥ ||

7.043.03a आ पुत्रासो न मातरं विभृत्राः सानौ देवासो बर्हिषः सदन्तु ।

7.043.03c आ विश्वाची विदथ्यामनक्त्वग्ने मा नो देवताता मृधस्कः ॥

7.043.03a ā putrāso na mātaram vibhṛtrāḥ sānau devāso barhiṣaḥ sadantu |
7.043.03c ā viśvācī vidathyām anaktv agne mā no devatātā mṛdhas kaḥ ||

7.043.04a ते सीषपन्त जोषमा यजत्रा ऋतस्य धाराः सुदुघा दुहानाः ।

7.043.04c ज्येष्ठं वो अद्य मह आ वसूनामा गन्तन समनसो यति ष्ठ ॥

7.043.04a te sīṣapanta joṣam ā yajatrā ṛtasya dhārāḥ sudughā duhānāḥ |
7.043.04c jyeṣṭhaṁ vo adya maha ā vasūnām ā gantana samanaso yati ṣṭha ||

7.043.05a एवा नो अग्ने विक्ष्वा दशस्य त्वया वयं सहसावन्नास्क्राः ।

7.043.05c राया युजा सधमादो अरिष्टा यूयं पात स्वस्तिभिः सदा नः ॥

7.043.05a evā no agne vikṣv ā daśasya tvayā vayaṁ sahasāvann āskrāḥ |
7.043.05c rāyā yujā sadhamādo ariṣṭā yūyam pāta svastibhiḥ sadā naḥ ||

7.044.01a दधिक्रां वः प्रथममश्विनोषसमग्निं समिद्धं भगमूतये हुवे ।

7.044.01c इन्द्रं विष्णुं पूषणं ब्रह्मणस्पतिमादित्यान्द्यावापृथिवी अपः स्वः ॥

7.044.01a dadhikrāṁ vaḥ prathamam aśvinoṣasam agniṁ samiddham bhagam ūtaye huve |
7.044.01c indraṁ viṣṇum pūṣaṇam brahmaṇas patim ādityān dyāvāpṛthivī apaḥ svaḥ ||

7.044.02a दधिक्रामु नमसा बोधयन्त उदीराणा यज्ञमुपप्रयन्तः ।

7.044.02c इळां देवीं बर्हिषि सादयन्तोऽश्विना विप्रा सुहवा हुवेम ॥

7.044.02a dadhikrām u namasā bodhayanta udīrāṇā yajñam upaprayantaḥ |
7.044.02c iḷāṁ devīm barhiṣi sādayanto 'śvinā viprā suhavā huvema ||

7.044.03a दधिक्रावाणं बुबुधानो अग्निमुप ब्रुव उषसं सूर्यं गाम् ।

7.044.03c ब्रध्नं माँश्चतोर्वरुणस्य बभ्रुं ते विश्वास्मद्दुरिता यावयन्तु ॥

7.044.03a dadhikrāvāṇam bubudhāno agnim upa bruva uṣasaṁ sūryaṁ gām |
7.044.03c bradhnam mām̐ścator varuṇasya babhruṁ te viśvāsmad duritā yāvayantu ||

7.044.04a दधिक्रावा प्रथमो वाज्यर्वाग्रे रथानां भवति प्रजानन् ।

7.044.04c संविदान उषसा सूर्येणादित्येभिर्वसुभिरङ्गिरोभिः ॥

7.044.04a dadhikrāvā prathamo vājy arvāgre rathānām bhavati prajānan |
7.044.04c saṁvidāna uṣasā sūryeṇādityebhir vasubhir aṅgirobhiḥ ||

7.044.05a आ नो दधिक्राः पथ्यामनक्त्वृतस्य पन्थामन्वेतवा उ ।

7.044.05c शृणोतु नो दैव्यं शर्धो अग्निः शृण्वन्तु विश्वे महिषा अमूराः ॥

7.044.05a ā no dadhikrāḥ pathyām anaktv ṛtasya panthām anvetavā u |
7.044.05c śṛṇotu no daivyaṁ śardho agniḥ śṛṇvantu viśve mahiṣā amūrāḥ ||

7.045.01a आ देवो यातु सविता सुरत्नोऽन्तरिक्षप्रा वहमानो अश्वैः ।

7.045.01c हस्ते दधानो नर्या पुरूणि निवेशयञ्च प्रसुवञ्च भूम ॥

7.045.01a ā devo yātu savitā suratno 'ntarikṣaprā vahamāno aśvaiḥ |
7.045.01c haste dadhāno naryā purūṇi niveśayañ ca prasuvañ ca bhūma ||

7.045.02a उदस्य बाहू शिथिरा बृहन्ता हिरण्यया दिवो अन्ताँ अनष्टाम् ।

7.045.02c नूनं सो अस्य महिमा पनिष्ट सूरश्चिदस्मा अनु दादपस्याम् ॥

7.045.02a ud asya bāhū śithirā bṛhantā hiraṇyayā divo antām̐ anaṣṭām |
7.045.02c nūnaṁ so asya mahimā paniṣṭa sūraś cid asmā anu dād apasyām ||

7.045.03a स घा नो देवः सविता सहावा साविषद्वसुपतिर्वसूनि ।

7.045.03c विश्रयमाणो अमतिमुरूचीं मर्तभोजनमध रासते नः ॥

7.045.03a sa ghā no devaḥ savitā sahāvā sāviṣad vasupatir vasūni |
7.045.03c viśrayamāṇo amatim urūcīm martabhojanam adha rāsate naḥ ||

7.045.04a इमा गिरः सवितारं सुजिह्वं पूर्णगभस्तिमीळते सुपाणिम् ।

7.045.04c चित्रं वयो बृहदस्मे दधातु यूयं पात स्वस्तिभिः सदा नः ॥

7.045.04a imā giraḥ savitāraṁ sujihvam pūrṇagabhastim īḻate supāṇim |
7.045.04c citraṁ vayo bṛhad asme dadhātu yūyam pāta svastibhiḥ sadā naḥ ||

7.046.01a इमा रुद्राय स्थिरधन्वने गिरः क्षिप्रेषवे देवाय स्वधाव्ने ।

7.046.01c अषाळ्हाय सहमानाय वेधसे तिग्मायुधाय भरता शृणोतु नः ॥

7.046.01a imā rudrāya sthiradhanvane giraḥ kṣipreṣave devāya svadhāvne |
7.046.01c aṣāḷhāya sahamānāya vedhase tigmāyudhāya bharatā śṛṇotu naḥ ||

7.046.02a स हि क्षयेण क्षम्यस्य जन्मनः साम्राज्येन दिव्यस्य चेतति ।

7.046.02c अवन्नवन्तीरुप नो दुरश्चरानमीवो रुद्र जासु नो भव ॥

7.046.02a sa hi kṣayeṇa kṣamyasya janmanaḥ sāmrājyena divyasya cetati |
7.046.02c avann avantīr upa no duraś carānamīvo rudra jāsu no bhava ||

7.046.03a या ते दिद्युदवसृष्टा दिवस्परि क्ष्मया चरति परि सा वृणक्तु नः ।

7.046.03c सहस्रं ते स्वपिवात भेषजा मा नस्तोकेषु तनयेषु रीरिषः ॥

7.046.03a yā te didyud avasṛṣṭā divas pari kṣmayā carati pari sā vṛṇaktu naḥ |
7.046.03c sahasraṁ te svapivāta bheṣajā mā nas tokeṣu tanayeṣu rīriṣaḥ ||

7.046.04a मा नो वधी रुद्र मा परा दा मा ते भूम प्रसितौ हीळितस्य ।

7.046.04c आ नो भज बर्हिषि जीवशंसे यूयं पात स्वस्तिभिः सदा नः ॥

7.046.04a mā no vadhī rudra mā parā dā mā te bhūma prasitau hīḷitasya |
7.046.04c ā no bhaja barhiṣi jīvaśaṁse yūyam pāta svastibhiḥ sadā naḥ ||

7.047.01a आपो यं वः प्रथमं देवयन्त इन्द्रपानमूर्मिमकृण्वतेळः ।

7.047.01c तं वो वयं शुचिमरिप्रमद्य घृतप्रुषं मधुमन्तं वनेम ॥

7.047.01a āpo yaṁ vaḥ prathamaṁ devayanta indrapānam ūrmim akṛṇvateḷaḥ |
7.047.01c taṁ vo vayaṁ śucim aripram adya ghṛtapruṣam madhumantaṁ vanema ||

7.047.02a तमूर्मिमापो मधुमत्तमं वोऽपां नपादवत्वाशुहेमा ।

7.047.02c यस्मिन्निन्द्रो वसुभिर्मादयाते तमश्याम देवयन्तो वो अद्य ॥

7.047.02a tam ūrmim āpo madhumattamaṁ vo 'pāṁ napād avatv āśuhemā |
7.047.02c yasminn indro vasubhir mādayāte tam aśyāma devayanto vo adya ||

7.047.03a शतपवित्राः स्वधया मदन्तीर्देवीर्देवानामपि यन्ति पाथः ।

7.047.03c ता इन्द्रस्य न मिनन्ति व्रतानि सिन्धुभ्यो हव्यं घृतवज्जुहोत ॥

7.047.03a śatapavitrāḥ svadhayā madantīr devīr devānām api yanti pāthaḥ |
7.047.03c tā indrasya na minanti vratāni sindhubhyo havyaṁ ghṛtavaj juhota ||

7.047.04a याः सूर्यो रश्मिभिराततान याभ्य इन्द्रो अरदद्गातुमूर्मिम् ।

7.047.04c ते सिन्धवो वरिवो धातना नो यूयं पात स्वस्तिभिः सदा नः ॥

7.047.04a yāḥ sūryo raśmibhir ātatāna yābhya indro aradad gātum ūrmim |
7.047.04c te sindhavo varivo dhātanā no yūyam pāta svastibhiḥ sadā naḥ ||

7.048.01a ऋभुक्षणो वाजा मादयध्वमस्मे नरो मघवानः सुतस्य ।

7.048.01c आ वोऽर्वाचः क्रतवो न यातां विभ्वो रथं नर्यं वर्तयन्तु ॥

7.048.01a ṛbhukṣaṇo vājā mādayadhvam asme naro maghavānaḥ sutasya |
7.048.01c ā vo 'rvācaḥ kratavo na yātāṁ vibhvo rathaṁ naryaṁ vartayantu ||

7.048.02a ऋभुर्ऋभुभिरभि वः स्याम विभ्वो विभुभिः शवसा शवांसि ।

7.048.02c वाजो अस्माँ अवतु वाजसाताविन्द्रेण युजा तरुषेम वृत्रम् ॥

7.048.02a ṛbhur ṛbhubhir abhi vaḥ syāma vibhvo vibhubhiḥ śavasā śavāṁsi |
7.048.02c vājo asmām̐ avatu vājasātāv indreṇa yujā taruṣema vṛtram ||

7.048.03a ते चिद्धि पूर्वीरभि सन्ति शासा विश्वाँ अर्य उपरताति वन्वन् ।

7.048.03c इन्द्रो विभ्वाँ ऋभुक्षा वाजो अर्यः शत्रोर्मिथत्या कृणवन्वि नृम्णम् ॥

7.048.03a te cid dhi pūrvīr abhi santi śāsā viśvām̐ arya uparatāti vanvan |
7.048.03c indro vibhvām̐ ṛbhukṣā vājo aryaḥ śatror mithatyā kṛṇavan vi nṛmṇam ||

7.048.04a नू देवासो वरिवः कर्तना नो भूत नो विश्वेऽवसे सजोषाः ।

7.048.04c समस्मे इषं वसवो ददीरन्यूयं पात स्वस्तिभिः सदा नः ॥

7.048.04a nū devāso varivaḥ kartanā no bhūta no viśve 'vase sajoṣāḥ |
7.048.04c sam asme iṣaṁ vasavo dadīran yūyam pāta svastibhiḥ sadā naḥ ||

7.049.01a समुद्रज्येष्ठाः सलिलस्य मध्यात्पुनाना यन्त्यनिविशमानाः ।

7.049.01c इन्द्रो या वज्री वृषभो रराद ता आपो देवीरिह मामवन्तु ॥

7.049.01a samudrajyeṣṭhāḥ salilasya madhyāt punānā yanty aniviśamānāḥ |

7.049.01c indro yā vajrī vṛṣabho rarāda tā āpo devīr iha mām avantu ||

7.049.02a या आपो दिव्या उत वा स्रवन्ति खनित्रिमा उत वा याः स्वयंजाः ।

7.049.02c समुद्रार्था याः शुचयः पावकास्ता आपो देवीरिह मामवन्तु ॥

7.049.02a yā āpo divyā uta vā sravanti khanitrimā uta vā yāḥ svayañjāḥ |
7.049.02c samudrārthā yāḥ śucayaḥ pāvakās tā āpo devīr iha mām avantu ||

7.049.03a यासां राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम् ।

7.049.03c मधुश्चुतः शुचयो याः पावकास्ता आपो देवीरिह मामवन्तु ॥

7.049.03a yāsāṁ rājā varuṇo yāti madhye satyānṛte avapaśyañ janānām |
7.049.03c madhuścutaḥ śucayo yāḥ pāvakās tā āpo devīr iha mām avantu ||

7.049.04a यासु राजा वरुणो यासु सोमो विश्वे देवा यासूर्जं मदन्ति ।

7.049.04c वैश्वानरो यास्वग्निः प्रविष्टस्ता आपो देवीरिह मामवन्तु ॥

7.049.04a yāsu rājā varuṇo yāsu somo viśve devā yāsūrjam madanti |
7.049.04c vaiśvānaro yāsv agniḥ praviṣṭas tā āpo devīr iha mām avantu ||

7.050.01a आ मां मित्रावरुणेह रक्षतं कुलाययद्विश्वयन्मा न आ गन् ।

7.050.01c अजकावं दुर्दृशीकं तिरो दधे मा मां पद्येन रपसा विदत्त्सरुः ॥

7.050.01a ā mām mitrāvaruṇeha rakṣataṁ kulāyayad viśvayan mā na ā gan |
7.050.01c ajakāvaṁ durdṛśīkaṁ tiro dadhe mā mām padyena rapasā vidat tsaruḥ ||

7.050.02a यद्विजामन्परुषि वन्दनं भुवदष्ठीवन्तौ परि कुल्फौ च देहत् ।

7.050.02c अग्निष्टच्छोचन्नप बाधतामितो मा मां पद्येन रपसा विदत्त्सरुः ॥

7.050.02a yad vijāman paruṣi vandanam bhuvad aṣṭhīvantau pari kulphau ca dehat |
7.050.02c agniṣ ṭac chocann apa bādhatām ito mā mām padyena rapasā vidat tsaruḥ ||

7.050.03a यच्छल्मलौ भवति यन्नदीषु यदोषधीभ्यः परि जायते विषम् ।

7.050.03c विश्वे देवा निरितस्तत्सुवन्तु मा मां पद्येन रपसा विदत्त्सरुः ॥

7.050.03a yac chalmalau bhavati yan nadīṣu yad oṣadhībhyaḥ pari jāyate viṣam |
7.050.03c viśve devā nir itas tat suvantu mā mām padyena rapasā vidat tsaruḥ ||

7.050.04a याः प्रवतो निवत उद्वत उदन्वतीरनुदकाश्च याः ।

7.050.04c ता अस्मभ्यं पयसा पिन्वमानाः शिवा देवीरशिपदा भवन्तु सर्वा नद्यो अशिमिदा भवन्तु ॥

7.050.04a yāḥ pravato nivata udvata udanvatīr anudakāś ca yāḥ |
7.050.04c tā asmabhyam payasā pinvamānāḥ śivā devīr aśipadā bhavantu sarvā nadyo aśimidā bhavantu ||

7.051.01a आदित्यानामवसा नूतनेन सक्षीमहि शर्मणा शंतमेन ।

7.051.01c अनागास्त्वे अदितित्वे तुरास इमं यज्ञं दधतु श्रोषमाणाः ॥

7.051.01a ādityānām avasā nūtanena sakṣīmahi śarmaṇā śantamena |
7.051.01c anāgāstve aditītve turāsa imaṁ yajñaṁ dadhatu śroṣamāṇāḥ ||

7.051.02a आदित्यासो अदितिर्मादयन्तां मित्रो अर्यमा वरुणो रजिष्ठाः ।

7.051.02c अस्माकं सन्तु भुवनस्य गोपाः पिबन्तु सोममवसे नो अद्य ॥

7.051.02a ādityāso aditir mādayantām mitro aryamā varuṇo rajiṣṭhāḥ |
7.051.02c asmākaṁ santu bhuvanasya gopāḥ pibantu somam avase no adya ||

7.051.03a आदित्या विश्वे मरुतश्च विश्वे देवाश्च विश्व ऋभवश्च विश्वे ।

7.051.03c इन्द्रो अग्निरश्विना तुष्टुवाना यूयं पात स्वस्तिभिः सदा नः ॥

7.051.03a ādityā viśve marutaś ca viśve devāś ca viśva ṛbhavaś ca viśve |
7.051.03c indro agnir aśvinā tuṣṭuvānā yūyam pāta svastibhiḥ sadā naḥ ||

7.052.01a आदित्यासो अदितयः स्याम पूर्देवत्रा वसवो मर्त्यत्रा ।

7.052.01c सनेम मित्रावरुणा सनन्तो भवेम द्यावापृथिवी भवन्तः ॥

7.052.01a ādityāso aditayaḥ syāma pūr devatrā vasavo martyatrā |
7.052.01c sanema mitrāvaruṇā sananto bhavema dyāvāpṛthivī bhavantaḥ ||

7.052.02a मित्रस्तन्नो वरुणो मामहन्त शर्म तोकाय तनयाय गोपाः ।

7.052.02c मा वो भुजेमान्यजातमेनो मा तत्कर्म वसवो यच्चयध्वे ॥

7.052.02a mitras tan no varuṇo māmahanta śarma tokāya tanayāya gopāḥ |
7.052.02c mā vo bhujemānyajātam eno mā tat karma vasavo yac cayadhve ||

7.052.03a तुरण्यवोऽङ्गिरसो नक्षन्त रत्नं देवस्य सवितुरियानाः ।

7.052.03c पिता च तन्नो महान्यजत्रो विश्वे देवाः समनसो जुषन्त ॥

7.052.03a turaṇyavo 'ṅgiraso nakṣanta ratnaṁ devasya savitur iyānāḥ |
7.052.03c pitā ca tan no mahān yajatro viśve devāḥ samanaso juṣanta ||

7.053.01a प्र द्यावा यज्ञैः पृथिवी नमोभिः सबाध ईळे बृहती यजत्रे ।

7.053.01c ते चिद्धि पूर्वे कवयो गृणन्तः पुरो मही दधिरे देवपुत्रे ॥

7.053.01a pra dyāvā yajñaiḥ pṛthivī namobhiḥ sabādha īḷe bṛhatī yajatre |
7.053.01c te cid dhi pūrve kavayo gṛṇantaḥ puro mahī dadhire devaputre ||

7.053.02a प्र पूर्वजे पितरा नव्यसीभिर्गीर्भिः कृणुध्वं सदने ऋतस्य ।

7.053.02c आ नो द्यावापृथिवी दैव्येन जनेन यातं महि वां वरूथम् ॥

7.053.02a pra pūrvaje pitarā navyasībhir gīrbhiḥ kṛṇudhvaṁ sadane ṛtasya |
7.053.02c ā no dyāvāpṛthivī daivyena janena yātam mahi vāṁ varūtham ||

7.053.03a उतो हि वां रत्नधेयानि सन्ति पुरूणि द्यावापृथिवी सुदासे ।

7.053.03c अस्मे धत्तं यदसदस्कृधोयु यूयं पात स्वस्तिभिः सदा नः ॥

7.053.03a uto hi vāṁ ratnadheyāni santi purūṇi dyāvāpṛthivī sudāse |
7.053.03c asme dhattaṁ yad asad askṛdhoyu yūyam pāta svastibhiḥ sadā naḥ ||

7.054.01a वास्तोष्पते प्रति जानीह्यस्मान्स्वावेशो अनमीवो भवा नः ।

7.054.01c यत्त्वेमहे प्रति तन्नो जुषस्व शं नो भव द्विपदे शं चतुष्पदे ॥

7.054.01a vāstoṣ pate prati jānīhy asmān svāveśo anamīvo bhavā naḥ |
7.054.01c yat tvemahe prati tan no juṣasva śaṁ no bhava dvipade śaṁ catuṣpade ||

7.054.02a वास्तोष्पते प्रतरणो न एधि गयस्फानो गोभिरश्वेभिरिन्दो ।

7.054.02c अजरासस्ते सख्ये स्याम पितेव पुत्रान्प्रति नो जुषस्व ॥

7.054.02a vāstoṣ pate prataraṇo na edhi gayasphāno gobhir aśvebhir indo |
7.054.02c ajarāsas te sakhye syāma piteva putrān prati no juṣasva ||

7.054.03a वास्तोष्पते शग्मया संसदा ते सक्षीमहि रण्वया गातुमत्या ।

7.054.03c पाहि क्षेम उत योगे वरं नो यूयं पात स्वस्तिभिः सदा नः ॥

7.054.03a vāstoṣ pate śagmayā saṁsadā te sakṣīmahi raṇvayā gātumatyā |
7.054.03c pāhi kṣema uta yoge varaṁ no yūyam pāta svastibhiḥ sadā naḥ ||

7.055.01a अमीवहा वास्तोष्पते विश्वा रूपाण्याविशन् ।

7.055.01c सखा सुशेव एधि नः ॥

7.055.01a amīvahā vāstoṣ pate viśvā rūpāṇy āviśan |
7.055.01c sakhā suśeva edhi naḥ ||

7.055.02a यदर्जुन सारमेय दतः पिशङ्ग यच्छसे ।

7.055.02c वीव भ्राजन्त ऋष्टय उप स्रक्वेषु बप्सतो नि षु स्वप ॥

7.055.02a yad arjuna sārameya dataḥ piśaṅga yacchase |
7.055.02c vīva bhrājanta ṛṣṭaya upa srakveṣu bapsato ni ṣu svapa ||

7.055.03a स्तेनं राय सारमेय तस्करं वा पुनःसर ।

7.055.03c स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥

7.055.03a stenaṁ rāya sārameya taskaraṁ vā punaḥsara |
7.055.03c stotṝn indrasya rāyasi kim asmān ducchunāyase ni ṣu svapa ||

7.055.04a त्वं सूकरस्य दर्दृहि तव दर्दर्तु सूकरः ।

7.055.04c स्तोतॄनिन्द्रस्य रायसि किमस्मान्दुच्छुनायसे नि षु स्वप ॥

7.055.04a tvaṁ sūkarasya dardṛhi tava dardartu sūkaraḥ |
7.055.04c stotṝn indrasya rāyasi kim asmān ducchunāyase ni ṣu svapa ||

7.055.05a सस्तु माता सस्तु पिता सस्तु श्वा सस्तु विश्पतिः ।

7.055.05c ससन्तु सर्वे ज्ञातयः सस्त्वयमभितो जनः ॥

7.055.05a sastu mātā sastu pitā sastu śvā sastu viśpatiḥ |
7.055.05c sasantu sarve jñātayaḥ sastv ayam abhito janaḥ ||

7.055.06a य आस्ते यश्च चरति यश्च पश्यति नो जनः ।

7.055.06c तेषां सं हन्मो अक्षाणि यथेदं हर्म्यं तथा ॥

7.055.06a ya āste yaś ca carati yaś ca paśyati no janaḥ |
7.055.06c teṣāṁ saṁ hanmo akṣāṇi yathedaṁ harmyaṁ tathā ||

7.055.07a सहस्रशृङ्गो वृषभो यः समुद्रादुदाचरत् ।

7.055.07c तेना सहस्येना वयं नि जनान्स्वापयामसि ॥

7.055.07a sahasraśṛṅgo vṛṣabho yaḥ samudrād udācarat |
7.055.07c tenā sahasyenā vayaṁ ni janān svāpayāmasi ||

7.055.08a प्रोष्ठेशया वह्येशया नारीर्यास्तल्पशीवरीः ।

7.055.08c स्त्रियो याः पुण्यगन्धास्ताः सर्वाः स्वापयामसि ॥

7.055.08a proṣṭheśayā vahyeśayā nārīr yās talpaśīvarīḥ |
7.055.08c striyo yāḥ puṇyagandhās tāḥ sarvāḥ svāpayāmasi ||

7.056.01a क ईं व्यक्ता नरः सनीळा रुद्रस्य मर्या अध स्वश्वाः ॥

7.056.01a ka īṁ vyaktā naraḥ sanīḷā rudrasya maryā adha svaśvāḥ ||

7.056.02a नकिर्ह्येषां जनूंषि वेद ते अङ्ग विद्रे मिथो जनित्रम् ॥

7.056.02a nakir hy eṣāṁ janūṁṣi veda te aṅga vidre mitho janitram ||

7.056.03a अभि स्वपूभिर्मिथो वपन्त वातस्वनसः श्येना अस्पृध्रन् ॥

7.056.03a abhi svapūbhir mitho vapanta vātasvanasaḥ śyenā aspṛdhran ||

7.056.04a एतानि धीरो निण्या चिकेत पृश्निर्यदूधो मही जभार ॥

7.056.04a etāni dhīro niṇyā ciketa pṛśnir yad ūdho mahī jabhāra ||

7.056.05a सा विट् सुवीरा मरुद्भिरस्तु सनात्सहन्ती पुष्यन्ती नृम्णम् ॥

7.056.05a sā viṭ suvīrā marudbhir astu sanāt sahantī puṣyantī nṛmṇam ||

7.056.06a यामं येष्ठाः शुभा शोभिष्ठाः श्रिया सम्मिश्ला ओजोभिरुग्राः ॥

7.056.06a yāmaṁ yeṣṭhāḥ śubhā śobhiṣṭhāḥ śriyā sammiślā ojobhir ugrāḥ ||

7.056.07a उग्रं व ओज स्थिरा शवांस्यधा मरुद्भिर्गणस्तुविष्मान् ॥

7.056.07a ugraṁ va oja sthirā śavāṁsy adhā marudbhir gaṇas tuviṣmān ||

7.056.08a शुभ्रो वः शुष्मः क्रुध्मी मनांसि धुनिर्मुनिरिव शर्धस्य धृष्णोः ॥

7.056.08a śubhro vaḥ śuṣmaḥ krudhmī manāṁsi dhunir munir iva śardhasya dhṛṣṇoḥ ||

7.056.09a सनेम्यस्मद्युयोत दिद्युं मा वो दुर्मतिरिह प्रणङ्नः ॥

7.056.09a sanemy asmad yuyota didyum mā vo durmatir iha praṇaṅ naḥ ||

7.056.10a प्रिया वो नाम हुवे तुराणामा यत्तृपन्मरुतो वावशानाः ॥

7.056.10a priyā vo nāma huve turāṇām ā yat tṛpan maruto vāvaśānāḥ ||

7.056.11a स्वायुधास इष्मिणः सुनिष्का उत स्वयं तन्व१ः शुम्भमानाः ॥

7.056.11a svāyudhāsa iṣmiṇaḥ suniṣkā uta svayaṁ tanva1ḥ śumbhamānāḥ ||

7.056.12a शुची वो हव्या मरुतः शुचीनां शुचिं हिनोम्यध्वरं शुचिभ्यः ।

7.056.12c ऋतेन सत्यमृतसाप आयञ्छुचिजन्मानः शुचयः पावकाः ॥

7.056.12a śucī vo havyā marutaḥ śucīnāṁ śuciṁ hinomy adhvaraṁ śucibhyaḥ |
7.056.12c ṛtena satyam ṛtasāpa āyañ chucijanmānaḥ śucayaḥ pāvakāḥ ||

7.056.13a अंसेष्वा मरुतः खादयो वो वक्षस्सु रुक्मा उपशिश्रियाणाः ।

7.056.13c वि विद्युतो न वृष्टिभी रुचाना अनु स्वधामायुधैर्यच्छमानाः ॥

7.056.13a aṁseṣv ā marutaḥ khādayo vo vakṣassu rukmā upaśiśriyāṇāḥ |
7.056.13c vi vidyuto na vṛṣṭibhī rucānā anu svadhām āyudhair yacchamānāḥ ||

7.056.14a प्र बुध्न्या व ईरते महांसि प्र नामानि प्रयज्यवस्तिरध्वम् ।

7.056.14c सहस्रियं दम्यं भागमेतं गृहमेधीयं मरुतो जुषध्वम् ॥

7.056.14a pra budhnyā va īrate mahāṁsi pra nāmāni prayajyavas tiradhvam |
7.056.14c sahasriyaṁ damyaṁ bhāgam etaṁ gṛhamedhīyaṁ maruto juṣadhvam ||

7.056.15a यदि स्तुतस्य मरुतो अधीथेत्था विप्रस्य वाजिनो हवीमन् ।

7.056.15c मक्षू रायः सुवीर्यस्य दात नू चिद्यमन्य आदभदरावा ॥

7.056.15a yadi stutasya maruto adhīthetthā viprasya vājino havīman |
7.056.15c makṣū rāyaḥ suvīryasya dāta nū cid yam anya ādabhad arāvā ||

7.056.16a अत्यासो न ये मरुतः स्वञ्चो यक्षदृशो न शुभयन्त मर्याः ।

7.056.16c ते हर्म्येष्ठाः शिशवो न शुभ्रा वत्सासो न प्रक्रीळिनः पयोधाः ॥

7.056.16a atyāso na ye marutaḥ svañco yakṣadṛśo na śubhayanta maryāḥ |
7.056.16c te harmyeṣṭhāḥ śiśavo na śubhrā vatsāso na prakrīḻinaḥ payodhāḥ ||

7.056.17a दशस्यन्तो नो मरुतो मृळन्तु वरिवस्यन्तो रोदसी सुमेके ।

7.056.17c आरे गोहा नृहा वधो वो अस्तु सुम्नेभिरस्मे वसवो नमध्वम् ॥

7.056.17a daśasyanto no maruto mṛḻantu varivasyanto rodasī sumeke |
7.056.17c āre gohā nṛhā vadho vo astu sumnebhir asme vasavo namadhvam ||

7.056.18a आ वो होता जोहवीति सत्तः सत्राचीं रातिं मरुतो गृणानः ।

7.056.18c य ईवतो वृषणो अस्ति गोपाः सो अद्वयावी हवते व उक्थैः ॥

7.056.18a ā vo hotā johavīti sattaḥ satrācīṁ rātim maruto gṛṇānaḥ |
7.056.18c ya īvato vṛṣaṇo asti gopāḥ so advayāvī havate va ukthaiḥ ||

7.056.19a इमे तुरं मरुतो रामयन्तीमे सहः सहस आ नमन्ति ।

7.056.19c इमे शंसं वनुष्यतो नि पान्ति गुरु द्वेषो अररुषे दधन्ति ॥

7.056.19a ime turam maruto rāmayantīme sahaḥ sahasa ā namanti |
7.056.19c ime śaṁsaṁ vanuṣyato ni pānti guru dveṣo araruṣe dadhanti ||

7.056.20a इमे रध्रं चिन्मरुतो जुनन्ति भृमिं चिद्यथा वसवो जुषन्त ।

7.056.20c अप बाधध्वं वृषणस्तमांसि धत्त विश्वं तनयं तोकमस्मे ॥

7.056.20a ime radhraṁ cin maruto junanti bhṛmiṁ cid yathā vasavo juṣanta |
7.056.20c apa bādhadhvaṁ vṛṣaṇas tamāṁsi dhatta viśvaṁ tanayaṁ tokam asme ||

7.056.21a मा वो दात्रान्मरुतो निरराम मा पश्चाद्दघ्म रथ्यो विभागे ।

7.056.21c आ न स्पार्हे भजतना वसव्ये३ यदीं सुजातं वृषणो वो अस्ति ॥

7.056.21a mā vo dātrān maruto nir arāma mā paścād daghma rathyo vibhāge |
7.056.21c ā na spārhe bhajatanā vasavye3 yad īṁ sujātaṁ vṛṣaṇo vo asti ||

7.056.22a सं यद्धनन्त मन्युभिर्जनासः शूरा यह्वीष्वोषधीषु विक्षु ।

7.056.22c अध स्मा नो मरुतो रुद्रियासस्त्रातारो भूत पृतनास्वर्यः ॥

7.056.22a saṁ yad dhananta manyubhir janāsaḥ śūrā yahvīṣv oṣadhīṣu vikṣu |

7.056.22c adha smā no maruto rudriyāsas trātāro bhūta pṛtanāsv aryaḥ ||

7.056.23a भूरि चक्र मरुतः पित्र्याण्युक्थानि या वः शस्यन्ते पुरा चित् ।

7.056.23c मरुद्भिरुग्रः पृतनासु साळ्हा मरुद्भिरित्सनिता वाजमर्वा ॥

7.056.23a bhūri cakra marutaḥ pitryāṇy ukthāni yā vaḥ śasyante purā cit |
7.056.23c marudbhir ugraḥ pṛtanāsu sāḷhā marudbhir it sanitā vājam arvā ||

7.056.24a अस्मे वीरो मरुतः शुष्म्यस्तु जनानां यो असुरो विधर्ता ।

7.056.24c अपो येन सुक्षितये तरेमाध स्वमोको अभि वः स्याम ॥

7.056.24a asme vīro marutaḥ śuṣmy astu janānāṁ yo asuro vidhartā |
7.056.24c apo yena sukṣitaye taremādha svam oko abhi vaḥ syāma ||

7.056.25a तन्न इन्द्रो वरुणो मित्रो अग्निराप ओषधीर्वनिनो जुषन्त ।

7.056.25c शर्मन्स्याम मरुतामुपस्थे यूयं पात स्वस्तिभिः सदा नः ॥

7.056.25a tan na indro varuṇo mitro agnir āpa oṣadhīr vanino juṣanta |
7.056.25c śarman syāma marutām upasthe yūyam pāta svastibhiḥ sadā naḥ ||

7.057.01a मध्वो वो नाम मारुतं यजत्राः प्र यज्ञेषु शवसा मदन्ति ।

7.057.01c ये रेजयन्ति रोदसी चिदुर्वी पिन्वन्त्युत्सं यदयासुरुग्राः ॥

7.057.01a madhvo vo nāma mārutaṁ yajatrāḥ pra yajñeṣu śavasā madanti |
7.057.01c ye rejayanti rodasī cid urvī pinvanty utsaṁ yad ayāsur ugrāḥ ||

7.057.02a निचेतारो हि मरुतो गृणन्तं प्रणेतारो यजमानस्य मन्म ।

7.057.02c अस्माकमद्य विदथेषु बर्हिरा वीतये सदत पिप्रियाणाः ॥

7.057.02a nicetāro hi maruto gṛṇantam praṇetāro yajamānasya manma |
7.057.02c asmākam adya vidatheṣu barhir ā vītaye sadata pipriyāṇāḥ ||

7.057.03a नैतावदन्ये मरुतो यथेमे भ्राजन्ते रुक्मैरायुधैस्तनूभिः ।

7.057.03c आ रोदसी विश्वपिशः पिशानाः समानमञ्ज्यञ्जते शुभे कम् ॥

7.057.03a naitāvad anye maruto yatheme bhrājante rukmair āyudhais tanūbhiḥ |
7.057.03c ā rodasī viśvapiśaḥ piśānāḥ samānam añjy añjate śubhe kam ||

7.057.04a ऋधक्सा वो मरुतो दिद्युदस्तु यद्व आगः पुरुषता कराम ।

7.057.04c मा वस्तस्यामपि भूमा यजत्रा अस्मे वो अस्तु सुमतिश्चनिष्ठा ॥

7.057.04a ṛdhak sā vo maruto didyud astu yad va āgaḥ puruṣatā karāma |
7.057.04c mā vas tasyām api bhūmā yajatrā asme vo astu sumatiś caniṣṭhā ||

7.057.05a कृते चिदत्र मरुतो रणन्तानवद्यासः शुचयः पावकाः ।

7.057.05c प्र णोऽवत सुमतिभिर्यजत्राः प्र वाजेभिस्तिरत पुष्यसे नः ॥

7.057.05a kṛte cid atra maruto raṇantānavadyāsaḥ śucayaḥ pāvakāḥ |
7.057.05c pra ṇo 'vata sumatibhir yajatrāḥ pra vājebhis tirata puṣyase naḥ ||

7.057.06a उत स्तुतासो मरुतो व्यन्तु विश्वेभिर्नामभिर्नरो हवींषि ।

7.057.06c ददात नो अमृतस्य प्रजायै जिगृत रायः सूनृता मघानि ॥

7.057.06a uta stutāso maruto vyantu viśvebhir nāmabhir naro havīṁṣi |
7.057.06c dadāta no amṛtasya prajāyai jigṛta rāyaḥ sūnṛtā maghāni ||

7.057.07a आ स्तुतासो मरुतो विश्व ऊती अच्छा सूरीन्सर्वताता जिगात ।

7.057.07c ये नस्त्मना शतिनो वर्धयन्ति यूयं पात स्वस्तिभिः सदा नः ॥

7.057.07a ā stutāso maruto viśva ūtī acchā sūrīn sarvatātā jigāta |
7.057.07c ye nas tmanā śatino vardhayanti yūyam pāta svastibhiḥ sadā naḥ ||

7.058.01a प्र साकमुक्षे अर्चता गणाय यो दैव्यस्य धाम्नस्तुविष्मान् ।

7.058.01c उत क्षोदन्ति रोदसी महित्वा नक्षन्ते नाकं निर्ऋतेरवंशात् ॥

7.058.01a pra sākamukṣe arcatā gaṇāya yo daivyasya dhāmnas tuviṣmān |
7.058.01c uta kṣodanti rodasī mahitvā nakṣante nākaṁ nirṛter avaṁśāt ||

7.058.02a जनूश्चिद्वो मरुतस्त्वेष्येण भीमासस्तुविमन्यवोऽयासः ।

7.058.02c प्र ये महोभिरोजसोत सन्ति विश्वो वो यामन्भयते स्वर्दृक् ॥

7.058.02a janūś cid vo marutas tveṣyeṇa bhīmāsas tuvimanyavo 'yāsaḥ |
7.058.02c pra ye mahobhir ojasota santi viśvo vo yāman bhayate svardṛk ||

7.058.03a बृहद्वयो मघवद्भ्यो दधात जुजोषन्निन्मरुतः सुष्टुतिं नः ।

7.058.03c गतो नाध्वा वि तिराति जन्तुं प्र ण स्पार्हाभिरूतिभिस्तिरेत ॥

7.058.03a bṛhad vayo maghavadbhyo dadhāta jujoṣann in marutaḥ suṣṭutiṁ naḥ |
7.058.03c gato nādhvā vi tirāti jantum pra ṇa spārhābhir ūtibhis tireta ||

7.058.04a युष्मोतो विप्रो मरुतः शतस्वी युष्मोतो अर्वा सहुरिः सहस्री ।

7.058.04c युष्मोतः सम्राळुत हन्ति वृत्रं प्र तद्वो अस्तु धूतयो देष्णम् ॥

7.058.04a yuṣmoto vipro marutaḥ śatasvī yuṣmoto arvā sahuriḥ sahasrī |
7.058.04c yuṣmotaḥ samrāḻ uta hanti vṛtram pra tad vo astu dhūtayo deṣṇam ||

7.058.05a ताँ आ रुद्रस्य मीळ्हुषो विवासे कुविन्नंसन्ते मरुतः पुनर्नः ।

7.058.05c यत्सस्वर्ता जिहीळिरे यदाविरव तदेन ईमहे तुराणाम् ॥

7.058.05a tām̐ ā rudrasya mīḻhuṣo vivāse kuvin naṁsante marutaḥ punar naḥ |
7.058.05c yat sasvartā jihīḻire yad āvir ava tad ena īmahe turāṇām ||

7.058.06a प्र सा वाचि सुष्टुतिर्मघोनामिदं सूक्तं मरुतो जुषन्त ।

7.058.06c आराच्चिद्द्वेषो वृषणो युयोत यूयं पात स्वस्तिभिः सदा नः ॥

7.058.06a pra sā vāci suṣṭutir maghonām idaṁ sūktam maruto juṣanta |
7.058.06c ārāc cid dveṣo vṛṣaṇo yuyota yūyam pāta svastibhiḥ sadā naḥ ||

7.059.01a यं त्रायध्व इदमिदं देवासो यं च नयथ ।

7.059.01c तस्मा अग्ने वरुण मित्रार्यमन्मरुतः शर्म यच्छत ॥

7.059.01a yaṁ trāyadhva idam-idaṁ devāso yaṁ ca nayatha |
7.059.01c tasmā agne varuṇa mitrāryaman marutaḥ śarma yacchata ||

7.059.02a युष्माकं देवा अवसाहनि प्रिय ईजानस्तरति द्विषः ।

7.059.02c प्र स क्षयं तिरते वि महीरिषो यो वो वराय दाशति ॥

7.059.02a yuṣmākaṁ devā avasāhani priya ījānas tarati dviṣaḥ |
7.059.02c pra sa kṣayaṁ tirate vi mahīr iṣo yo vo varāya dāśati ||

7.059.03a नहि वश्चरमं चन वसिष्ठः परिमंसते ।

7.059.03c अस्माकमद्य मरुतः सुते सचा विश्वे पिबत कामिनः ॥

7.059.03a nahi vaś caramaṁ cana vasiṣṭhaḥ parimaṁsate |
7.059.03c asmākam adya marutaḥ sute sacā viśve pibata kāminaḥ ||

7.059.04a नहि व ऊतिः पृतनासु मर्धति यस्मा अराध्वं नरः ।

7.059.04c अभि व आवर्त्सुमतिर्नवीयसी तूयं यात पिपीषवः ॥

7.059.04a nahi va ūtiḥ pṛtanāsu mardhati yasmā arādhvaṁ naraḥ |
7.059.04c abhi va āvart sumatir navīyasī tūyaṁ yāta pipīṣavaḥ ||

7.059.05a ओ षु घृष्विराधसो यातनान्धांसि पीतये ।

7.059.05c इमा वो हव्या मरुतो ररे हि कं मो ष्व१न्यत्र गन्तन ॥

7.059.05a o ṣu ghṛṣvirādhaso yātanāndhāṁsi pītaye |
7.059.05c imā vo havyā maruto rare hi kam mo ṣv a1nyatra gantana ||

7.059.06a आ च नो बर्हिः सदताविता च न स्पार्हाणि दातवे वसु ।

7.059.06c अस्रेधन्तो मरुतः सोम्ये मधौ स्वाहेह मादयाध्वै ॥

7.059.06a ā ca no barhiḥ sadatāvitā ca na spārhāṇi dātave vasu |
7.059.06c asredhanto marutaḥ somye madhau svāheha mādayādhvai ||

7.059.07a सस्वश्चिद्धि तन्व१ः शुम्भमाना आ हंसासो नीलपृष्ठा अपप्तन् ।

7.059.07c विश्वं शर्धो अभितो मा नि षेद नरो न रण्वाः सवने मदन्तः ॥

7.059.07a sasvaś cid dhi tanva1ḥ śumbhamānā ā haṁsāso nīlapṛṣṭhā apaptan |
7.059.07c viśvaṁ śardho abhito mā ni ṣeda naro na raṇvāḥ savane madantaḥ ||

7.059.08a यो नो मरुतो अभि दुर्हृणायुस्तिरश्चित्तानि वसवो जिघांसति ।

7.059.08c द्रुहः पाशान्प्रति स मुचीष्ट तपिष्ठेन हन्मना हन्तना तम् ॥

7.059.08a yo no maruto abhi durhṛṇāyus tiraś cittāni vasavo jighāṁsati |
7.059.08c druhaḥ pāśān prati sa mucīṣṭa tapiṣṭhena hanmanā hantanā tam ||

7.059.09a सांतपना इदं हविर्मरुतस्तज्जुजुष्टन ।

7.059.09c युष्माकोती रिशादसः ॥

7.059.09a sāntapanā idaṁ havir marutas taj jujuṣṭana |
7.059.09c yuṣmākotī riśādasaḥ ||

7.059.10a गृहमेधास आ गत मरुतो माप भूतन ।

7.059.10c युष्माकोती सुदानवः ॥

7.059.10a gṛhamedhāsa ā gata maruto māpa bhūtana |
7.059.10c yuṣmākotī sudānavaḥ ||

7.059.11a इहेह वः स्वतवसः कवयः सूर्यत्वचः ।

7.059.11c यज्ञं मरुत आ वृणे ॥

7.059.11a iheha vaḥ svatavasaḥ kavayaḥ sūryatvacaḥ |
7.059.11c yajñam maruta ā vṛṇe ||

7.059.12a त्र्यम्बकं यजामहे सुगन्धिं पुष्टिवर्धनम् ।

7.059.12c उर्वारुकमिव बन्धनान्मृत्योर्मुक्षीय मामृतात् ॥

7.059.12a tryambakaṁ yajāmahe sugandhiṁ puṣṭivardhanam |
7.059.12c urvārukam iva bandhanān mṛtyor mukṣīya māmṛtāt ||

7.060.01a यदद्य सूर्य ब्रवोऽनागा उद्यन्मित्राय वरुणाय सत्यम् ।

7.060.01c वयं देवत्रादिते स्याम तव प्रियासो अर्यमन्गृणन्तः ॥

7.060.01a yad adya sūrya bravo 'nāgā udyan mitrāya varuṇāya satyam |
7.060.01c vayaṁ devatrādite syāma tava priyāso aryaman gṛṇantaḥ ||

7.060.02a एष स्य मित्रावरुणा नृचक्षा उभे उदेति सूर्यो अभि ज्मन् ।

7.060.02c विश्वस्य स्थातुर्जगतश्च गोपा ऋजु मर्तेषु वृजिना च पश्यन् ॥

7.060.02a eṣa sya mitrāvaruṇā nṛcakṣā ubhe ud eti sūryo abhi jman |
7.060.02c viśvasya sthātur jagataś ca gopā ṛju marteṣu vṛjinā ca paśyan ||

7.060.03a अयुक्त सप्त हरितः सधस्थाद्या ईं वहन्ति सूर्यं घृताचीः ।

7.060.03c धामानि मित्रावरुणा युवाकुः सं यो यूथेव जनिमानि चष्टे ॥

7.060.03a ayukta sapta haritaḥ sadhasthād yā īṁ vahanti sūryaṁ ghṛtācīḥ |
7.060.03c dhāmāni mitrāvaruṇā yuvākuḥ saṁ yo yūtheva janimāni caṣṭe ||

7.060.04a उद्वां पृक्षासो मधुमन्तो अस्थुरा सूर्यो अरुहच्छुक्रमर्णः ।

7.060.04c यस्मा आदित्या अध्वनो रदन्ति मित्रो अर्यमा वरुणः सजोषाः ॥

7.060.04a ud vām pṛkṣāso madhumanto asthur ā sūryo aruhac chukram arṇaḥ |
7.060.04c yasmā ādityā adhvano radanti mitro aryamā varuṇaḥ sajoṣāḥ ||

7.060.05a इमे चेतारो अनृतस्य भूरेर्मित्रो अर्यमा वरुणो हि सन्ति ।

7.060.05c इम ऋतस्य वावृधुर्दुरोणे शग्मासः पुत्रा अदितेरदब्धाः ॥

7.060.05a ime cetāro anṛtasya bhūrer mitro aryamā varuṇo hi santi |
7.060.05c ima ṛtasya vāvṛdhur duroṇe śagmāsaḥ putrā aditer adabdhāḥ ||

7.060.06a इमे मित्रो वरुणो दूळभासोऽचेतसं चिच्चितयन्ति दक्षैः ।

7.060.06c अपि क्रतुं सुचेतसं वतन्तस्तिरश्चिदंहः सुपथा नयन्ति ॥

7.060.06a ime mitro varuṇo dūḻabhāso 'cetasaṁ cic citayanti dakṣaiḥ |
7.060.06c api kratuṁ sucetasaṁ vatantas tiraś cid aṁhaḥ supathā nayanti ||

7.060.07a इमे दिवो अनिमिषा पृथिव्याश्चिकित्वांसो अचेतसं नयन्ति ।

7.060.07c प्रव्राजे चिन्नद्यो गाधमस्ति पारं नो अस्य विष्पितस्य पर्षन् ॥

7.060.07a ime divo animiṣā pṛthivyāś cikitvāṁso acetasaṁ nayanti |
7.060.07c pravrāje cin nadyo gādham asti pāraṁ no asya viṣpitasya parṣan ||

7.060.08a यद्गोपावददितिः शर्म भद्रं मित्रो यच्छन्ति वरुणः सुदासे ।

7.060.08c तस्मिन्ना तोकं तनयं दधाना मा कर्म देवहेळनं तुरासः ॥

7.060.08a yad gopāvad aditiḥ śarma bhadram mitro yacchanti varuṇaḥ sudāse |
7.060.08c tasminn ā tokaṁ tanayaṁ dadhānā mā karma devaheḻanaṁ turāsaḥ ||

7.060.09a अव वेदिं होत्राभिर्यजेत रिपः काश्चिद्वरुणध्रुतः सः ।

7.060.09c परि द्वेषोभिरर्यमा वृणक्तूरुं सुदासे वृषणा उ लोकम् ॥

7.060.09a ava vediṁ hotrābhir yajeta ripaḥ kāś cid varuṇadhrutaḥ saḥ |
7.060.09c pari dveṣobhir aryamā vṛṇaktūruṁ sudāse vṛṣaṇā u lokam ||

7.060.10a सस्वश्चिद्धि समृतिस्त्वेष्येषामपीच्येन सहसा सहन्ते ।

7.060.10c युष्मद्भिया वृषणो रेजमाना दक्षस्य चिन्महिना मृळता नः ॥

7.060.10a sasvaś cid dhi samṛtis tveṣy eṣām apīcyena sahasā sahante |

7.060.10c yuṣmad bhiyā vṛṣaṇo rejamānā dakṣasya cin mahinā mṛḷatā naḥ ||

7.060.11a यो ब्रह्मणे सुमतिमायजाते वाजस्य सातौ परमस्य रायः ।

7.060.11c सीक्षन्त मन्युं मघवानो अर्य उरु क्षयाय चक्रिरे सुधातु ॥

7.060.11a yo brahmaṇe sumatim āyajāte vājasya sātau paramasya rāyaḥ |
7.060.11c sīkṣanta manyum maghavāno arya uru kṣayāya cakrire sudhātu ||

7.060.12a इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।

7.060.12c विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥

7.060.12a iyaṁ deva purohitir yuvabhyāṁ yajñeṣu mitrāvaruṇāv akāri |
7.060.12c viśvāni durgā pipṛtaṁ tiro no yūyam pāta svastibhiḥ sadā naḥ ||

7.061.01a उद्वां चक्षुर्वरुण सुप्रतीकं देवयोरेति सूर्यस्ततन्वान् ।

7.061.01c अभि यो विश्वा भुवनानि चष्टे स मन्युं मर्त्येष्वा चिकेत ॥

7.061.01a ud vāṁ cakṣur varuṇa supratīkaṁ devayor eti sūryas tatanvān |
7.061.01c abhi yo viśvā bhuvanāni caṣṭe sa manyum martyeṣv ā ciketa ||

7.061.02a प्र वां स मित्रावरुणावृतावा विप्रो मन्मानि दीर्घश्रुदियर्ति ।

7.061.02c यस्य ब्रह्माणि सुक्रतू अवाथ आ यत्क्रत्वा न शरदः पृणैथे ॥

7.061.02a pra vāṁ sa mitrāvaruṇāv ṛtāvā vipro manmāni dīrghaśrud iyarti |
7.061.02c yasya brahmāṇi sukratū avātha ā yat kratvā na śaradaḥ pṛṇaithe ||

7.061.03a प्रोरोर्मित्रावरुणा पृथिव्याः प्र दिव ऋष्वाद्बृहतः सुदानू ।

7.061.03c स्पशो दधाथे ओषधीषु विक्ष्वृधग्यतो अनिमिषं रक्षमाणा ॥

7.061.03a proror mitrāvaruṇā pṛthivyāḥ pra diva ṛṣvād bṛhataḥ sudānū |
7.061.03c spaśo dadhāthe oṣadhīṣu vikṣv ṛdhag yato animiṣaṁ rakṣamāṇā ||

7.061.04a शंसा मित्रस्य वरुणस्य धाम शुष्मो रोदसी बद्बधे महित्वा ।

7.061.04c अयन्मासा अयज्वनामवीराः प्र यज्ञमन्मा वृजनं तिराते ॥

7.061.04a śaṁsā mitrasya varuṇasya dhāma śuṣmo rodasī badbadhe mahitvā |
7.061.04c ayan māsā ayajvanām avīrāḥ pra yajñamanmā vṛjanaṁ tirāte ||

7.061.05a अमूरा विश्वा वृषणाविमा वां न यासु चित्रं ददृशे न यक्षम् ।

7.061.05c द्रुहः सचन्ते अनृता जनानां न वां निण्यान्यचिते अभूवन् ॥

7.061.05a amūrā viśvā vṛṣaṇāv imā vāṁ na yāsu citraṁ dadṛśe na yakṣam |
7.061.05c druhaḥ sacante anṛtā janānāṁ na vāṁ niṇyāny acite abhūvan ||

7.061.06a समु वां यज्ञं महयं नमोभिर्हुवे वां मित्रावरुणा सबाधः ।

7.061.06c प्र वां मन्मान्यृचसे नवानि कृतानि ब्रह्म जुजुषन्निमानि ॥

7.061.06a sam u vāṁ yajñam mahayaṁ namobhir huve vāṁ mitrāvaruṇā sabādhaḥ |
7.061.06c pra vām manmāny ṛcase navāni kṛtāni brahma jujuṣann imāni ||

7.061.07a इयं देव पुरोहितिर्युवभ्यां यज्ञेषु मित्रावरुणावकारि ।

7.061.07c विश्वानि दुर्गा पिपृतं तिरो नो यूयं पात स्वस्तिभिः सदा नः ॥

7.061.07a iyaṁ deva purohitir yuvabhyāṁ yajñeṣu mitrāvaruṇāv akāri |
7.061.07c viśvāni durgā pipṛtaṁ tiro no yūyam pāta svastibhiḥ sadā naḥ ||

7.062.01a उत्सूर्यो बृहदर्चींष्यश्रेत्पुरु विश्वा जनिम मानुषाणाम् ।

7.062.01c समो दिवा ददृशे रोचमानः क्रत्वा कृतः सुकृतः कर्तृभिर्भूत् ॥

7.062.01a ut sūryo bṛhad arcīṁṣy aśret puru viśvā janima mānuṣāṇām |
7.062.01c samo divā dadṛśe rocamānaḥ kratvā kṛtaḥ sukṛtaḥ kartṛbhir bhūt ||

7.062.02a स सूर्य प्रति पुरो न उद्गा एभि स्तोमेभिरेतशेभिरेवैः ।

7.062.02c प्र नो मित्राय वरुणाय वोचोऽनागसो अर्यम्णे अग्नये च ॥

7.062.02a sa sūrya prati puro na ud gā ebhi stomebhir etaśebhir evaiḥ |
7.062.02c pra no mitrāya varuṇāya voco 'nāgaso aryamṇe agnaye ca ||

7.062.03a वि नः सहस्रं शुरुधो रदन्त्वृतावानो वरुणो मित्रो अग्निः ।

7.062.03c यच्छन्तु चन्द्रा उपमं नो अर्कमा नः कामं पूपुरन्तु स्तवानाः ॥

7.062.03a vi naḥ sahasraṁ śurudho radantv ṛtāvāno varuṇo mitro agniḥ |
7.062.03c yacchantu candrā upamaṁ no arkam ā naḥ kāmam pūpurantu stavānāḥ ||

7.062.04a द्यावाभूमी अदिते त्रासीथां नो ये वां जज्ञुः सुजनिमान ऋष्वे ।

7.062.04c मा हेळे भूम वरुणस्य वायोर्मा मित्रस्य प्रियतमस्य नृणाम् ॥

7.062.04a dyāvābhūmī adite trāsīthāṁ no ye vāṁ jajñuḥ sujanimāna ṛṣve |
7.062.04c mā heḷe bhūma varuṇasya vāyor mā mitrasya priyatamasya nṛṇām ||

7.062.05a प्र बाहवा सिसृतं जीवसे न आ नो गव्यूतिमुक्षतं घृतेन ।

7.062.05c आ नो जने श्रवयतं युवाना श्रुतं मे मित्रावरुणा हवेमा ॥

7.062.05a pra bāhavā sisṛtaṁ jīvase na ā no gavyūtim ukṣataṁ ghṛtena |
7.062.05c ā no jane śravayataṁ yuvānā śrutam me mitrāvaruṇā havemā ||

7.062.06a नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।

7.062.06c सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.062.06a nū mitro varuṇo aryamā nas tmane tokāya varivo dadhantu |
7.062.06c sugā no viśvā supathāni santu yūyam pāta svastibhiḥ sadā naḥ ||

7.063.01a उद्वेति सुभगो विश्वचक्षाः साधारणः सूर्यो मानुषाणाम् ।

7.063.01c चक्षुर्मित्रस्य वरुणस्य देवश्चर्मेव यः समविव्यक्तमांसि ॥

7.063.01a ud v eti subhago viśvacakṣāḥ sādhāraṇaḥ sūryo mānuṣāṇām |
7.063.01c cakṣur mitrasya varuṇasya devaś carmeva yaḥ samavivyak tamāṁsi ||

7.063.02a उद्वेति प्रसवीता जनानां महान्केतुरर्णवः सूर्यस्य ।

7.063.02c समानं चक्रं पर्याविवृत्सन्यदेतशो वहति धूर्षु युक्तः ॥

7.063.02a ud v eti prasavītā janānām mahān ketur arṇavaḥ sūryasya |
7.063.02c samānaṁ cakram paryāvivṛtsan yad etaśo vahati dhūrṣu yuktaḥ ||

7.063.03a विभ्राजमान उषसामुपस्थाद्रेभैरुदेत्यनुमद्यमानः ।

7.063.03c एष मे देवः सविता चच्छन्द यः समानं न प्रमिनाति धाम ॥

7.063.03a vibhrājamāna uṣasām upasthād rebhair ud ety anumadyamānaḥ |
7.063.03c eṣa me devaḥ savitā cacchanda yaḥ samānaṁ na pramināti dhāma ||

7.063.04a दिवो रुक्म उरुचक्षा उदेति दूरेअर्थस्तरणिर्भ्राजमानः ।

7.063.04c नूनं जनाः सूर्येण प्रसूता अयन्नर्थानि कृणवन्नपांसि ॥

7.063.04a divo rukma urucakṣā ud eti dūrearthas taraṇir bhrājamānaḥ |
7.063.04c nūnaṁ janāḥ sūryeṇa prasūtā ayann arthāni kṛṇavann apāṁsi ||

7.063.05a यत्रा चक्रुरमृता गातुमस्मै श्येनो न दीयन्नन्वेति पाथः ।

7.063.05c प्रति वां सूर उदिते विधेम नमोभिर्मित्रावरुणोत हव्यैः ॥

7.063.05a yatrā cakrur amṛtā gātum asmai śyeno na dīyann anv eti pāthaḥ |
7.063.05c prati vāṁ sūra udite vidhema namobhir mitrāvaruṇota havyaiḥ ||

7.063.06a नू मित्रो वरुणो अर्यमा नस्त्मने तोकाय वरिवो दधन्तु ।

7.063.06c सुगा नो विश्वा सुपथानि सन्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.063.06a nū mitro varuṇo aryamā nas tmane tokāya varivo dadhantu |
7.063.06c sugā no viśvā supathāni santu yūyam pāta svastibhiḥ sadā naḥ ||

7.064.01a दिवि क्षयन्ता रजसः पृथिव्यां प्र वां घृतस्य निर्णिजो ददीरन् ।

7.064.01c हव्यं नो मित्रो अर्यमा सुजातो राजा सुक्षत्रो वरुणो जुषन्त ॥

7.064.01a divi kṣayantā rajasaḥ pṛthivyām pra vāṁ ghṛtasya nirṇijo dadīran |
7.064.01c havyaṁ no mitro aryamā sujāto rājā sukṣatro varuṇo juṣanta ||

7.064.02a आ राजाना मह ऋतस्य गोपा सिन्धुपती क्षत्रिया यातमर्वाक् ।

7.064.02c इळां नो मित्रावरुणोत वृष्टिमव दिव इन्वतं जीरदानू ॥

7.064.02a ā rājānā maha ṛtasya gopā sindhupatī kṣatriyā yātam arvāk |
7.064.02c iḷāṁ no mitrāvaruṇota vṛṣṭim ava diva invataṁ jīradānū ||

7.064.03a मित्रस्तन्नो वरुणो देवो अर्यः प्र साधिष्ठेभिः पथिभिर्नयन्तु ।

7.064.03c ब्रवद्यथा न आदरिः सुदास इषा मदेम सह देवगोपाः ॥

7.064.03a mitras tan no varuṇo devo aryaḥ pra sādhiṣṭhebhiḥ pathibhir nayantu |
7.064.03c bravad yathā na ād ariḥ sudāsa iṣā madema saha devagopāḥ ||

7.064.04a यो वां गर्तं मनसा तक्षदेतमूर्ध्वां धीतिं कृणवद्धारयच्च ।

7.064.04c उक्षेथां मित्रावरुणा घृतेन ता राजाना सुक्षितीस्तर्पयेथाम् ॥

7.064.04a yo vāṁ gartam manasā takṣad etam ūrdhvāṁ dhītiṁ kṛṇavad dhārayac ca |
7.064.04c ukṣethām mitrāvaruṇā ghṛtena tā rājānā sukṣitīs tarpayethām ||

7.064.05a एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
7.064.05c अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥

7.064.05a eṣa stomo varuṇa mitra tubhyaṁ somaḥ śukro na vāyave 'yāmi |
7.064.05c aviṣṭaṁ dhiyo jigṛtam purandhīr yūyam pāta svastibhiḥ sadā naḥ ||

7.065.01a प्रति वां सूर उदिते सूक्तैर्मित्रं हुवे वरुणं पूतदक्षम् ।
7.065.01c ययोरसुर्य१मक्षितं ज्येष्ठं विश्वस्य यामन्नाचिता जिगत्नु ॥

7.065.01a prati vāṁ sūra udite sūktair mitraṁ huve varuṇam pūtadakṣam |
7.065.01c yayor asurya1m akṣitaṁ jyeṣṭhaṁ viśvasya yāmann ācitā jigatnu ||

7.065.02a ता हि देवानामसुरा तावर्या ता नः क्षितीः करतमूर्जयन्तीः ।
7.065.02c अश्याम मित्रावरुणा वयं वां द्यावा च यत्र पीपयन्नहा च ॥

7.065.02a tā hi devānām asurā tāv aryā tā naḥ kṣitīḥ karatam ūrjayantīḥ |
7.065.02c aśyāma mitrāvaruṇā vayaṁ vāṁ dyāvā ca yatra pīpayann ahā ca ||

7.065.03a ता भूरिपाशावनृतस्य सेतू दुरत्येतू रिपवे मर्त्याय ।
7.065.03c ऋतस्य मित्रावरुणा पथा वामपो न नावा दुरिता तरेम ॥

7.065.03a tā bhūripāśāv anṛtasya setū duratyetū ripave martyāya |
7.065.03c ṛtasya mitrāvaruṇā pathā vām apo na nāvā duritā tarema ||

7.065.04a आ नो मित्रावरुणा हव्यजुष्टिं घृतैर्गव्यूतिमुक्षतमिळाभिः ।
7.065.04c प्रति वामत्र वरमा जनाय पृणीतमुद्नो दिव्यस्य चारोः ॥

7.065.04a ā no mitrāvaruṇā havyajuṣṭiṁ ghṛtair gavyūtim ukṣatam iḷābhiḥ |
7.065.04c prati vām atra varam ā janāya pṛṇītam udno divyasya cāroḥ ||

7.065.05a एष स्तोमो वरुण मित्र तुभ्यं सोमः शुक्रो न वायवेऽयामि ।
7.065.05c अविष्टं धियो जिगृतं पुरंधीर्यूयं पात स्वस्तिभिः सदा नः ॥

7.065.05a eṣa stomo varuṇa mitra tubhyaṁ somaḥ śukro na vāyave 'yāmi |
7.065.05c aviṣṭaṁ dhiyo jigṛtam purandhīr yūyam pāta svastibhiḥ sadā naḥ ||

7.066.01a प्र मित्रयोर्वरुणयो स्तोमो न एतु शूष्यः ।

7.066.01c नमस्वान्तुविजातयोः ॥

7.066.01a pra mitrayor varuṇayo stomo na etu śūṣyaḥ |
7.066.01c namasvān tuvijātayoḥ ||

7.066.02a या धारयन्त देवाः सुदक्षा दक्षपितरा ।

7.066.02c असुर्याय प्रमहसा ॥

7.066.02a yā dhārayanta devāḥ sudakṣā dakṣapitarā |
7.066.02c asuryāya pramahasā ||

7.066.03a ता न स्तिपा तनूपा वरुण जरितॄणाम् ।

7.066.03c मित्र साधयतं धियः ॥

7.066.03a tā na stipā tanūpā varuṇa jaritṝṇām |
7.066.03c mitra sādhayataṁ dhiyaḥ ||

7.066.04a यदद्य सूर उदितेऽनागा मित्रो अर्यमा ।

7.066.04c सुवाति सविता भगः ॥

7.066.04a yad adya sūra udite 'nāgā mitro aryamā |
7.066.04c suvāti savitā bhagaḥ ||

7.066.05a सुप्रावीरस्तु स क्षयः प्र नु यामन्सुदानवः ।

7.066.05c ये नो अंहोऽतिपिप्रति ॥

7.066.05a suprāvīr astu sa kṣayaḥ pra nu yāman sudānavaḥ |
7.066.05c ye no aṁho 'tipiprati ||

7.066.06a उत स्वराजो अदितिरदब्धस्य व्रतस्य ये ।

7.066.06c महो राजान ईशते ॥

7.066.06a uta svarājo aditir adabdhasya vratasya ye |
7.066.06c maho rājāna īśate ||

7.066.07a प्रति वां सूर उदिते मित्रं गृणीषे वरुणम् ।

7.066.07c अर्यमणं रिशादसम् ॥

7.066.07a prati vāṁ sūra udite mitraṁ gṛṇīṣe varuṇam |
7.066.07c aryamaṇaṁ riśādasam ||

7.066.08a राया हिरण्यया मतिरियमवृकाय शवसे ।

7.066.08c इयं विप्रा मेधसातये ॥

7.066.08a rāyā hiraṇyayā matir iyam avṛkāya śavase |
7.066.08c iyaṁ viprā medhasātaye ||

7.066.09a ते स्याम देव वरुण ते मित्र सूरिभिः सह ।

7.066.09c इषं स्वश्च धीमहि ॥

7.066.09a te syāma deva varuṇa te mitra sūribhiḥ saha |
7.066.09c iṣaṁ svaś ca dhīmahi ||

7.066.10a बहवः सूरचक्षसोऽग्निजिह्वा ऋतावृधः ।

7.066.10c त्रीणि ये येमुर्विदथानि धीतिभिर्विश्वानि परिभूतिभिः ॥

7.066.10a bahavaḥ sūracakṣaso 'gnijihvā ṛtāvṛdhaḥ |
7.066.10c trīṇi ye yemur vidathāni dhītibhir viśvāni paribhūtibhiḥ ||

7.066.11a वि ये दधुः शरदं मासमादहर्यज्ञमक्तुं चादृचम् ।

7.066.11c अनाप्यं वरुणो मित्रो अर्यमा क्षत्रं राजान आशत ॥

7.066.11a vi ye dadhuḥ śaradam māsam ād ahar yajñam aktuṁ cād ṛcam |
7.066.11c anāpyaṁ varuṇo mitro aryamā kṣatraṁ rājāna āśata ||

7.066.12a तद्वो अद्य मनामहे सूक्तैः सूर उदिते ।

7.066.12c यदोहते वरुणो मित्रो अर्यमा यूयमृतस्य रथ्यः ॥

7.066.12a tad vo adya manāmahe sūktaiḥ sūra udite |
7.066.12c yad ohate varuṇo mitro aryamā yūyam ṛtasya rathyaḥ ||

7.066.13a ऋतावान ऋतजाता ऋतावृधो घोरासो अनृतद्विषः ।

7.066.13c तेषां वः सुम्ने सुच्छर्दिष्टमे नरः स्याम ये च सूरयः ॥

7.066.13a ṛtāvāna ṛtajātā ṛtāvṛdho ghorāso anṛtadviṣaḥ |

7.066.13c teṣāṁ vaḥ sumne succhardiṣṭame naraḥ syāma ye ca sūrayaḥ ||

7.066.14a उदु त्यद्दर्शतं वपुर्दिव एति प्रतिह्वरे ।

7.066.14c यदीमाशुर्वहति देव एतशो विश्वस्मै चक्षसे अरम् ॥

7.066.14a ud u tyad darśataṁ vapur diva eti pratihvare |
7.066.14c yad īm āśur vahati deva etaśo viśvasmai cakṣase aram ||

7.066.15a शीर्ष्णःशीर्ष्णो जगतस्तस्थुषस्पतिं समया विश्वमा रजः ।

7.066.15c सप्त स्वसारः सुविताय सूर्यं वहन्ति हरितो रथे ॥

7.066.15a śīrṣṇaḥ-śīrṣṇo jagatas tasthuṣas patiṁ samayā viśvam ā rajaḥ |
7.066.15c sapta svasāraḥ suvitāya sūryaṁ vahanti harito rathe ||

7.066.16a तच्चक्षुर्देवहितं शुक्रमुच्चरत् ।

7.066.16b पश्येम शरदः शतं जीवेम शरदः शतम् ॥

7.066.16a tac cakṣur devahitaṁ śukram uccarat |
7.066.16b paśyema śaradaḥ śataṁ jīvema śaradaḥ śatam ||

7.066.17a काव्येभिरदाभ्या यातं वरुण द्युमत् ।

7.066.17c मित्रश्च सोमपीतये ॥

7.066.17a kāvyebhir adābhyā yātaṁ varuṇa dyumat |
7.066.17c mitraś ca somapītaye ||

7.066.18a दिवो धामभिर्वरुण मित्रश्चा यातमद्रुहा ।

7.066.18c पिबतं सोममातुजी ॥

7.066.18a divo dhāmabhir varuṇa mitraś cā yātam adruhā |
7.066.18c pibataṁ somam ātujī ||

7.066.19a आ यातं मित्रावरुणा जुषाणावाहुतिं नरा ।

7.066.19c पातं सोममृतावृधा ॥

7.066.19a ā yātam mitrāvaruṇā juṣāṇāv āhutiṁ narā |
7.066.19c pātaṁ somam ṛtāvṛdhā ||

7.067.01a प्रति वां रथं नृपती जरध्यै हविष्मता मनसा यज्ञियेन ।

7.067.01c यो वां दूतो न धिष्ण्यावजीगरच्छा सूनुर्न पितरा विवक्मि ॥

7.067.01a prati vāṁ rathaṁ nṛpatī jaradhyai haviṣmatā manasā yajñiyena |

7.067.01c yo vāṁ dūto na dhiṣṇyāv ajīgar acchā sūnur na pitarā vivakmi ||

7.067.02a अशोच्यग्निः समिधानो अस्मे उपो अदृश्रन्तमसश्चिदन्ताः ।

7.067.02c अचेति केतुरुषसः पुरस्ताच्छ्रिये दिवो दुहितुर्जायमानः ॥

7.067.02a aśocy agniḥ samidhāno asme upo adṛśran tamasaś cid antāḥ |

7.067.02c aceti ketur uṣasaḥ purastāc chriye divo duhitur jāyamānaḥ ||

7.067.03a अभि वां नूनमश्विना सुहोता स्तोमैः सिषक्ति नासत्या विवक्वान् ।

7.067.03c पूर्वीभिर्यातं पथ्याभिरर्वाक्स्वर्विदा वसुमता रथेन ॥

7.067.03a abhi vāṁ nūnam aśvinā suhotā stomaiḥ siṣakti nāsatyā vivakvān |

7.067.03c pūrvībhir yātam pathyābhir arvāk svarvidā vasumatā rathena ||

7.067.04a अवोर्वां नूनमश्विना युवाकुर्हुवे यद्वां सुते माध्वी वसूयुः ।

7.067.04c आ वां वहन्तु स्थविरासो अश्वाः पिबाथो अस्मे सुषुता मधूनि ॥

7.067.04a avor vāṁ nūnam aśvinā yuvākur huve yad vāṁ sute mādhvī vasūyuḥ |

7.067.04c ā vāṁ vahantu sthavirāso aśvāḥ pibātho asme suṣutā madhūni ||

7.067.05a प्राचीमु देवाश्विना धियं मेऽमृध्रां सातये कृतं वसूयुम् ।

7.067.05c विश्वा अविष्टं वाज आ पुरंधीस्ता नः शक्तं शचीपती शचीभिः ॥

7.067.05a prācīm u devāśvinā dhiyam me 'mṛdhrāṁ sātaye kṛtaṁ vasūyum |

7.067.05c viśvā aviṣṭaṁ vāja ā purandhīs tā naḥ śaktaṁ śacīpatī śacībhiḥ ||

7.067.06a अविष्टं धीष्वश्विना न आसु प्रजावद्रेतो अह्रयं नो अस्तु ।

7.067.06c आ वां तोके तनये तूतुजानाः सुरत्नासो देववीतिं गमेम ॥

7.067.06a aviṣṭaṁ dhīṣv aśvinā na āsu prajāvad reto ahrayaṁ no astu |

7.067.06c ā vāṁ toke tanaye tūtujānāḥ suratnāso devavītiṁ gamema ||

7.067.07a एष स्य वां पूर्वगत्वेव सख्ये निधिर्हितो माध्वी रातो अस्मे ।

7.067.07c अहेळता मनसा यातमर्वागश्नन्ता हव्यं मानुषीषु विक्षु ॥

7.067.07a eṣa sya vām pūrvagatveva sakhye nidhir hito mādhvī rāto asme |
7.067.07c ahelatā manasā yātam arvāg aśnantā havyam mānuṣīṣu vikṣu ||

7.067.08a एकस्मिन्योगे भुरणा समाने परि वां सप्त स्रवतो रथो गात्।

7.067.08c न वायन्ति सुभ्वो देवयुक्ता ये वां धूर्षु तरणयो वहन्ति ॥

7.067.08a ekasmin yoge bhuraṇā samāne pari vāṁ sapta sravato ratho gāt |
7.067.08c na vāyanti subhvo devayuktā ye vāṁ dhūrṣu taraṇayo vahanti ||

7.067.09a असश्चता मघवद्भ्यो हि भूतं ये राया मघदेयं जुनन्ति ।

7.067.09c प्र ये बन्धुं सूनृताभिस्तिरन्ते गव्या पृञ्चन्तो अश्व्या मघानि ॥

7.067.09a asaścatā maghavadbhyo hi bhūtaṁ ye rāyā maghadeyaṁ junanti |
7.067.09c pra ye bandhuṁ sūnṛtābhis tirante gavyā pṛñcanto aśvyā maghāni ||

7.067.10a नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत्।

7.067.10c धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः ॥

7.067.10a nū me havam ā śṛṇutaṁ yuvānā yāsiṣṭaṁ vartir aśvināv irāvat |
7.067.10c dhattaṁ ratnāni jarataṁ ca sūrīn yūyam pāta svastibhiḥ sadā naḥ ||

7.068.01a आ शुभ्रा यातमश्विना स्वश्वा गिरो दस्रा जुजुषाणा युवाकोः ।

7.068.01c हव्यानि च प्रतिभृता वीतं नः ॥

7.068.01a ā śubhrā yātam aśvinā svaśvā giro dasrā jujuṣāṇā yuvākoḥ |
7.068.01c havyāni ca pratibhṛtā vītaṁ naḥ ||

7.068.02a प्र वामन्धांसि मद्यान्यस्थुररं गन्तं हविषो वीतये मे ।

7.068.02c तिरो अर्यो हवनानि श्रुतं नः ॥

7.068.02a pra vām andhāṁsi madyāny asthur araṁ gantaṁ haviṣo vītaye me |
7.068.02c tiro aryo havanāni śrutaṁ naḥ ||

7.068.03a प्र वां रथो मनोजवा इयर्ति तिरो रजांस्यश्विना शतोतिः ।

7.068.03c अस्मभ्यं सूर्यावसू इयानः ॥

7.068.03a pra vāṁ ratho manojavā iyarti tiro rajāṁsy aśvinā śatotiḥ |
7.068.03c asmabhyaṁ sūryāvasū iyānaḥ ||

7.068.04a अयं ह यद्वां देवया उ अद्रिरूर्ध्वो विवक्ति सोमसुद्युवभ्याम् ।

7.068.04c आ वल्गू विप्रो ववृतीत हव्यैः ॥

7.068.04a ayaṁ ha yad vāṁ devayā u adrir ūrdhvo vivakti somasud yuvabhyām |
7.068.04c ā valgū vipro vavṛtīta havyaiḥ ||

7.068.05a चित्रं ह यद्वां भोजनं न्वस्ति न्यत्रये महिष्वन्तं युयोतम् ।

7.068.05c यो वामोमानं दधते प्रियः सन् ॥

7.068.05a citraṁ ha yad vām bhojanaṁ nv asti ny atraye mahiṣvantaṁ yuyotam |
7.068.05c yo vām omānaṁ dadhate priyaḥ san ||

7.068.06a उत त्यद्वां जुरते अश्विना भूच्चयवानाय प्रतीत्यं हविर्दे ।

7.068.06c अधि यद्वर्प इतऊति धत्थः ॥

7.068.06a uta tyad vāṁ jurate aśvinā bhūc cyavānāya pratītyaṁ havirde |
7.068.06c adhi yad varpa itaūti dhatthaḥ ||

7.068.07a उत त्यं भुज्युमश्विना सखायो मध्ये जहुर्दुरेवासः समुद्रे ।

7.068.07c निरीं पर्षदरावा यो युवाकुः ॥

7.068.07a uta tyam bhujyum aśvinā sakhāyo madhye jahur durevāsaḥ samudre |
7.068.07c nir īm parṣad arāvā yo yuvākuḥ ||

7.068.08a वृकाय चिज्जसमानाय शक्तमुत श्रुतं शयवे हूयमाना ।

7.068.08c यावघ्न्यामपिन्वतमपो न स्तर्यं चिच्छत्त्यश्विना शचीभिः ॥

7.068.08a vṛkāya cij jasamānāya śaktam uta śrutaṁ śayave hūyamānā |
7.068.08c yāv aghnyām apinvatam apo na staryaṁ cic chakty aśvinā śacībhiḥ ||

7.068.09a एष स्य कारुर्जरते सूक्तैरग्रे बुधान उषसां सुमन्मा ।

7.068.09c इषा तं वर्धदघ्न्या पयोभिर्यूयं पात स्वस्तिभिः सदा नः ॥

7.068.09a eṣa sya kārur jarate sūktair agre budhāna uṣasāṁ sumanmā |
7.068.09c iṣā taṁ vardhad aghnyā payobhir yūyam pāta svastibhiḥ sadā naḥ ||

7.069.01a आ वां रथो रोदसी बद्बधानो हिरण्ययो वृषभिर्यात्वश्वैः ।

7.069.01c घृतवर्तनिः पविभी रुचान इषां वोळ्हा नृपतिर्वाजिनीवान् ॥

7.069.01a ā vāṁ ratho rodasī badbadhāno hiraṇyayo vṛṣabhir yātv aśvaiḥ ।
7.069.01c ghṛtavartaniḥ pavibhī rucāna iṣāṁ voḻhā nṛpatir vājinīvān ॥

7.069.02a स पप्रथानो अभि पञ्च भूमा त्रिवन्धुरो मनसा यातु युक्तः ।

7.069.02c विशो येन गच्छथो देवयन्तीः कुत्रा चिद्याममश्विना दधाना ॥

7.069.02a sa paprathāno abhi pañca bhūmā trivandhuro manasā yātu yuktaḥ ।
7.069.02c viśo yena gacchatho devayantīḥ kutrā cid yāmam aśvinā dadhānā ॥

7.069.03a स्वश्वा यशसा यातमर्वाग्दस्रा निधिं मधुमन्तं पिबाथः ।

7.069.03c वि वां रथो वध्वा३ यादमानोऽन्तान्दिवो बाधते वर्तनिभ्याम् ॥

7.069.03a svaśvā yaśasā yātam arvāg dasrā nidhim madhumantam pibāthaḥ ।
7.069.03c vi vāṁ ratho vadhvā3 yādamāno 'ntān divo bādhate vartanibhyām ॥

7.069.04a युवोः श्रियं परि योषावृणीत सूरो दुहिता परितक्म्यायाम् ।

7.069.04c यद्देवयन्तमवथः शचीभिः परि घ्रंसमोमना वां वयो गात् ॥

7.069.04a yuvoḥ śriyam pari yoṣāvṛṇīta sūro duhitā paritakmyāyām ।
7.069.04c yad devayantam avathaḥ śacībhiḥ pari ghraṁsam omanā vāṁ vayo gāt ॥

7.069.05a यो ह स्य वां रथिरा वस्त उस्रा रथो युजानः परियाति वर्तिः ।

7.069.05c तेन नः शं योरुषसो व्युष्टौ न्यश्विना वहतं यज्ञे अस्मिन् ॥

7.069.05a yo ha sya vāṁ rathirā vasta usrā ratho yujānaḥ pariyāti vartiḥ ।
7.069.05c tena naḥ śaṁ yor uṣaso vyuṣṭau ny aśvinā vahataṁ yajñe asmin ॥

7.069.06a नरा गौरेव विद्युतं तृषाणास्माकमद्य सवनोप यातम् ।

7.069.06c पुरुत्रा हि वां मतिभिर्हवन्ते मा वामन्ये नि यमन्देवयन्तः ॥

7.069.06a narā gaureva vidyutaṁ tṛṣāṇāsmākam adya savanopa yātam ।
7.069.06c purutrā hi vām matibhir havante mā vām anye ni yaman devayantaḥ ॥

7.069.07a युवं भुज्युमवविद्धं समुद्र उदूहथुरर्णसो अस्रिधानैः ।

7.069.07c पतत्रिभिरश्रमैरव्यथिभिर्दंसनाभिरश्विना पारयन्ता ॥

7.069.07a yuvam bhujyum avaviddhaṁ samudra ud ūhathur arṇaso asridhānaiḥ |
7.069.07c patatribhir aśramair avyathibhir daṁsanābhir aśvinā pārayantā ||

7.069.08a नू मे हवमा शृणुतं युवाना यासिष्टं वर्तिरश्विनाविरावत् ।

7.069.08c धत्तं रत्नानि जरतं च सूरीन्यूयं पात स्वस्तिभिः सदा नः ॥

7.069.08a nū me havam ā śṛṇutaṁ yuvānā yāsiṣṭaṁ vartir aśvināv irāvat |
7.069.08c dhattaṁ ratnāni jarataṁ ca sūrīn yūyam pāta svastibhiḥ sadā naḥ ||

7.070.01a आ विश्ववाराश्विना गतं नः प्र तत्स्थानमवाचि वां पृथिव्याम् ।

7.070.01c अश्वो न वाजी शुनपृष्ठो अस्थादा यत्सेदथुर्ध्रुवसे न योनिम् ॥

7.070.01a ā viśvavārāśvinā gataṁ naḥ pra tat sthānam avāci vām pṛthivyām |
7.070.01c aśvo na vājī śunapṛṣṭho asthād ā yat sedathur dhruvase na yonim ||

7.070.02a सिषक्ति सा वां सुमतिश्चनिष्ठातापि घर्मो मनुषो दुरोणे ।

7.070.02c यो वां समुद्रान्सरितः पिपर्त्येतग्वा चिन्न सुयुजा युजानः ॥

7.070.02a siṣakti sā vāṁ sumatiś caniṣṭhātāpi gharmo manuṣo duroṇe |
7.070.02c yo vāṁ samudrān saritaḥ piparty etagvā cin na suyujā yujānaḥ ||

7.070.03a यानि स्थानान्यश्विना दधाथे दिवो यह्वीष्वोषधीषु विक्षु ।

7.070.03c नि पर्वतस्य मूर्धनि सदन्तेषं जनाय दाशुषे वहन्ता ॥

7.070.03a yāni sthānāny aśvinā dadhāthe divo yahvīṣv oṣadhīṣu vikṣu |
7.070.03c ni parvatasya mūrdhani sadanteṣaṁ janāya dāśuṣe vahantā ||

7.070.04a चनिष्टं देवा ओषधीष्वप्सु यद्योग्या अश्नवैथे ऋषीणाम् ।

7.070.04c पुरूणि रत्ना दधतौ न्य१स्मे अनु पूर्वाणि चख्यथुर्युगानि ॥

7.070.04a caniṣṭaṁ devā oṣadhīṣv apsu yad yogyā aśnavaithe ṛṣīṇām |
7.070.04c purūṇi ratnā dadhatau ny a1sme anu pūrvāṇi cakhyathur yugāni ||

7.070.05a शुश्रुवांसा चिदश्विना पुरूण्यभि ब्रह्माणि चक्षाथे ऋषीणाम् ।

7.070.05c प्रति प्र यातं वरमा जनायास्मे वामस्तु सुमतिश्चनिष्ठा ॥

7.070.05a śuśruvāṁsā cid aśvinā purūṇy abhi brahmāṇi cakṣāthe ṛṣīṇām |
7.070.05c prati pra yātaṁ varam ā janāyāsme vām astu sumatiś caniṣṭhā ||

7.070.06a यो वां यज्ञो नासत्या हविष्मान्कृतब्रह्मा समर्यो३ भवाति ।

7.070.06c उप प्र यातं वरमा वसिष्ठमिमा ब्रह्माण्यृच्यन्ते युवभ्याम् ॥

7.070.06a yo vāṁ yajño nāsatyā haviṣmān kṛtabrahmā samaryo3 bhavāti |
7.070.06c upa pra yātaṁ varam ā vasiṣṭham imā brahmāṇy ṛcyante yuvabhyām ||

7.070.07a इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।

7.070.07c इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥

7.070.07a iyam manīṣā iyam aśvinā gīr imāṁ suvṛktiṁ vṛṣaṇā juṣethām |
7.070.07c imā brahmāṇi yuvayūny agman yūyam pāta svastibhiḥ sadā naḥ ||

7.071.01a अप स्वसुरुषसो नग्जिहीते रिणक्ति कृष्णीररुषाय पन्थाम् ।

7.071.01c अश्वामघा गोमघा वां हुवेम दिवा नक्तं शरुमस्मद्युयोतम् ॥

7.071.01a apa svasur uṣaso nag jihīte riṇakti kṛṣṇīr aruṣāya panthām |
7.071.01c aśvāmaghā gomaghā vāṁ huvema divā naktaṁ śarum asmad yuyotam ||

7.071.02a उपायातं दाशुषे मर्त्याय रथेन वाममश्विना वहन्ता ।

7.071.02c युयुतमस्मदनिराममीवां दिवा नक्तं माध्वी त्रासीथां नः ॥

7.071.02a upāyātaṁ dāśuṣe martyāya rathena vāmam aśvinā vahantā |
7.071.02c yuyutam asmad anirām amīvāṁ divā naktam mādhvī trāsīthāṁ naḥ ||

7.071.03a आ वां रथमवमस्यां व्युष्टौ सुम्नायवो वृषणो वर्तयन्तु ।

7.071.03c स्यूमगभस्तिमृतयुग्भिरश्वैराश्विना वसुमन्तं वहेथाम् ॥

7.071.03a ā vāṁ ratham avamasyāṁ vyuṣṭau sumnāyavo vṛṣaṇo vartayantu |
7.071.03c syūmagabhastim ṛtayugbhir aśvair āśvinā vasumantaṁ vahethām ||

7.071.04a यो वां रथो नृपती अस्ति वोळ्हा त्रिवन्धुरो वसुमाँ उस्रयामा ।

7.071.04c आ न एना नासत्योप यातमभि यद्वां विश्वप्स्न्यो जिगाति ॥

7.071.04a yo vāṁ ratho nṛpatī asti voḷhā trivandhuro vasumām̐ usrayāmā |
7.071.04c ā na enā nāsatyopa yātam abhi yad vāṁ viśvapsnyo jigāti ||

7.071.05a युवं च्यवानं जरसोऽमुमुक्तं नि पेदव ऊहथुराशुमश्वम् ।

7.071.05c निरंहसस्तमस स्पर्तमत्रिं नि जाहुषं शिथिरे धातमन्तः ॥

7.071.05a yuvaṁ cyavānaṁ jaraso 'mumuktaṁ ni pedava ūhathur āśum aśvam |
7.071.05c nir aṁhasas tamasa spartam atriṁ ni jāhuṣaṁ śithire dhātam antaḥ ||

7.071.06a इयं मनीषा इयमश्विना गीरिमां सुवृक्तिं वृषणा जुषेथाम् ।

7.071.06c इमा ब्रह्माणि युवयून्यग्मन्यूयं पात स्वस्तिभिः सदा नः ॥

7.071.06a iyam manīṣā iyam aśvinā gīr imāṁ suvṛktiṁ vṛṣaṇā juṣethām |
7.071.06c imā brahmāṇi yuvayūny agman yūyam pāta svastibhiḥ sadā naḥ ||

7.072.01a आ गोमता नासत्या रथेनाश्वावता पुरुश्चन्द्रेण यातम् ।

7.072.01c अभि वां विश्वा नियुतः सचन्ते स्पार्हया श्रिया तन्वा शुभाना ॥

7.072.01a ā gomatā nāsatyā rathenāśvāvatā puruścandreṇa yātam |
7.072.01c abhi vāṁ viśvā niyutaḥ sacante spārhayā śriyā tanvā śubhānā ||

7.072.02a आ नो देवेभिरुप यातमर्वाक्सजोषसा नासत्या रथेन ।

7.072.02c युवोर्हि नः सख्या पित्र्याणि समानो बन्धुरुत तस्य वित्तम् ॥

7.072.02a ā no devebhir upa yātam arvāk sajoṣasā nāsatyā rathena |
7.072.02c yuvor hi naḥ sakhyā pitryāṇi samāno bandhur uta tasya vittam ||

7.072.03a उदु स्तोमासो अश्विनोरबुध्रञ्जामि ब्रह्माण्युषसश्च देवीः ।

7.072.03c आविवासन्रोदसी धिष्ण्येमे अच्छा विप्रो नासत्या विवक्ति ॥

7.072.03a ud u stomāso aśvinor abudhrañ jāmi brahmāṇy uṣasaś ca devīḥ |
7.072.03c āvivāsan rodasī dhiṣṇyeme acchā vipro nāsatyā vivakti ||

7.072.04a वि चेदुच्छन्त्यश्विना उषासः प्र वां ब्रह्माणि कारवो भरन्ते ।

7.072.04c ऊर्ध्वं भानुं सविता देवो अश्रेद्बृहदग्नयः समिधा जरन्ते ॥

7.072.04a vi ced ucchanty aśvinā uṣāsaḥ pra vām brahmāṇi kāravo bharante |
7.072.04c ūrdhvam bhānuṁ savitā devo aśred bṛhad agnayaḥ samidhā jarante ||

7.072.05a आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।

7.072.05c आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥

7.072.05a ā pa̱ścāta̍n nāsa̱tyā pu̱rastā̱d āśvinā yātam adha̱rād uda̍ktāt |
7.072.05c ā vi̱śvata̱ḥ pāñca̍janyena rā̱yā yū̱yam pa̍ta sva̱stibhi̱ḥ sadā̍ naḥ ||

7.073.01a अतारिष्म तमसस्पारमस्य प्रति स्तोमं देवयन्तो दधानाः ।

7.073.01c पुरुदंसा पुरुतमा पुराजामर्त्या हवते अश्विना गीः ॥

7.073.01a atā̍riṣma̱ tama̍sas pā̱ram a̱sya pra̱ti̱ stoma̍ṁ deva̱yanto̱ dadhā̍nāḥ |
7.073.01c pu̱ru̱daṁsā̍ puru̱tamā̍ purā̱jāma̍rtyā havate a̱śvinā̱ gīḥ ||

7.073.02a न्यु प्रियो मनुषः सादि होता नासत्या यो यजते वन्दते च ।

7.073.02c अश्नीतं मध्वो अश्विना उपाक आ वां वोचे विदथेषु प्रयस्वान् ॥

7.073.02a ny u̍ pri̱yo manu̍ṣaḥ sādi̱ hotā̱ nāsa̍tyā̱ yo yaja̍te̱ vanda̍te ca |
7.073.02c a̱śnī̱tam madhvo̍ aśvinā upā̱ka ā vā̍ṁ voce vi̱datheṣu̱ praya̍svān ||

7.073.03a अहेम यज्ञं पथामुराणा इमां सुवृक्तिं वृषणा जुषेथाम् ।

7.073.03c श्रुष्टीवेव प्रेषितो वामबोधि प्रति स्तोमैर्जरमाणो वसिष्ठः ॥

7.073.03a ahe̍ma ya̱jñam pa̱thām urā̍ṇā̱ i̱māṁ su̍vṛ̱ktiṁ vṛ̱ṣaṇā ju̱ṣethām |
7.073.03c śru̱ṣṭī̱veva̱ pre̍ṣito vām abodhi̱ prati̱ stoma̍ir jaramā̱ṇo̱ vasi̍ṣṭhaḥ ||

7.073.04a उप त्या वह्नी गमतो विशं नो रक्षोहणा सम्भृता वीळुपाणी ।

7.073.04c समन्धांस्यग्मत मत्सराणि मा नो मर्धिष्टमा गतं शिवेन ॥

7.073.04a upa̱ tyā vahnī̍ gamato̱ viśa̍ṁ no rakṣo̱haṇā̱ sambhṛ̍tā vī̱ḻupā̍ṇī |
7.073.04c sam andhā̍ṁsy agmata matsa̱rāṇi̱ mā no̍ mardhiṣṭa̱m ā ga̍taṁ śi̱vena̍ ||

7.073.05a आ पश्चातान्नासत्या पुरस्तादाश्विना यातमधरादुदक्तात् ।

7.073.05c आ विश्वतः पाञ्चजन्येन राया यूयं पात स्वस्तिभिः सदा नः ॥

7.073.05a ā pa̱ścāta̍n nāsa̱tyā pu̱rastā̱d āśvinā yātam adha̱rād uda̍ktāt |
7.073.05c ā vi̱śvata̱ḥ pāñca̍janyena rā̱yā yū̱yam pa̍ta sva̱stibhi̱ḥ sadā̍ naḥ ||

7.074.01a इमा उ वां दिविष्टय उस्रा हवन्ते अश्विना ।

7.074.01c अयं वामह्वेऽवसे शचीवसू विशंविशं हि गच्छथः ॥

7.074.01a imā u vāṁ diviṣṭaya usrā havante aśvinā |
7.074.01c ayaṁ vām ahve 'vase śacīvasū viśaṁ-viśaṁ hi gacchathaḥ ||

7.074.02a युवं चित्रं ददथुर्भोजनं नरा चोदेथां सूनृतावते ।

7.074.02c अर्वाग्रथं समनसा नि यच्छतं पिबतं सोम्यं मधु ॥

7.074.02a yuvaṁ citraṁ dadathur bhojanaṁ narā codethāṁ sūnṛtāvate |
7.074.02c arvāg rathaṁ samanasā ni yacchatam pibataṁ somyam madhu ||

7.074.03a आ यातमुप भूषतं मध्वः पिबतमश्विना ।

7.074.03c दुग्धं पयो वृषणा जेन्यावसू मा नो मर्धिष्टमा गतम् ॥

7.074.03a ā yātam upa bhūṣatam madhvaḥ pibatam aśvinā |
7.074.03c dugdham payo vṛṣaṇā jenyāvasū mā no mardhiṣṭam ā gatam ||

7.074.04a अश्वासो ये वामुप दाशुषो गृहं युवां दीयन्ति बिभ्रतः ।

7.074.04c मक्षूयुभिर्नरा हयेभिरश्विना देवा यातमस्मयू ॥

7.074.04a aśvāso ye vām upa dāśuṣo gṛhaṁ yuvāṁ dīyanti bibhrataḥ |
7.074.04c makṣūyubhir narā hayebhir aśvinā devā yātam asmayū ||

7.074.05a अधा ह यन्तो अश्विना पृक्षः सचन्त सूरयः ।

7.074.05c ता यंसतो मघवद्भ्यो ध्रुवं यशश्छर्दिरस्मभ्यं नासत्या ॥

7.074.05a adhā ha yanto aśvinā pṛkṣaḥ sacanta sūrayaḥ |
7.074.05c tā yaṁsato maghavadbhyo dhruvaṁ yaśaś chardir asmabhyaṁ nāsatyā ||

7.074.06a प्र ये ययुरवृकासो रथा इव नृपातारो जनानाम् ।

7.074.06c उत स्वेन शवसा शूशुवुर्नर उत क्षियन्ति सुक्षितिम् ॥

7.074.06a pra ye yayur avṛkāso rathā iva nṛpātāro janānām |
7.074.06c uta svena śavasā śūśuvur nara uta kṣiyanti sukṣitim ||

7.075.01a व्युषा आवो दिविजा ऋतेनाविष्कृण्वाना महिमानमागात् ।

7.075.01c अप द्रुहस्तम आवरजुष्टमङ्गिरस्तमा पथ्या अजीगः ॥

7.075.01a vy u1ṣā āvo divijā ṛtenāviṣkṛṇvānā mahimānam āgāt |
7.075.01c apa druhas tama āvar ajuṣṭam aṅgirastamā pathyā ajīgaḥ ||

7.075.02a महे नो अद्य सुविताय बोध्युषो महे सौभगाय प्र यन्धि ।

7.075.02c चित्रं रयिं यशसं धेह्यस्मे देवि मर्तेषु मानुषि श्रवस्युम् ॥

7.075.02a mahe no adya suvitāya bodhy uṣo mahe saubhagāya pra yandhi |
7.075.02c citraṁ rayiṁ yaśasaṁ dhehy asme devi marteṣu mānuṣi śravasyum ||

7.075.03a एते त्ये भानवो दर्शतायाश्चित्रा उषसो अमृतास आगुः ।

7.075.03c जनयन्तो दैव्यानि व्रतान्यापृणन्तो अन्तरिक्षा व्यस्थुः ॥

7.075.03a ete tye bhānavo darśatāyāś citrā uṣaso amṛtāsa āguḥ |
7.075.03c janayanto daivyāni vratāny āpṛṇanto antarikṣā vy asthuḥ ||

7.075.04a एषा स्या युजाना पराकात्पञ्च क्षितीः परि सद्यो जिगाति ।

7.075.04c अभिपश्यन्ती वयुना जनानां दिवो दुहिता भुवनस्य पत्नी ॥

7.075.04a eṣā syā yujānā parākāt pañca kṣitīḥ pari sadyo jigāti |
7.075.04c abhipaśyantī vayunā janānāṁ divo duhitā bhuvanasya patnī ||

7.075.05a वाजिनीवती सूर्यस्य योषा चित्रामघा राय ईशे वसूनाम् ।

7.075.05c ऋषिष्टुता जरयन्ती मघोन्युषा उच्छति वह्निभिर्गृणाना ॥

7.075.05a vājinīvatī sūryasya yoṣā citrāmaghā rāya īśe vasūnām |
7.075.05c ṛṣiṣṭutā jarayantī maghony uṣā ucchati vahnibhir gṛṇānā ||

7.075.06a प्रति द्युतानामरुषासो अश्वाश्चित्रा अदृश्रन्नुषसं वहन्तः ।

7.075.06c याति शुभ्रा विश्वपिशा रथेन दधाति रत्नं विधते जनाय ॥

7.075.06a prati dyutānām aruṣāso aśvāś citrā adṛśrann uṣasaṁ vahantaḥ |
7.075.06c yāti śubhrā viśvapiśā rathena dadhāti ratnaṁ vidhate janāya ||

7.075.07a सत्या सत्येभिर्महती महद्भिर्देवी देवेभिर्यजता यजत्रैः ।

7.075.07c रुजद्दृळ्हानि दददुस्रियाणां प्रति गाव उषसं वावशन्त ॥

7.075.07a satyā satyebhir mahatī mahadbhir devī devebhir yajatā yajatraiḥ |
7.075.07c rujad dṛḷhāni dadad usriyāṇām prati gāva uṣasaṁ vāvaśanta ||

7.075.08a नू नो॒ गोम॑द्वी॒रव॑द्धेहि॒ रत्न॒मुषो॒ अश्वा॑वत्पुरु॒भोजो॑ अ॒स्मे ।

7.075.08c मा नो॑ ब॒र्हिः पु॑रु॒षता॑ नि॒दे क॑र्यू॒यं पा॑त स्व॒स्तिभि॒ः सदा॑ नः ॥

7.075.08a nū no̱ goma̍d vī̱rava̍d dhehi̱ ratna̱m uṣo̱ aśvā̍vat puru̱bhojo̍ a̱sme |
7.075.08c mā no̍ ba̱rhiḥ pu̍ru̱ṣatā̍ ni̱de ka̍r yū̱yam pā̍ta sva̱stibhi̱ḥ sadā̍ naḥ ||

7.076.01a उदु॒ ज्योति॑र॒मृतं॑ वि॒श्वज॑न्यं वि॒श्वान॑रः सवि॒ता दे॒वो अ॑श्रेत् ।

7.076.01c क्रत्वा॑ दे॒वाना॑मजनिष्ट॒ चक्षु॑रा॒विर॑क॒र्भुव॑नं॒ विश्व॑मु॒षाः ॥

7.076.01a ud u̱ jyoti̍r a̱mṛta̍ṁ vi̱śvaja̍nyaṁ vi̱śvāna̍raḥ savi̱tā de̱vo a̍śret |
7.076.01c kratvā̍ de̱vānā̍m ajaniṣṭa̱ cakṣu̍r ā̱vir a̍ka̱r bhuva̍na̱ṁ viśva̍m u̱ṣāḥ ||

7.076.02a प्र मे॒ पन्था॑ देव॒याना॑ अदृश्र॒न्नम॑र्धन्तो॒ वसु॑भि॒रिष्कृ॑तासः ।

7.076.02c अभू॑दु के॒तुरु॒षसः॑ पु॒रस्ता॑त्प्रती॒च्यागा॒दधि॑ ह॒र्म्येभ्यः॑ ॥

7.076.02a pra me̱ panthā̍ deva̱yānā̍ adṛśra̱nn ama̍rdhanto̱ vasu̍bhi̱r iṣkṛ̍tāsaḥ |
7.076.02c abhū̍d u ke̱tur u̱ṣasa̍ḥ pu̱rastā̍t pratī̱cy āgā̱d adhi̍ ha̱rmyebhya̍ḥ ||

7.076.03a तानीद॑हानि बहु॒लान्यास॒न्या प्रा॒चीन॒मुदि॑ता॒ सूर्य॑स्य ।

7.076.03c यतः॒ परि॑ जा॒र इ॑वा॒चर॒न्त्युषो॑ ददृ॒क्षे न पुन॑र्य॒तीव॑ ॥

7.076.03a tānīd ahā̍ni bahu̱lāny ā̍sa̱n yā prā̱cīna̱m udi̍tā̱ sūrya̍sya |
7.076.03c yata̱ḥ pari̍ jā̱ra i̍vā̱cara̱nty uṣo̍ dadṛ̱kṣe na puna̍r ya̱tīva̍ ||

7.076.04a त इद्दे॒वानां॑ सध॒माद॑ आसन्नृ॒तावा॑नः क॒वयः॑ पू॒र्व्यासः॑ ।

7.076.04c गू॒ळ्हं ज्योतिः॑ पि॒तरो॒ अन्व॑विन्दन्सत्यम॑न्त्रा अजनयन्नु॒षास॑म् ॥

7.076.04a ta id de̱vānā̍ṁ sadha̱māda̍ āsann ṛ̱tāvā̍naḥ ka̱vaya̍ḥ pū̱rvyāsa̍ḥ |
7.076.04c gū̱ḻhaṁ jyoti̍ḥ pi̱taro̱ anv a̍vindan sa̱tyama̍ntrā ajanayann u̱ṣāsa̍m ||

7.076.05a स॒मा॒न ऊ॒र्वे अधि॒ संग॑तासः॒ सं जा॑नते॒ न य॑तन्ते मि॒थस्ते ।

7.076.05c ते दे॒वानां॒ न मि॑नन्ति व्र॒तान्यम॑र्धन्तो॒ वसु॑भि॒र्याद॑मानाः ॥

7.076.05a sa̱mā̱na ū̱rve adhi̱ saṅga̍tāsa̱ḥ saṁ jā̍nate̱ na ya̍tante mi̱thas te |
7.076.05c te de̱vānā̱ṁ na mi̍nanti vra̱tāny ama̍rdhanto̱ vasu̍bhi̱r yāda̍mānāḥ ||

7.076.06a प्रति॑ त्वा॒ स्तोमै॑रीळते॒ वसि॑ष्ठा उष॒र्बु॑धः सुभगे तुष्टु॒वांसः॑ ।

7.076.06c गवां नेत्री वाजपत्नी न उच्छोषः सुजाते प्रथमा जरस्व ॥

7.076.06a prati tvā stomair īḷate vasiṣṭhā uṣarbudhaḥ subhage tuṣṭuvāṁsaḥ |
7.076.06c gavāṁ netrī vājapatnī na ucchoṣaḥ sujāte prathamā jarasva ||

7.076.07a एषा नेत्री राधसः सूनृतानामुषा उच्छन्ती रिभ्यते वसिष्ठैः ।

7.076.07c दीर्घश्रुतं रयिमस्मे दधाना यूयं पात स्वस्तिभिः सदा नः ॥

7.076.07a eṣā netrī rādhasaḥ sūnṛtānām uṣā ucchantī ribhyate vasiṣṭhaiḥ |
7.076.07c dīrghaśrutaṁ rayim asme dadhānā yūyam pāta svastibhiḥ sadā naḥ ||

7.077.01a उपो रुरुचे युवतिर्न योषा विश्वं जीवं प्रसुवन्ती चरायै ।

7.077.01c अभूदग्निः समिधे मानुषाणामकर्ज्योतिर्बाधमाना तमांसि ॥

7.077.01a upo ruruce yuvatir na yoṣā viśvaṁ jīvam prasuvantī carāyai |
7.077.01c abhūd agniḥ samidhe mānuṣāṇām akar jyotir bādhamānā tamāṁsi ||

7.077.02a विश्वं प्रतीची सप्रथा उदस्थाद्रुशद्वासो बिभ्रती शुक्रमश्वैत् ।

7.077.02c हिरण्यवर्णा सुदृशीकसंदृग्गवां माता नेत्र्यह्नामरोचि ॥

7.077.02a viśvam pratīcī saprathā ud asthād ruśad vāso bibhratī śukram aśvait |
7.077.02c hiraṇyavarṇā sudṛśīkasandṛg gavām mātā netry ahnām aroci ||

7.077.03a देवानां चक्षुः सुभगा वहन्ती श्वेतं नयन्ती सुदृशीकमश्वम् ।

7.077.03c उषा अदर्शि रश्मिभिर्व्यक्ता चित्रामघा विश्वमनु प्रभूता ॥

7.077.03a devānāṁ cakṣuḥ subhagā vahantī śvetaṁ nayantī sudṛśīkam aśvam |
7.077.03c uṣā adarśi raśmibhir vyaktā citrāmaghā viśvam anu prabhūtā ||

7.077.04a अन्तिवामा दूरे अमित्रमुच्छोर्वीं गव्यूतिमभयं कृधी नः ।

7.077.04c यावय द्वेष आ भरा वसूनि चोदय राधो गृणते मघोनि ॥

7.077.04a antivāmā dūre amitram ucchorvīṁ gavyūtim abhayaṁ kṛdhī naḥ |
7.077.04c yāvaya dveṣa ā bharā vasūni codaya rādho gṛṇate maghoni ||

7.077.05a अस्मे श्रेष्ठेभिर्भानुभिर्वि भाह्युषो देवि प्रतिरन्ती न आयुः ।

7.077.05c इषं च नो दधती विश्ववारे गोमदश्वावद्रथवच्च राधः ॥

7.077.05a asme śreṣṭhebhir bhānubhir vi bhāhy uṣo devi pratirantī na āyuḥ |
7.077.05c iṣaṁ ca no dadhatī viśvavāre gomad aśvāvad rathavac ca rādhaḥ ||

7.077.06a यां त्वा दिवो दुहितर्वर्धयन्त्युषः सुजाते मतिभिर्वसिष्ठाः ।

7.077.06c सास्मासु धा रयिमृष्वं बृहन्तं यूयं पात स्वस्तिभिः सदा नः ॥

7.077.06a yāṁ tvā divo duhitar vardhayanty uṣaḥ sujāte matibhir vasiṣṭhāḥ |
7.077.06c sāsmāsu dhā rayim ṛṣvam bṛhantaṁ yūyam pāta svastibhiḥ sadā naḥ ||

7.078.01a प्रति केतवः प्रथमा अदृश्रन्नूर्ध्वा अस्या अञ्जयो वि श्रयन्ते ।

7.078.01c उषो अर्वाचा बृहता रथेन ज्योतिष्मता वाममस्मभ्यं वक्षि ॥

7.078.01a prati ketavaḥ prathamā adṛśrann ūrdhvā asyā añjayo vi śrayante |
7.078.01c uṣo arvācā bṛhatā rathena jyotiṣmatā vāmam asmabhyaṁ vakṣi ||

7.078.02a प्रति षीमग्निर्जरते समिद्धः प्रति विप्रासो मतिभिर्गृणन्तः ।

7.078.02c उषा याति ज्योतिषा बाधमाना विश्वा तमांसि दुरिताप देवी ॥

7.078.02a prati ṣīm agnir jarate samiddhaḥ prati viprāso matibhir gṛṇantaḥ |
7.078.02c uṣā yāti jyotiṣā bādhamānā viśvā tamāṁsi duritāpa devī ||

7.078.03a एता उ त्याः प्रत्यदृश्रन्पुरस्ताज्ज्योतिर्यच्छन्तीरुषसो विभातीः ।

7.078.03c अजीजनन्सूर्यं यज्ञमग्निमपाचीनं तमो अगादजुष्टम् ॥

7.078.03a etā u tyāḥ praty adṛśran purastāj jyotir yacchantīr uṣaso vibhātīḥ |
7.078.03c ajījanan sūryaṁ yajñam agnim apācīnaṁ tamo agād ajuṣṭam ||

7.078.04a अचेति दिवो दुहिता मघोनी विश्वे पश्यन्त्युषसं विभातीम् ।

7.078.04c आस्थाद्रथं स्वधया युज्यमानमा यमश्वासः सुयुजो वहन्ति ॥

7.078.04a aceti divo duhitā maghonī viśve paśyanty uṣasaṁ vibhātīm |
7.078.04c āsthād rathaṁ svadhayā yujyamānam ā yam aśvāsaḥ suyujo vahanti ||

7.078.05a प्रति त्वाद्य सुमनसो बुधन्तास्माकासो मघवानो वयं च ।

7.078.05c तिल्विलायध्वमुषसो विभातीर्यूयं पात स्वस्तिभिः सदा नः ॥

7.078.05a prati tvādya sumanaso budhantāsmākāso maghavāno vayaṁ ca |
7.078.05c tilvilāyadhvam uṣaso vibhātīr yūyam pāta svastibhiḥ sadā naḥ ||

7.079.01a व्यु१षा आवः पथ्या३ जनानां पञ्च क्षितीर्मानुषीर्बोधयन्ती ।

7.079.01c सुसंदृग्भिरुक्षभिर्भानुमश्रेद्वि सूर्यो रोदसी चक्षसावः ॥

7.079.01a vy u1ṣā āvaḥ pathyā3 janānām pañca kṣitīr mānuṣīr bodhayantī |
7.079.01c susandṛgbhir ukṣabhir bhānum aśred vi sūryo rodasī cakṣasāvaḥ ||

7.079.02a व्यञ्जते दिवो अन्तेष्वक्तून्विशो न युक्ता उषसो यतन्ते ।

7.079.02c सं ते गावस्तम आ वर्तयन्ति ज्योतिर्यच्छन्ति सवितेव बाहू ॥

7.079.02a vy añjate divo anteṣv aktūn viśo na yuktā uṣaso yatante |
7.079.02c saṁ te gāvas tama ā vartayanti jyotir yacchanti saviteva bāhū ||

7.079.03a अभूदुषा इन्द्रतमा मघोन्यजीजनत्सुविताय श्रवांसि ।

7.079.03c वि दिवो देवी दुहिता दधात्यङ्गिरस्तमा सुकृते वसूनि ॥

7.079.03a abhūd uṣā indratamā maghony ajījanat suvitāya śravāṁsi |
7.079.03c vi divo devī duhitā dadhāty aṅgirastamā sukṛte vasūni ||

7.079.04a तावदुषो राधो अस्मभ्यं रास्व यावत्स्तोतृभ्यो अरदो गृणाना ।

7.079.04c यां त्वा जज्ञुर्वृषभस्या रवेण वि दृळ्हस्य दुरो अद्रेरौर्णोः ॥

7.079.04a tāvad uṣo rādho asmabhyaṁ rāsva yāvat stotṛbhyo arado gṛṇānā |
7.079.04c yāṁ tvā jajñur vṛṣabhasyā raveṇa vi dṛḷhasya duro adrer aurṇoḥ ||

7.079.05a देवंदेवं राधसे चोदयन्त्यस्मद्र्यक्सूनृता ईरयन्ती ।

7.079.05c व्युच्छन्ती नः सनये धियो धा यूयं पात स्वस्तिभिः सदा नः ॥

7.079.05a devaṁ-devaṁ rādhase codayanty asmadryak sūnṛtā īrayantī |
7.079.05c vyucchantī naḥ sanaye dhiyo dhā yūyam pāta svastibhiḥ sadā naḥ ||

7.080.01a प्रति स्तोमेभिरुषसं वसिष्ठा गीर्भिर्विप्रासः प्रथमा अबुध्रन् ।

7.080.01c विवर्तयन्तीं रजसी समन्ते आविष्कृण्वतीं भुवनानि विश्वा ॥

7.080.01a prati stomebhir uṣasaṁ vasiṣṭhā gīrbhir viprāsaḥ prathamā abudhran |
7.080.01c vivartayantīṁ rajasī samante āviṣkṛṇvatīm bhuvanāni viśvā ||

7.080.02a एषा स्या नव्यमायुर्दधाना गूढ्वी तमो ज्योतिषोषा अबोधि ।

7.080.02c अग्र एति युवतिरह्रयाणा प्राचिकितत्सूर्यं यज्ञमग्निम् ॥

7.080.02a eṣā syā navyam āyur dadhānā gūḍhvī tamo jyotiṣoṣā abodhi |
7.080.02c agra eti yuvatir ahrayāṇā prācikitat sūryaṁ yajñam agnim ||

7.080.03a अश्वावतीर्गोमतीर्न उषासो वीरवतीः सदमुच्छन्तु भद्राः ।

7.080.03c घृतं दुहाना विश्वतः प्रपीता यूयं पात स्वस्तिभिः सदा नः ॥

7.080.03a aśvāvatīr gomatīr na uṣāso vīravatīḥ sadam ucchantu bhadrāḥ |
7.080.03c ghṛtaṁ duhānā viśvataḥ prapītā yūyam pāta svastibhiḥ sadā naḥ ||

7.081.01a प्रत्यु अदर्श्यायत्यु१च्छन्ती दुहिता दिवः ।

7.081.01c अपो महि व्ययति चक्षसे तमो ज्योतिष्कृणोति सूनरी ॥

7.081.01a praty u adarśy āyaty u1cchantī duhitā divaḥ |
7.081.01c apo mahi vyayati cakṣase tamo jyotiṣ kṛṇoti sūnarī ||

7.081.02a उदुस्रियाः सृजते सूर्यः सचाँ उद्यन्नक्षत्रमर्चिवत् ।

7.081.02c तवेदुषो व्युषि सूर्यस्य च सं भक्तेन गमेमहि ॥

7.081.02a ud usriyāḥ sṛjate sūryaḥ sacām̐ udyan nakṣatram arcivat |
7.081.02c taved uṣo vyuṣi sūryasya ca sam bhaktena gamemahi ||

7.081.03a प्रति त्वा दुहितर्दिव उषो जीरा अभुत्स्महि ।

7.081.03c या वहसि पुरु स्पार्हं वनन्वति रत्नं न दाशुषे मयः ॥

7.081.03a prati tvā duhitar diva uṣo jīrā abhutsmahi |
7.081.03c yā vahasi puru spārhaṁ vananvati ratnaṁ na dāśuṣe mayaḥ ||

7.081.04a उच्छन्ती या कृणोषि मंहना महि प्रख्यै देवि स्वर्दृशे ।

7.081.04c तस्यास्ते रत्नभाज ईमहे वयं स्याम मातुर्न सूनवः ॥

7.081.04a ucchantī yā kṛṇoṣi maṁhanā mahi prakhyai devi svar dṛśe |
7.081.04c tasyās te ratnabhāja īmahe vayaṁ syāma mātur na sūnavaḥ ||

7.081.05a तच्चित्रं राध आ भरोषो यद्दीर्घश्रुत्तमम् ।

7.081.05c यत्ते दिवो दुहितर्मर्तभोजनं तद्रास्व भुनजामहै ॥

7.081.05a tac citraṁ rādha ā bharoṣo yad dīrghaśruttamam |
7.081.05c yat te divo duhitar martabhojanaṁ tad rāsva bhunajāmahai ||

7.081.06a श्रवः सूरिभ्यो अमृतं वसुत्वनं वाजाँ अस्मभ्यं गोमतः ।

7.081.06c चोदयित्री मघोनः सूनृतावत्युषा उच्छदप स्रिधः ॥

7.081.06a śravaḥ sūribhyo amṛtaṁ vasutvanaṁ vājām̐ asmabhyaṁ gomataḥ |
7.081.06c codayitrī maghonaḥ sūnṛtāvaty uṣā ucchad apa sridhaḥ ||

7.082.01a इन्द्रावरुणा युवमध्वराय नो विशे जनाय महि शर्म यच्छतम् ।

7.082.01c दीर्घप्रयज्युमति यो वनुष्यति वयं जयेम पृतनासु दूढ्यः ॥

7.082.01a indrāvaruṇā yuvam adhvarāya no viśe janāya mahi śarma yacchatam |
7.082.01c dīrghaprayajyum ati yo vanuṣyati vayaṁ jayema pṛtanāsu dūḍhyaḥ ||

7.082.02a सम्राळन्यः स्वराळन्य उच्यते वां महान्ताविन्द्रावरुणा महावसू ।

7.082.02c विश्वे देवासः परमे व्योमनि सं वामोजो वृषणा सं बलं दधुः ॥

7.082.02a samrāḻ anyaḥ svarāḻ anya ucyate vām mahāntāv indrāvaruṇā mahāvasū |
7.082.02c viśve devāsaḥ parame vyomani saṁ vām ojo vṛṣaṇā sam balaṁ dadhuḥ ||

7.082.03a अन्वपां खान्यतृन्तमोजसा सूर्यमैरयतं दिवि प्रभुम् ।

7.082.03c इन्द्रावरुणा मदे अस्य मायिनोऽपिन्वतमपितः पिन्वतं धियः ॥

7.082.03a anv apāṁ khāny atṛntam ojasā sūryam airayataṁ divi prabhum |
7.082.03c indrāvaruṇā made asya māyino 'pinvatam apitaḥ pinvataṁ dhiyaḥ ||

7.082.04a युवामिद्युत्सु पृतनासु वह्नयो युवां क्षेमस्य प्रसवे मितज्ञवः ।

7.082.04c ईशाना वस्व उभयस्य कारव इन्द्रावरुणा सुहवा हवामहे ॥

7.082.04a yuvām id yutsu pṛtanāsu vahnayo yuvāṁ kṣemasya prasave mitajñavaḥ |
7.082.04c īśānā vasva ubhayasya kārava indrāvaruṇā suhavā havāmahe ||

7.082.05a इन्द्रावरुणा यदिमानि चक्रथुर्विश्वा जातानि भुवनस्य मज्मना ।

7.082.05c क्षेमेण मित्रो वरुणं दुवस्यति मरुद्भिरुग्रः शुभमन्य ईयते ॥

7.082.05a indrāvaruṇā yad imāni cakrathur viśvā jātāni bhuvanasya majmanā |
7.082.05c kṣemeṇa mitro varuṇaṁ duvasyati marudbhir ugraḥ śubham anya īyate ||

7.082.06a महे शुल्काय वरुणस्य नु त्विष ओजो मिमाते ध्रुवमस्य यत्स्वम् ।

7.082.06c अजामिमन्यः श्नथयन्तमातिरद्दभ्रेभिरन्यः प्र वृणोति भूयसः ॥

7.082.06a mahe śulkāya varuṇasya nu tviṣa ojo mimāte dhruvam asya yat svam |
7.082.06c ajāmim anyaḥ śnathayantam ātirad dabhrebhir anyaḥ pra vṛṇoti bhūyasaḥ ||

7.082.07a न तमंहो न दुरितानि मर्त्यमिन्द्रावरुणा न तपः कुतश्चन ।

7.082.07c यस्य देवा गच्छथो वीथो अध्वरं न तं मर्तस्य नशते परिह्वृतिः ॥

7.082.07a na tam aṁho na duritāni martyam indrāvaruṇā na tapaḥ kutaś cana |
7.082.07c yasya devā gacchatho vītho adhvaraṁ na tam martasya naśate parihvṛtiḥ ||

7.082.08a अर्वाङ्नरा दैव्येनावसा गतं शृणुतं हवं यदि मे जुजोषथः ।

7.082.08c युवोर्हि सख्यमुत वा यदाप्यं मार्डीकमिन्द्रावरुणा नि यच्छतम् ॥

7.082.08a arvāṅ narā daivyenāvasā gataṁ śṛṇutaṁ havaṁ yadi me jujoṣathaḥ |
7.082.08c yuvor hi sakhyam uta vā yad āpyam mārḍīkam indrāvaruṇā ni yacchatam ||

7.082.09a अस्माकमिन्द्रावरुणा भरेभरे पुरोयोधा भवतं कृष्ट्योजसा ।

7.082.09c यद्वां हवन्त उभये अध स्पृधि नरस्तोकस्य तनयस्य सातिषु ॥

7.082.09a asmākam indrāvaruṇā bhare-bhare puroyodhā bhavataṁ kṛṣṭyojasā |
7.082.09c yad vāṁ havanta ubhaye adha spṛdhi naras tokasya tanayasya sātiṣu ||

7.082.10a अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।

7.082.10c अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥

7.082.10a asme indro varuṇo mitro aryamā dyumnaṁ yacchantu mahi śarma saprathaḥ |
7.082.10c avadhraṁ jyotir aditer ṛtāvṛdho devasya ślokaṁ savitur manāmahe ||

7.083.01a युवां नरा पश्यमानास आप्यं प्राचा गव्यन्तः पृथुपर्शवो ययुः ।

7.083.01c दासा च वृत्रा हतमार्याणि च सुदासमिन्द्रावरुणावसावतम् ॥

7.083.01a yuvāṁ narā paśyamānāsa āpyam prācā gavyantaḥ pṛthuparśavo yayuḥ |
7.083.01c dāsā ca vṛtrā hatam āryāṇi ca sudāsam indrāvaruṇāvasāvatam ||

7.083.02a यत्रा नरः समयन्ते कृतध्वजो यस्मिन्नाजा भवति किं चन प्रियम् ।

7.083.02c यत्रा भयन्ते भुवना स्वर्दृशस्तत्रा न इन्द्रावरुणाधि वोचतम् ॥

7.083.02a yatrā naraḥ samayante kṛtadhvajo yasminn ājā bhavati kiṁ cana priyam |
7.083.02c yatrā bhayante bhuvanā svardṛśas tatrā na indrāvaruṇādhi vocatam ||

7.083.03a सं भूम्या अन्ता ध्वसिरा अदृक्षतेन्द्रावरुणा दिवि घोष आरुहत् ।

7.083.03c अस्थुर्जनानामुप मामरातयोऽर्वागवसा हवनश्रुता गतम् ॥

7.083.03a sam bhūmyā antā dhvasirā adṛkṣatendrāvaruṇā divi ghoṣa āruhat |
7.083.03c asthur janānām upa mām arātayo 'rvāg avasā havanaśrutā gatam ||

7.083.04a इन्द्रावरुणा वधनाभिरप्रति भेदं वन्वन्ता प्र सुदासमावतम् ।

7.083.04c ब्रह्माण्येषां शृणुतं हवीमनि सत्या तृत्सूनामभवत्पुरोहितिः ॥

7.083.04a indrāvaruṇā vadhanābhir aprati bhedaṁ vanvantā pra sudāsam āvatam |
7.083.04c brahmāṇy eṣāṁ śṛṇutaṁ havīmani satyā tṛtsūnām abhavat purohitiḥ ||

7.083.05a इन्द्रावरुणावभ्या तपन्ति माघान्यर्यो वनुषामरातयः ।

7.083.05c युवं हि वस्व उभयस्य राजथोऽध स्मा नोऽवतं पार्ये दिवि ॥

7.083.05a indrāvaruṇāv abhy ā tapanti māghāny aryo vanuṣām arātayaḥ |
7.083.05c yuvaṁ hi vasva ubhayasya rājatho 'dha smā no 'vatam pārye divi ||

7.083.06a युवां हवन्त उभयास आजिष्विन्द्रं च वस्वो वरुणं च सातये ।

7.083.06c यत्र राजभिर्दशभिर्निबाधितं प्र सुदासमावतं तृत्सुभिः सह ॥

7.083.06a yuvāṁ havanta ubhayāsa ājiṣv indraṁ ca vasvo varuṇaṁ ca sātaye |
7.083.06c yatra rājabhir daśabhir nibādhitam pra sudāsam āvataṁ tṛtsubhiḥ saha ||

7.083.07a दश राजानः समिता अयज्यवः सुदासमिन्द्रावरुणा न युयुधुः ।

7.083.07c सत्या नृणामद्मसदामुपस्तुतिर्देवा एषामभवन्देवहूतिषु ॥

7.083.07a daśa rājānaḥ samitā ayajyavaḥ sudāsam indrāvaruṇā na yuyudhuḥ |
7.083.07c satyā nṛṇām admasadām upastutir devā eṣām abhavan devahūtiṣu ||

7.083.08a दाशराज्ञे परियत्ताय विश्वतः सुदास इन्द्रावरुणावशिक्षतम् ।

7.083.08c श्वित्यञ्चो यत्र नमसा कपर्दिनो धिया धीवन्तो असपन्त तृत्सवः ॥

7.083.08a dāśarājñe pariyattāya viśvataḥ sudāsa indrāvaruṇāv aśikṣatam |
7.083.08c śvityañco yatra namasā kapardino dhiyā dhīvanto asapanta tṛtsavaḥ ||

7.083.09a वृत्राण्यन्यः समिथेषु जिघ्नते व्रतान्यन्यो अभि रक्षते सदा ।

7.083.09c हवामहे वां वृषणा सुवृक्तिभिरस्मे इन्द्रावरुणा शर्म यच्छतम् ॥

7.083.09a vṛtrāṇy anyaḥ samitheṣu jighnate vratāny anyo abhi rakṣate sadā |
7.083.09c havāmahe vāṁ vṛṣaṇā suvṛktibhir asme indrāvaruṇā śarma yacchatam ||

7.083.10a अस्मे इन्द्रो वरुणो मित्रो अर्यमा द्युम्नं यच्छन्तु महि शर्म सप्रथः ।

7.083.10c अवध्रं ज्योतिरदितेर्ऋतावृधो देवस्य श्लोकं सवितुर्मनामहे ॥

7.083.10a asme indro varuṇo mitro aryamā dyumnaṁ yacchantu mahi śarma saprathaḥ |
7.083.10c avadhraṁ jyotir aditer ṛtāvṛdho devasya ślokaṁ savitur manāmahe ||

7.084.01a आ वां राजानावध्वरे ववृत्यां हव्येभिरिन्द्रावरुणा नमोभिः ।

7.084.01c प्र वां घृताची बाह्वोर्दधाना परि त्मना विषुरूपा जिगाति ॥

7.084.01a ā vāṁ rājānāv adhvare vavṛtyāṁ havyebhir indrāvaruṇā namobhiḥ |
7.084.01c pra vāṁ ghṛtācī bāhvor dadhānā pari tmanā viṣurūpā jigāti ||

7.084.02a युवो राष्ट्रं बृहदिन्वति द्यौर्यौ सेतृभिररज्जुभिः सिनीथः ।

7.084.02c परि नो हेळो वरुणस्य वृज्या उरुं न इन्द्रः कृणवदु लोकम् ॥

7.084.02a yuvo rāṣṭram bṛhad invati dyaur yau setṛbhir arajjubhiḥ sinīthaḥ |
7.084.02c pari no helo varuṇasya vṛjyā uruṁ na indraḥ kṛṇavad u lokam ||

7.084.03a कृतं नो यज्ञं विदथेषु चारुं कृतं ब्रह्माणि सूरिषु प्रशस्ता ।

7.084.03c उपो रयिर्देवजूतो न एतु प्र ण स्पार्हाभिरूतिभिस्तिरेतम् ॥

7.084.03a kṛtaṁ no yajñaṁ vidatheṣu cāruṁ kṛtam brahmāṇi sūriṣu praśastā |
7.084.03c upo rayir devajūto na etu pra ṇa spārhābhir ūtibhis tiretam ||

7.084.04a अस्मे इन्द्रावरुणा विश्ववारं रयिं धत्तं वसुमन्तं पुरुक्षुम् ।

7.084.04c प्र य आदित्यो अनृता मिनात्यमिता शूरो दयते वसूनि ॥

7.084.04a asme indrāvaruṇā viśvavāraṁ rayiṁ dhattaṁ vasumantam purukṣum |
7.084.04c pra ya ādityo anṛtā mināty amitā śūro dayate vasūni ||

7.084.05a इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।

7.084.05c सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥

7.084.05a iyam indraṁ varuṇam aṣṭa me gīḥ prāvat toke tanaye tūtujānā |
7.084.05c suratnāso devavītiṁ gamema yūyam pāta svastibhiḥ sadā naḥ ||

7.085.01a पुनीषे वामरक्षसं मनीषां सोममिन्द्राय वरुणाय जुह्वत् ।

7.085.01c घृतप्रतीकामुषसं न देवीं ता नो यामन्नुरुष्यतामभीके ॥

7.085.01a punīṣe vām arakṣasam manīṣāṁ somam indrāya varuṇāya juhvat |
7.085.01c ghṛtapratīkām uṣasaṁ na devīṁ tā no yāmann uruṣyatām abhīke ||

7.085.02a स्पर्धन्ते वा उ देवहूये अत्र येषु ध्वजेषु दिद्यवः पतन्ति ।

7.085.02c युवं ताँ इन्द्रावरुणावमित्रान्हतं पराचः शर्वा विषूचः ॥

7.085.02a spardhante vā u devahūye atra yeṣu dhvajeṣu didyavaḥ patanti |
7.085.02c yuvaṁ tām̐ indrāvaruṇāv amitrān hatam parācaḥ śarvā viṣūcaḥ ||

7.085.03a आपश्चिद्धि स्वयशसः सदस्सु देवीरिन्द्रं वरुणं देवता धुः ।

7.085.03c कृष्टीरन्यो धारयति प्रविक्ता वृत्राण्यन्यो अप्रतीनि हन्ति ॥

7.085.03a āpaś cid dhi svayaśasaḥ sadassu devīr indraṁ varuṇaṁ devatā dhuḥ |
7.085.03c kṛṣṭīr anyo dhārayati praviktā vṛtrāṇy anyo apratīni hanti ||

7.085.04a स सुक्रतुरृतचिदस्तु होता य आदित्य शवसा वां नमस्वान् ।

7.085.04c आववर्तदवसे वां हविष्मानसदित्स सुविताय प्रयस्वान् ॥

7.085.04a sa sukratur ṛtacid astu hotā ya āditya śavasā vāṁ namasvān |
7.085.04c āvavartad avase vāṁ haviṣmān asad it sa suvitāya prayasvān ||

7.085.05a इयमिन्द्रं वरुणमष्ट मे गीः प्रावत्तोके तनये तूतुजाना ।

7.085.05c सुरत्नासो देववीतिं गमेम यूयं पात स्वस्तिभिः सदा नः ॥

7.085.05a iyam indraṁ varuṇam aṣṭa me gīḥ prāvat toke tanaye tūtujānā |
7.085.05c suratnāso devavītiṁ gamema yūyam pāta svastibhiḥ sadā naḥ ||

7.086.01a धीरा त्वस्य महिना जनूंषि वि यस्तस्तम्भ रोदसी चिदुर्वी ।

7.086.01c प्र नाकमृष्वं नुनुदे बृहन्तं द्विता नक्षत्रं पप्रथच्च भूम ॥

7.086.01a dhīrā tv asya mahinā janūṁṣi vi yas tastambha rodasī cid urvī |
7.086.01c pra nākam ṛṣvaṁ nunude bṛhantaṁ dvitā nakṣatram paprathac ca bhūma ||

7.086.02a उत स्वया तन्वा३ सं वदे तत्कदा न्वऽन्तर्वरुणे भुवानि ।

7.086.02c किं मे हव्यमहृणानो जुषेत कदा मृळीकं सुमना अभि ख्यम् ॥

7.086.02a uta svayā tanvā3 saṁ vade tat kadā nv a1ntar varuṇe bhuvāni |
7.086.02c kim me havyam ahṛṇāno juṣeta kadā mṛḷīkaṁ sumanā abhi khyam ||

7.086.03a पृच्छे तदेनो वरुण दिदृक्षूपो एमि चिकितुषो विपृच्छम् ।

7.086.03c समानमिन्मे कवयश्चिदाहुरयं ह तुभ्यं वरुणो हृणीते ॥

7.086.03a pṛcche tad eno varuṇa didṛkṣūpo emi cikituṣo vipṛccham |
7.086.03c samānam in me kavayaś cid āhur ayaṁ ha tubhyaṁ varuṇo hṛṇīte ||

7.086.04a किमाग आस वरुण ज्येष्ठं यत्स्तोतारं जिघांससि सखायम् ।

7.086.04c प्र तन्मे वोचो दूळभ स्वधावोऽव त्वानेना नमसा तुर इयाम् ॥

7.086.04a kim āga āsa varuṇa jyeṣṭhaṁ yat stotāraṁ jighāṁsasi sakhāyam |
7.086.04c pra tan me voco dūḷabha svadhāvo 'va tvānenā namasā tura iyām ||

7.086.05a अव द्रुग्धानि पित्र्या सृजा नोऽव या वयं चकृमा तनूभिः ।

7.086.05c अव राजन्पशुतृपं न तायुं सृजा वत्सं न दाम्नो वसिष्ठम् ॥

7.086.05a ava drugdhāni pitryā sṛjā no 'va yā vayaṁ cakṛmā tanūbhiḥ |
7.086.05c ava rājan paśutṛpaṁ na tāyuṁ sṛjā vatsaṁ na dāmno vasiṣṭham ||

7.086.06a न स स्वो दक्षो वरुण ध्रुतिः सा सुरा मन्युर्विभीदको अचित्तिः ।

7.086.06c अस्ति ज्यायान्कनीयस उपारे स्वप्नश्चनेदनृतस्य प्रयोता ॥

7.086.06a na sa svo dakṣo varuṇa dhrutiḥ sā surā manyur vibhīdako acittiḥ |
7.086.06c asti jyāyān kanīyasa upāre svapnaś caned anṛtasya prayotā ||

7.086.07a अरं दासो न मीळ्हुषे कराण्यहं देवाय भूर्णयेऽनागाः ।

7.086.07c अचेतयदचितो देवो अर्यो गृत्सं राये कवितरो जुनाति ॥

7.086.07a aram dāso na mīḻhuṣe karāṇy aham devāya bhūrṇaye 'nāgāḥ |
7.086.07c acetayad acito devo aryo gṛtsam rāye kavitaro junāti ||

7.086.08a अयं सु तुभ्यं वरुण स्वधावो हृदि स्तोम उपश्रितश्चिदस्तु ।

7.086.08c शं नः क्षेमे शमु योगे नो अस्तु यूयं पात स्वस्तिभिः सदा नः ॥

7.086.08a ayam su tubhyam varuṇa svadhāvo hṛdi stoma upaśritaś cid astu |
7.086.08c śam naḥ kṣeme śam u yoge no astu yūyam pāta svastibhiḥ sadā naḥ ||

7.087.01a रदत्पथो वरुणः सूर्याय प्रार्णांसि समुद्रिया नदीनाम् ।

7.087.01c सर्गो न सृष्टो अर्वतीर्ऋतायञ्चकार महीरवनीरहभ्यः ॥

7.087.01a radat patho varuṇaḥ sūryāya prārṇāṁsi samudriyā nadīnām |
7.087.01c sargo na sṛṣṭo arvatīr ṛtāyañ cakāra mahīr avanīr ahabhyaḥ ||

7.087.02a आत्मा ते वातो रज आ नवीनोत्पशुर्न भूर्णिर्यवसे ससवान् ।

7.087.02c अन्तर्मही बृहती रोदसीमे विश्वा ते धाम वरुण प्रियाणि ॥

7.087.02a ātmā te vāto raja ā navīnot paśur na bhūrṇir yavase sasavān |
7.087.02c antar mahī bṛhatī rodasīme viśvā te dhāma varuṇa priyāṇi ||

7.087.03a परि स्पशो वरुणस्य स्मदिष्टा उभे पश्यन्ति रोदसी सुमेके ।

7.087.03c ऋतावानः कवयो यज्ञधीराः प्रचेतसो य इषयन्त मन्म ॥

7.087.03a pari spaśo varuṇasya smadiṣṭā ubhe paśyanti rodasī sumeke |
7.087.03c ṛtāvānaḥ kavayo yajñadhīrāḥ pracetaso ya iṣayanta manma ||

7.087.04a उवाच मे वरुणो मेधिराय त्रिः सप्त नामाघ्न्या बिभर्ति ।

7.087.04c विद्वान्पदस्य गुह्या न वोचद्युगाय विप्र उपराय शिक्षन् ॥

7.087.04a uvāca me varuṇo medhirāya triḥ sapta nāmāghnyā bibharti |
7.087.04c vidvān padasya guhyā na vocad yugāya vipra uparāya śikṣan ||

7.087.05a तिस्रो द्यावो निहिता अन्तरस्मिन्तिस्रो भूमीरुपराः षड्विधानाः ।

7.087.05c गृत्सो राजा वरुणश्चक्र एतं दिवि प्रेङ्खं हिरण्ययं शुभे कम् ॥

7.087.05a tisro dyāvo nihitā antar asmin tisro bhūmīr uparāḥ ṣaḍvidhānāḥ |
7.087.05c gṛtso rājā varuṇaś cakra etaṁ divi preṅkhaṁ hiraṇyayaṁ śubhe kam ||

7.087.06a अव सिन्धुं वरुणो द्यौरिव स्थाद्द्रप्सो न श्वेतो मृगस्तुविष्मान् ।

7.087.06c गम्भीरशंसो रजसो विमानः सुपारक्षत्रः सतो अस्य राजा ॥

7.087.06a ava sindhuṁ varuṇo dyaur iva sthād drapso na śveto mṛgas tuviṣmān |
7.087.06c gambhīraśaṁso rajaso vimānaḥ supārakṣatraḥ sato asya rājā ||

7.087.07a यो मृळयाति चक्रुषे चिदागो वयं स्याम वरुणे अनागाः ।

7.087.07c अनु व्रतान्यदितेर्ऋधन्तो यूयं पात स्वस्तिभिः सदा नः ॥

7.087.07a yo mṛḷayāti cakruṣe cid āgo vayaṁ syāma varuṇe anāgāḥ |
7.087.07c anu vratāny aditer ṛdhanto yūyam pāta svastibhiḥ sadā naḥ ||

7.088.01a प्र शुन्ध्युवं वरुणाय प्रेष्ठां मतिं वसिष्ठ मीळ्हुषे भरस्व ।

7.088.01c य ईमर्वाञ्चं करते यजत्रं सहस्रामघं वृषणं बृहन्तम् ॥

7.088.01a pra śundhyuvaṁ varuṇāya preṣṭhām matiṁ vasiṣṭha mīḷhuṣe bharasva |
7.088.01c ya īm arvāñcaṁ karate yajatraṁ sahasrāmaghaṁ vṛṣaṇam bṛhantam ||

7.088.02a अधा न्वस्य संदृशं जगन्वानग्नेरनीकं वरुणस्य मंसि ।

7.088.02c स्व१र्यदश्मन्नधिपा उ अन्धोऽभि मा वपुर्दृशये निनीयात् ॥

7.088.02a adhā nv asya sandṛśaṁ jaganvān agner anīkaṁ varuṇasya maṁsi |
7.088.02c sva1r yad aśmann adhipā u andho 'bhi mā vapur dṛśaye ninīyāt ||

7.088.03a आ यद्रुहाव वरुणश्च नावं प्र यत्समुद्रमीरयाव मध्यम् ।

7.088.03c अधि यदपां स्नुभिश्चराव प्र प्रेङ्ख ईङ्खयावहै शुभे कम् ॥

7.088.03a ā yad ruhāva varuṇaś ca nāvam pra yat samudram īrayāva madhyam |
7.088.03c adhi yad apāṁ snubhiś carāva pra preṅkha īṅkhayāvahai śubhe kam ||

7.088.04a वसिष्ठं ह वरुणो नाव्याधादृषिं चकार स्वपा महोभिः ।

7.088.04c स्तोतारं विप्रः सुदिनत्वे अह्नां यान्नु द्यावस्ततनन्यादुषासः ॥

7.088.04a vasiṣṭhaṁ ha varuṇo nāvy ādhād ṛṣiṁ cakāra svapā mahobhiḥ |
7.088.04c stotāraṁ vipraḥ sudinatve ahnāṁ yān nu dyāvas tatanan yād uṣāsaḥ ||

7.088.05a क्व१ त्यानि नौ सख्या बभूवुः सचावहे यदवृकं पुरा चित् ।

7.088.05c बृहन्तं मानं वरुण स्वधावः सहस्रद्वारं जगमा गृहं ते ॥

7.088.05a kva1 tyāni nau sakhyā babhūvuḥ sacāvahe yad avṛkam purā cit |
7.088.05c bṛhantam mānaṁ varuṇa svadhāvaḥ sahasradvāraṁ jagamā gṛhaṁ te ||

7.088.06a य आपिर्नित्यो वरुण प्रियः सन्त्वामागांसि कृणवत्सखा ते ।

7.088.06c मा त एनस्वन्तो यक्षिन्भुजेम यन्धि ष्मा विप्र स्तुवते वरूथम् ॥

7.088.06a ya āpir nityo varuṇa priyaḥ san tvām āgāṁsi kṛṇavat sakhā te |
7.088.06c mā ta enasvanto yakṣin bhujema yandhi ṣmā vipra stuvate varūtham ||

7.088.07a ध्रुवासु त्वासु क्षितिषु क्षियन्तो व्य१स्मत्पाशं वरुणो मुमोचत् ।

7.088.07c अवो वन्वाना अदितेरुपस्थाद्यूयं पात स्वस्तिभिः सदा नः ॥

7.088.07a dhruvāsu tvāsu kṣitiṣu kṣiyanto vy a1smat pāśaṁ varuṇo mumocat |
7.088.07c avo vanvānā aditer upasthād yūyam pāta svastibhiḥ sadā naḥ ||

7.089.01a मो षु वरुण मृन्मयं गृहं राजन्नहं गमम् ।

7.089.01c मृळा सुक्षत्र मृळय ॥

7.089.01a mo ṣu varuṇa mṛnmayaṁ gṛhaṁ rājann ahaṁ gamam |
7.089.01c mṛḷā sukṣatra mṛḷaya ||

7.089.02a यदेमि प्रस्फुरन्निव दृतिर्न ध्मातो अद्रिवः ।

7.089.02c मृळा सुक्षत्र मृळय ॥

7.089.02a yad emi prasphurann iva dṛtir na dhmāto adrivaḥ |
7.089.02c mṛḷā sukṣatra mṛḷaya ||

7.089.03a क्रत्वः समह दीनता प्रतीपं जगमा शुचे ।

7.089.03c मृळा सुक्षत्र मृळय ॥

7.089.03a kratvaḥ samaha dīnatā pratīpaṁ jagamā śuce |
7.089.03c mṛḷā sukṣatra mṛḷaya ||

7.089.04a अपां मध्ये तस्थिवांसं तृष्णाविदज्जरितारम् ।

7.089.04c मृळा सुक्षत्र मृळय ॥

7.089.04a apām madhye tasthivāṁsaṁ tṛṣṇāvidaj jaritāram |
7.089.04c mṛḷā sukṣatra mṛḷaya ||

7.089.05a यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्या३श्चरामसि ।

7.089.05c अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः ॥

7.089.05a yat kiṁ cedaṁ varuṇa daivye jane 'bhidroham manuṣyā3ś carāmasi |
7.089.05c acittī yat tava dharmā yuyopima mā nas tasmād enaso deva rīriṣaḥ ||

7.090.01a प्र वीरया शुचयो दद्रिरे वामध्वर्युभिर्मधुमन्तः सुतासः ।

7.090.01c वह वायो नियुतो याह्यच्छा पिबा सुतस्यान्धसो मदाय ॥

7.090.01a pra vīrayā śucayo dadrire vām adhvaryubhir madhumantaḥ sutāsaḥ |
7.090.01c vaha vāyo niyuto yāhy acchā pibā sutasyāndhaso madāya ||

7.090.02a ईशानाय प्रहुतिं यस्त आनट् छुचिं सोमं शुचिपास्तुभ्यं वायो ।

7.090.02c कृणोषि तं मर्त्येषु प्रशस्तं जातोजातो जायते वाज्यस्य ॥

7.090.02a īśānāya prahutiṁ yas ta ānaṭ chuciṁ somaṁ śucipās tubhyaṁ vāyo |
7.090.02c kṛṇoṣi tam martyeṣu praśastaṁ jāto-jāto jāyate vājy asya ||

7.090.03a राये नु यं जज्ञतू रोदसीमे राये देवी धिषणा धाति देवम् ।

7.090.03c अध वायुं नियुतः सश्चत स्वा उत श्वेतं वसुधितिं निरेके ॥

7.090.03a rāye nu yaṁ jajñatū rodasīme rāye devī dhiṣaṇā dhāti devam |
7.090.03c adha vāyuṁ niyutaḥ saścata svā uta śvetaṁ vasudhitiṁ nireke ||

7.090.04a उच्छन्नुषसः सुदिना अरिप्रा उरु ज्योतिर्विविदुर्दीध्यानाः ।

7.090.04c गव्यं चिदूर्वमुशिजो वि वव्रुस्तेषामनु प्रदिवः सस्रुरापः ॥

7.090.04a ucchann uṣasaḥ sudinā ariprā uru jyotir vividur dīdhyānāḥ |
7.090.04c gavyaṁ cid ūrvam uśijo vi vavrus teṣām anu pradivaḥ sasrur āpaḥ ||

7.090.05a ते सत्येन मनसा दीध्यानाः स्वेन युक्तासः क्रतुना वहन्ति ।

7.090.05c इन्द्रवायू वीरवाहं रथं वामीशानयोरभि पृक्षः सचन्ते ॥

7.090.05a te satyena manasā dīdhyānāḥ svena yuktāsaḥ kratunā vahanti |
7.090.05c indravāyū vīravāhaṁ rathaṁ vām īśānayor abhi pṛkṣaḥ sacante ||

7.090.06a ईशानासो ये दधते स्वर्णो गोभिरश्वेभिर्वसुभिर्हिरण्यैः ।

7.090.06c इन्द्रवायू सूरयो विश्वमायुरर्वद्भिर्वीरैः पृतनासु सह्युः ॥

7.090.06a īśānāso ye dadhate svar ṇo gobhir aśvebhir vasubhir hiraṇyaiḥ |
7.090.06c indravāyū sūrayo viśvam āyur arvadbhir vīraiḥ pṛtanāsu sahyuḥ ||

7.090.07a अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।

7.090.07c वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥

7.090.07a arvanto na śravaso bhikṣamāṇā indravāyū suṣṭutibhir vasiṣṭhāḥ |
7.090.07c vājayantaḥ sv avase huvema yūyam pāta svastibhiḥ sadā naḥ ||

7.091.01a कुविदङ्ग नमसा ये वृधासः पुरा देवा अनवद्यास आसन् ।

7.091.01c ते वायवे मनवे बाधितायावासयन्नुषसं सूर्येण ॥

7.091.01a kuvid aṅga namasā ye vṛdhāsaḥ purā devā anavadyāsa āsan |
7.091.01c te vāyave manave bādhitāyāvāsayann uṣasaṁ sūryeṇa ||

7.091.02a उशन्ता दूता न दभाय गोपा मासश्च पाथः शरदश्च पूर्वीः ।

7.091.02c इन्द्रवायू सुष्टुतिर्वामियाना मार्डीकमीट्टे सुवितं च नव्यम् ॥

7.091.02a uśantā dūtā na dabhāya gopā māsaś ca pāthaḥ śaradaś ca pūrvīḥ |
7.091.02c indravāyū suṣṭutir vām iyānā mārḍīkam iṭṭe suvitaṁ ca navyam ||

7.091.03a पीवोअन्नाँ रयिवृधः सुमेधाः श्वेतः सिषक्ति नियुतामभिश्रीः ।

7.091.03c ते वायवे समनसो वि तस्थुर्विश्वेन्नरः स्वपत्यानि चक्रुः ॥

7.091.03a pīvoannām̐ rayivṛdhaḥ sumedhāḥ śvetaḥ siṣakti niyutām abhiśrīḥ |
7.091.03c te vāyave samanaso vi tasthur viśven naraḥ svapatyāni cakruḥ ||

7.091.04a यावत्तरस्तन्वो३ यावदोजो यावन्नरश्चक्षसा दीध्यानाः ।

7.091.04c शुचिं सोमं शुचिपा पातमस्मे इन्द्रवायू सदतं बर्हिरेदम् ॥

7.091.04a yāvat taras tanvo3 yāvad ojo yāvan naraś cakṣasā dīdhyānāḥ |
7.091.04c śuciṁ somaṁ śucipā pātam asme indravāyū sadatam barhir edam ||

7.091.05a नियुवाना नियुत स्पार्हवीरा इन्द्रवायू सरथं यातमर्वाक् ।

7.091.05c इदं हि वां प्रभृतं मध्वो अग्रमध प्रीणाना वि मुमुक्तमस्मे ॥

7.091.05a niyuvānā niyuta spārhavīrā indravāyū saratham yātam arvāk |
7.091.05c idam hi vām prabhṛtam madhvo agram adha prīṇānā vi mumuktam asme ||

7.091.06a या वां शतं नियुतो याः सहस्रमिन्द्रवायू विश्ववाराः सचन्ते ।

7.091.06c आभिर्यातं सुविदत्राभिरर्वाक्पातं नरा प्रतिभृतस्य मध्वः ॥

7.091.06a yā vām śatam niyuto yāḥ sahasram indravāyū viśvavārāḥ sacante |
7.091.06c ābhir yātam suvidatrābhir arvāk pātam narā pratibhṛtasya madhvaḥ ||

7.091.07a अर्वन्तो न श्रवसो भिक्षमाणा इन्द्रवायू सुष्टुतिभिर्वसिष्ठाः ।

7.091.07c वाजयन्तः स्ववसे हुवेम यूयं पात स्वस्तिभिः सदा नः ॥

7.091.07a arvanto na śravaso bhikṣamāṇā indravāyū suṣṭutibhir vasiṣṭhāḥ |
7.091.07c vājayantaḥ sv avase huvema yūyam pāta svastibhiḥ sadā naḥ ||

7.092.01a आ वायो भूष शुचिपा उप नः सहस्रं ते नियुतो विश्ववार ।

7.092.01c उपो ते अन्धो मद्यमयामि यस्य देव दधिषे पूर्वपेयम् ॥

7.092.01a ā vāyo bhūṣa śucipā upa naḥ sahasram te niyuto viśvavāra |
7.092.01c upo te andho madyam ayāmi yasya deva dadhiṣe pūrvapeyam ||

7.092.02a प्र सोता जीरो अध्वरेष्वस्थात्सोममिन्द्राय वायवे पिबध्यै ।

7.092.02c प्र यद्वां मध्वो अग्रियं भरन्त्यध्वर्यवो देवयन्तः शचीभिः ॥

7.092.02a pra sotā jīro adhvareṣv asthāt somam indrāya vāyave pibadhyai |
7.092.02c pra yad vām madhvo agriyam bharanty adhvaryavo devayantaḥ śacībhiḥ ||

7.092.03a प्र याभिर्यासि दाश्वांसमच्छा नियुद्भिर्वायविष्टये दुरोणे ।

7.092.03c नि नो रयिं सुभोजसं युवस्व नि वीरं गव्यमश्व्यं च राधः ॥

7.092.03a pra yābhir yāsi dāśvāṁsam acchā niyudbhir vāyav iṣṭaye duroṇe |
7.092.03c ni no rayim subhojasam yuvasva ni vīram gavyam aśvyam ca rādhaḥ ||

7.092.04a ये वायव इन्द्रमादनास आदेवासो नितोशनासो अर्यः ।

7.092.04c घ्नन्तो वृत्राणि सूरिभिः ष्याम सासह्वांसो युधा नृभिरमित्रान् ॥

7.092.04a ye vāyava indramādanāsa ādevāso nitośanāso aryaḥ |
7.092.04c ghnanto vṛtrāṇi sūribhiḥ ṣyāma sāsahvāṁso yudhā nṛbhir amitrān ||

7.092.05a आ नो नियुद्भिः शतिनीभिरध्वरं सहस्रिणीभिरुप याहि यज्ञम् ।

7.092.05c वायो अस्मिन्सवने मादयस्व यूयं पात स्वस्तिभिः सदा नः ॥

7.092.05a ā no niyudbhiḥ śatinībhir adhvaraṁ sahasriṇībhir upa yāhi yajñam |
7.092.05c vāyo asmin savane mādayasva yūyam pāta svastibhiḥ sadā naḥ ||

7.093.01a शुचिं नु स्तोमं नवजातमद्येन्द्राग्नी वृत्रहणा जुषेथाम् ।

7.093.01c उभा हि वां सुहवा जोहवीमि ता वाजं सद्य उशते धेष्ठा ॥

7.093.01a śuciṁ nu stomaṁ navajātam adyendrāgnī vṛtrahaṇā juṣethām |
7.093.01c ubhā hi vāṁ suhavā johavīmi tā vājaṁ sadya uśate dheṣṭhā ||

7.093.02a ता सानसी शवसाना हि भूतं साकंवृधा शवसा शूशुवांसा ।

7.093.02c क्षयन्तौ रायो यवसस्य भूरेः पृङ्क्तं वाजस्य स्थविरस्य घृष्वेः ॥

7.093.02a tā sānasī śavasānā hi bhūtaṁ sākaṁvṛdhā śavasā śūśuvāṁsā |
7.093.02c kṣayantau rāyo yavasasya bhūreḥ pṛṅktaṁ vājasya sthavirasya ghṛṣveḥ ||

7.093.03a उपो ह यद्विदथं वाजिनो गुर्धीभिर्विप्राः प्रमतिमिच्छमानाः ।

7.093.03c अर्वन्तो न काष्ठां नक्षमाणा इन्द्राग्नी जोहुवतो नरस्ते ॥

7.093.03a upo ha yad vidathaṁ vājino gur dhībhir viprāḥ pramatim icchamānāḥ |
7.093.03c arvanto na kāṣṭhāṁ nakṣamāṇā indrāgnī johuvato naras te ||

7.093.04a गीर्भिर्विप्रः प्रमतिमिच्छमान ईट्टे रयिं यशसं पूर्वभाजम् ।

7.093.04c इन्द्राग्नी वृत्रहणा सुवज्रा प्र नो नव्येभिस्तिरतं देष्णैः ॥

7.093.04a gīrbhir vipraḥ pramatim icchamāna īṭṭe rayiṁ yaśasam pūrvabhājam |
7.093.04c indrāgnī vṛtrahaṇā suvajrā pra no navyebhis tirataṁ deṣṇaiḥ ||

7.093.05a सं यन्मही मिथती स्पर्धमाने तनूरुचा शूरसाता यतैते ।

7.093.05c अदेवयुं विदथे देवयुभिः सत्रा हतं सोमसुता जनेन ॥

7.093.05a sam̐ yan mahī mithatī spardhamāne tanūrucā śūrasātā yataite |
7.093.05c adevayum̐ vidathe devayubhiḥ satrā hatam̐ somasutā janena ||

7.093.06a इमामु षु सोमसुतिमुप न एन्द्राग्नी सौमनसाय यातम् ।

7.093.06c नू चिद्धि परिमम्नाथे अस्माना वां शश्वद्भिर्ववृतीय वाजैः ॥

7.093.06a imām u ṣu somasutim upa na endrāgnī saumanasāya yātam |
7.093.06c nū cid dhi parimamnāthe asmān ā vām̐ śaśvadbhir vavṛtīya vājaiḥ ||

7.093.07a सो अग्न एना नमसा समिद्धोऽच्छा मित्रं वरुणमिन्द्रं वोचेः ।

7.093.07c यत्सीमागश्चकृमा तत्सु मृळ तदर्यमादितिः शिश्रथन्तु ॥

7.093.07a so agna enā namasā samiddho 'cchā mitram̐ varuṇam indram̐ voceḥ |
7.093.07c yat sīm āgaś cakṛmā tat su mṛḷa tad aryamāditiḥ śiśrathantu ||

7.093.08a एता अग्न आशुषाणास इष्टीर्युवोः सचाभ्यश्याम वाजान् ।

7.093.08c मेन्द्रो नो विष्णुर्मरुतः परि ख्यन्यूयं पात स्वस्तिभिः सदा नः ॥

7.093.08a etā agna āśuṣāṇāsa iṣṭīr yuvoḥ sacābhy aśyāma vājān |
7.093.08c mendro no viṣṇur marutaḥ pari khyan yūyam pāta svastibhiḥ sadā naḥ ||

7.094.01a इयं वामस्य मन्मन इन्द्राग्नी पूर्व्यस्तुतिः ।

7.094.01c अभ्राद्वृष्टिरिवाजनि ॥

7.094.01a iyam̐ vām asya manmana indrāgnī pūrvyastutiḥ |
7.094.01c abhrād vṛṣṭir ivājani ||

7.094.02a शृणुतं जरितुर्हवमिन्द्राग्नी वनतं गिरः ।

7.094.02c ईशाना पिप्यतं धियः ॥

7.094.02a śṛṇutam̐ jaritur havam indrāgnī vanatam̐ giraḥ |
7.094.02c īśānā pipyatam̐ dhiyaḥ ||

7.094.03a मा पापत्वाय नो नरेन्द्राग्नी माभिशस्तये ।

7.094.03c मा नो रीरधतं निदे ॥

7.094.03a mā pāpatvāya no narendrāgnī mābhiśastaye |
7.094.03c mā no rīradhatam̐ nide ||

7.094.04a इन्द्रे अग्ना नमो बृहत्सुवृक्तिमेरयामहे ।

7.094.04c धिया धेना अवस्यवः ॥

7.094.04a indre agnā namo bṛhat suvṛktim erayāmahe |
7.094.04c dhiyā dhenā avasyavaḥ ||

7.094.05a ता हि शश्वन्त ईळत इत्था विप्रास ऊतये ।

7.094.05c सबाधो वाजसातये ॥

7.094.05a tā hi śaśvanta īḻata itthā viprāsa ūtaye |
7.094.05c sabādho vājasātaye ||

7.094.06a ता वां गीर्भिर्विपन्यवः प्रयस्वन्तो हवामहे ।

7.094.06c मेधसाता सनिष्यवः ॥

7.094.06a tā vāṁ gīrbhir vipanyavaḥ prayasvanto havāmahe |
7.094.06c medhasātā saniṣyavaḥ ||

7.094.07a इन्द्राग्नी अवसा गतमस्मभ्यं चर्षणीसहा ।

7.094.07c मा नो दुःशंस ईशत ॥

7.094.07a indrāgnī avasā gatam asmabhyaṁ carṣaṇīsahā |
7.094.07c mā no duḥśaṁsa īśata ||

7.094.08a मा कस्य नो अररुषो धूर्तिः प्रणङ्मर्त्यस्य ।

7.094.08c इन्द्राग्नी शर्म यच्छतम् ॥

7.094.08a mā kasya no araruṣo dhūrtiḥ praṇaṅ martyasya |
7.094.08c indrāgnī śarma yacchatam ||

7.094.09a गोमद्धिरण्यवद्वसु यद्वामश्वावदीमहे ।

7.094.09c इन्द्राग्नी तद्वनेमहि ॥

7.094.09a gomad dhiraṇyavad vasu yad vām aśvāvad īmahe |
7.094.09c indrāgnī tad vanemahi ||

7.094.10a यत्सोम आ सुते नर इन्द्राग्नी अजोहवुः ।

7.094.10c सप्तीवन्ता सपर्यवः ॥

7.094.10a yat soma ā sute nara indrāgnī ajohavuḥ |
7.094.10c saptīvantā saparyavaḥ ||

7.094.11a उक्थेभिर्वृत्रहन्तमा या मन्दाना चिदा गिरा ।

7.094.11c आङ्गूषैराविवासतः ॥

7.094.11a ukthebhir vṛtrahantamā yā mandānā cid ā girā |
7.094.11c āṅgūṣair āvivāsataḥ ||

7.094.12a ताविद्दुःशंसं मर्त्यं दुर्विद्वांसं रक्षस्विनम् ।

7.094.12c आभोगं हन्मना हतमुदधिं हन्मना हतम् ॥

7.094.12a tāv id duḥśaṁsam martyaṁ durvidvāṁsaṁ rakṣasvinam |
7.094.12c ābhogaṁ hanmanā hatam udadhiṁ hanmanā hatam ||

7.095.01a प्र क्षोदसा धायसा सस्र एषा सरस्वती धरुणमायसी पूः ।

7.095.01c प्रबाबधाना रथ्येव याति विश्वा अपो महिना सिन्धुरन्याः ॥

7.095.01a pra kṣodasā dhāyasā sasra eṣā sarasvatī dharuṇam āyasī pūḥ |
7.095.01c prabābadhānā rathyeva yāti viśvā apo mahinā sindhur anyāḥ ||

7.095.02a एकाचेतत्सरस्वती नदीनां शुचिर्यती गिरिभ्य आ समुद्रात् ।

7.095.02c रायश्चेतन्ती भुवनस्य भूरेर्घृतं पयो दुदुहे नाहुषाय ॥

7.095.02a ekācetat sarasvatī nadīnāṁ śucir yatī giribhya ā samudrāt |
7.095.02c rāyaś cetantī bhuvanasya bhūrer ghṛtam payo duduhe nāhuṣāya ||

7.095.03a स वावृधे नर्यो योषणासु वृषा शिशुर्वृषभो यज्ञियासु ।

7.095.03c स वाजिनं मघवद्भ्यो दधाति वि सातये तन्वं मामृजीत ॥

7.095.03a sa vāvṛdhe naryo yoṣaṇāsu vṛṣā śiśur vṛṣabho yajñiyāsu |
7.095.03c sa vājinam maghavadbhyo dadhāti vi sātaye tanvam māmṛjīta ||

7.095.04a उत स्या नः सरस्वती जुषाणोप श्रवत्सुभगा यज्ञे अस्मिन् ।

7.095.04c मितज्ञुभिर्नमस्यैरियाना राया युजा चिदुत्तरा सखिभ्यः ॥

7.095.04a  uta syā naḥ sarasvatī juṣāṇopa śravat subhagā yajṇe asmin |
7.095.04c  mitajñubhir namasyair iyānā rāyā yujā cid uttarā sakhibhyaḥ ||

7.095.05a इमा जुह्वाना युष्मदा नमोभिः प्रति स्तोमं सरस्वति जुषस्व ।

7.095.05c तव शर्मन्प्रियतमे दधाना उप स्थेयाम शरणं न वृक्षम् ॥

7.095.05a  imā juhvānā yuṣmad ā namobhiḥ prati stomaṁ sarasvati juṣasva |
7.095.05c  tava śarman priyatame dadhānā upa stheyāma śaraṇaṁ na vṛkṣam ||

7.095.06a अयमु ते सरस्वति वसिष्ठो द्वारावृतस्य सुभगे व्यावः ।

7.095.06c वर्ध शुभ्रे स्तुवते रासि वाजान्यूयं पात स्वस्तिभिः सदा नः ॥

7.095.06a  ayam u te sarasvati vasiṣṭho dvārāv ṛtasya subhage vy āvaḥ |
7.095.06c  vardha śubhre stuvate rāsi vājān yūyam pāta svastibhiḥ sadā naḥ ||

7.096.01a बृहदु गायिषे वचोऽसुर्या नदीनाम् ।

7.096.01c सरस्वतीमिन्महया सुवृक्तिभि स्तोमैर्वसिष्ठ रोदसी ॥

7.096.01a  bṛhad u gāyiṣe vaco 'suryā nadīnām |
7.096.01c  sarasvatīm in mahayā suvṛktibhi stomair vasiṣṭha rodasī ||

7.096.02a उभे यत्ते महिना शुभ्रे अन्धसी अधिक्षियन्ति पूरवः ।

7.096.02c सा नो बोध्यवित्री मरुत्सखा चोद राधो मघोनाम् ॥

7.096.02a  ubhe yat te mahinā śubhre andhasī adhikṣiyanti pūravaḥ |
7.096.02c  sā no bodhy avitrī marutsakhā coda rādho maghonām ||

7.096.03a भद्रमिद्भद्रा कृणवत्सरस्वत्यकवारी चेतति वाजिनीवती ।

7.096.03c गृणाना जमदग्निवत्स्तुवाना च वसिष्ठवत् ॥

7.096.03a  bhadram id bhadrā kṛṇavat sarasvaty akavārī cetati vājinīvatī |
7.096.03c  gṛṇānā jamadagnivat stuvānā ca vasiṣṭhavat ||

7.096.04a जनीयन्तो न्वग्रवः पुत्रीयन्तः सुदानवः ।

7.096.04c सरस्वन्तं हवामहे ॥

7.096.04a  janīyanto nv agravaḥ putrīyantaḥ sudānavaḥ |
7.096.04c  sarasvantaṁ havāmahe ||

7.096.05a ये ते सरस्व ऊर्मयो मधुमन्तो घृतश्चुतः ।

7.096.05c तेभिर्नोऽविता भव ॥

7.096.05a ye te sarasva ūrmayo madhumanto ghṛtaścutaḥ |
7.096.05c tebhir no 'vitā bhava ||

7.096.06a पीपिवांसं सरस्वत स्तनं यो विश्वदर्शतः ।

7.096.06c भक्षीमहि प्रजामिषम् ॥

7.096.06a pīpivāṁsaṁ sarasvata stanaṁ yo viśvadarśataḥ |
7.096.06c bhakṣīmahi prajām iṣam ||

7.097.01a यज्ञे दिवो नृषदने पृथिव्या नरो यत्र देवयवो मदन्ति ।

7.097.01c इन्द्राय यत्र सवनानि सुन्वे गमन्मदाय प्रथमं वयश्च ॥

7.097.01a yajñe divo nṛṣadane pṛthivyā naro yatra devayavo madanti |
7.097.01c indrāya yatra savanāni sunve gaman madāya prathamaṁ vayaś ca ||

7.097.02a आ दैव्या वृणीमहेऽवांसि बृहस्पतिर्नो मह आ सखायः ।

7.097.02c यथा भवेम मीळ्हुषे अनागा यो नो दाता परावतः पितेव ॥

7.097.02a ā daivyā vṛṇīmahe 'vāṁsi bṛhaspatir no maha ā sakhāyaḥ |
7.097.02c yathā bhavema mīḻhuṣe anāgā yo no dātā parāvataḥ piteva ||

7.097.03a तमु ज्येष्ठं नमसा हविर्भिः सुशेवं ब्रह्मणस्पतिं गृणीषे ।

7.097.03c इन्द्रं श्लोको महि दैव्यः सिषक्तु यो ब्रह्मणो देवकृतस्य राजा ॥

7.097.03a tam u jyeṣṭhaṁ namasā havirbhiḥ suśevaṁ brahmaṇas patiṁ gṛṇīṣe |
7.097.03c indraṁ śloko mahi daivyaḥ siṣaktu yo brahmaṇo devakṛtasya rājā ||

7.097.04a स आ नो योनिं सदतु प्रेष्ठो बृहस्पतिर्विश्ववारो यो अस्ति ।

7.097.04c कामो रायः सुवीर्यस्य तं दात्पर्षन्नो अति सश्चतो अरिष्टान् ॥

7.097.04a sa ā no yoniṁ sadatu preṣṭho bṛhaspatir viśvavāro yo asti |
7.097.04c kāmo rāyaḥ suvīryasya taṁ dāt parṣan no ati saścato ariṣṭān ||

7.097.05a तमा नो अर्कममृताय जुष्टमिमे धासुरमृतासः पुराजाः ।

7.097.05c शुचिक्रन्दं यजतं पस्त्यानां बृहस्पतिमनर्वाणं हुवेम ॥

7.097.05a tam ā no arkam amṛtāya juṣṭam ime dhāsur amṛtāsaḥ purājāḥ |
7.097.05c śucikrandaṁ yajatam pastyānām bṛhaspatim anarvāṇaṁ huvema ||

7.097.06a तं शग्मासो अरुषासो अश्वा बृहस्पतिं सहवाहो वहन्ति ।

7.097.06c सहश्चिद्यस्य नीलवत्सधस्थं नभो न रूपमरुषं वसानाः ॥

7.097.06a taṁ śagmāso aruṣāso aśvā bṛhaspatiṁ sahavāho vahanti |
7.097.06c sahaś cid yasya nīlavat sadhasthaṁ nabho na rūpam aruṣaṁ vasānāḥ ||

7.097.07a स हि शुचिः शतपत्रः स शुन्ध्युर्हिरण्यवाशीरिषिरः स्वर्षाः ।

7.097.07c बृहस्पतिः स स्वावेश ऋष्वः पुरू सखिभ्य आसुतिं करिष्ठः ॥

7.097.07a sa hi śuciḥ śatapatraḥ sa śundhyur hiraṇyavāśīr iṣiraḥ svarṣāḥ |
7.097.07c bṛhaspatiḥ sa svāveśa ṛṣvaḥ purū sakhibhya āsutiṁ kariṣṭhaḥ ||

7.097.08a देवी देवस्य रोदसी जनित्री बृहस्पतिं वावृधतुर्महित्वा ।

7.097.08c दक्षाय्याय दक्षता सखायः करद्ब्रह्मणे सुतरा सुगाधा ॥

7.097.08a devī devasya rodasī janitrī bṛhaspatiṁ vāvṛdhatur mahitvā |
7.097.08c dakṣāyyāya dakṣatā sakhāyaḥ karad brahmaṇe sutarā sugādhā ||

7.097.09a इयं वां ब्रह्मणस्पते सुवृक्तिर्ब्रह्मेन्द्राय वज्रिणे अकारि ।

7.097.09c अविष्टं धियो जिगृतं पुरंधीर्जजस्तमर्यो वनुषामरातीः ॥

7.097.09a iyaṁ vām brahmaṇas pate suvṛktir brahmendrāya vajriṇe akāri |
7.097.09c aviṣṭaṁ dhiyo jigṛtam purandhīr jajastam aryo vanuṣām arātīḥ ||

7.097.10a बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।

7.097.10c धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥

7.097.10a bṛhaspate yuvam indraś ca vasvo divyasyeśāthe uta pārthivasya |
7.097.10c dhattaṁ rayiṁ stuvate kīraye cid yūyam pāta svastibhiḥ sadā naḥ ||

7.098.01a अध्वर्यवोऽरुणं दुग्धमंशुं जुहोतन वृषभाय क्षितीनाम् ।

7.098.01c गौराद्वेदीयाँ अवपानमिन्द्रो विश्वाहेद्याति सुतसोममिच्छन् ॥

7.098.01a adhvaryavo 'ruṇaṁ dugdham aṁśuṁ juhotana vṛṣabhāya kṣitīnām |
7.098.01c gaurād vedīyām̐ avapānam indro viśvāhed yāti sutasomam icchan ||

7.098.02a यद्दधिषे प्रदिवि चार्वन्नं दिवेदिवे पीतिमिदस्य वक्षि ।

7.098.02c उत हृदोत मनसा जुषाण उशन्निन्द्र प्रस्थितान्पाहि सोमान् ॥

7.098.02a yad dadhiṣe pradivi cārv annaṁ dive-dive pītim id asya vakṣi |
7.098.02c uta hṛdota manasā juṣāṇa uśann indra prasthitān pāhi somān ||

7.098.03a जज्ञानः सोमं सहसे पपाथ प्र ते माता महिमानमुवाच ।

7.098.03c एन्द्र पप्राथोर्व१न्तरिक्षं युधा देवेभ्यो वरिवश्चकर्थ ॥

7.098.03a jajñānaḥ somaṁ sahase papātha pra te mātā mahimānam uvāca |
7.098.03c endra paprāthorv a1ntarikṣaṁ yudhā devebhyo varivaś cakartha ||

7.098.04a यद्योधया महतो मन्यमानान्साक्षाम तान्बाहुभिः शाशदानान् ।

7.098.04c यद्वा नृभिर्वृत इन्द्राभियुध्यास्तं त्वयाजिं सौश्रवसं जयेम ॥

7.098.04a yad yodhayā mahato manyamānān sākṣāma tān bāhubhiḥ śāśadānān |
7.098.04c yad vā nṛbhir vṛta indrābhiyudhyās taṁ tvayājiṁ sauśravasaṁ jayema ||

7.098.05a प्रेन्द्रस्य वोचं प्रथमा कृतानि प्र नूतना मघवा या चकार ।

7.098.05c यदेददेवीरसहिष्ट माया अथाभवत्केवलः सोमो अस्य ॥

7.098.05a prendrasya vocam prathamā kṛtāni pra nūtanā maghavā yā cakāra |
7.098.05c yaded adevīr asahiṣṭa māyā athābhavat kevalaḥ somo asya ||

7.098.06a तवेदं विश्वमभितः पशव्यं१ यत्पश्यसि चक्षसा सूर्यस्य ।

7.098.06c गवामसि गोपतिरेक इन्द्र भक्षीमहि ते प्रयतस्य वस्वः ॥

7.098.06a tavedaṁ viśvam abhitaḥ paśavyaṁ1 yat paśyasi cakṣasā sūryasya |
7.098.06c gavām asi gopatir eka indra bhakṣīmahi te prayatasya vasvaḥ ||

7.098.07a बृहस्पते युवमिन्द्रश्च वस्वो दिव्यस्येशाथे उत पार्थिवस्य ।

7.098.07c धत्तं रयिं स्तुवते कीरये चिद्यूयं पात स्वस्तिभिः सदा नः ॥

7.098.07a bṛhaspate yuvam indraś ca vasvo divyasyeśāthe uta pārthivasya |
7.098.07c dhattaṁ rayiṁ stuvate kīraye cid yūyam pāta svastibhiḥ sadā naḥ ||

7.099.01a परो मात्रया तन्वा वृधान न ते महित्वमन्वश्नुवन्ति ।

7.099.01c उभे ते विद्म रजसी पृथिव्या विष्णो देव त्वं परमस्य वित्से ॥

7.099.01a paro mātrayā tanvā vṛdhāna na te mahitvam anv aśnuvanti |
7.099.01c ubhe te vidma rajasī pṛthivyā viṣṇo deva tvam paramasya vitse ||

7.099.02a न ते विष्णो जायमानो न जातो देव महिम्नः परमन्तमाप ।

7.099.02c उदस्तभ्ना नाकमृष्वं बृहन्तं दाधर्थ प्राचीं ककुभं पृथिव्याः ॥

7.099.02a na te viṣṇo jāyamāno na jāto deva mahimnaḥ param antam āpa |
7.099.02c ud astabhnā nākam ṛṣvam bṛhantaṁ dādhartha prācīṁ kakubham pṛthivyāḥ ||

7.099.03a इरावती धेनुमती हि भूतं सूयवसिनी मनुषे दशस्या ।

7.099.03c व्यस्तभ्ना रोदसी विष्णवेते दाधर्थ पृथिवीमभितो मयूखैः ॥

7.099.03a irāvatī dhenumatī hi bhūtaṁ sūyavasinī manuṣe daśasyā |
7.099.03c vy astabhnā rodasī viṣṇav ete dādhartha pṛthivīm abhito mayūkhaiḥ ||

7.099.04a उरुं यज्ञाय चक्रथुरु लोकं जनयन्ता सूर्यमुषासमग्निम् ।

7.099.04c दासस्य चिद्वृषशिप्रस्य माया जघ्नथुर्नरा पृतनाज्येषु ॥

7.099.04a uruṁ yajñāya cakrathur u lokaṁ janayantā sūryam uṣāsam agnim |
7.099.04c dāsasya cid vṛṣaśiprasya māyā jaghnathur narā pṛtanājyeṣu ||

7.099.05a इन्द्राविष्णू दृंहिताः शम्बरस्य नव पुरो नवतिं च श्नथिष्टम् ।

7.099.05c शतं वर्चिनः सहस्रं च साकं हथो अप्रत्यसुरस्य वीरान् ॥

7.099.05a indrāviṣṇū dṛṁhitāḥ śambarasya nava puro navatiṁ ca śnathiṣṭam |
7.099.05c śataṁ varcinaḥ sahasraṁ ca sākaṁ hatho apraty asurasya vīrān ||

7.099.06a इयं मनीषा बृहती बृहन्तोरुक्रमा तवसा वर्धयन्ती ।

7.099.06c ररे वां स्तोमं विदथेषु विष्णो पिन्वतमिषो वृजनेष्विन्द्र ॥

7.099.06a iyam manīṣā bṛhatī bṛhantorukramā tavasā vardhayantī |
7.099.06c rare vāṁ stomaṁ vidatheṣu viṣṇo pinvatam iṣo vṛjaneṣv indra ||

7.099.07a वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।

7.099.07c वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

7.099.07a vaṣaṭ te viṣṇav āsa ā kṛṇomi tan me juṣasva śipiviṣṭa havyam |
7.099.07c vardhantu tvā suṣṭutayo giro me yūyam pāta svastibhiḥ sadā naḥ ||

7.100.01a नू मर्तो दयते सनिष्यन्यो विष्णव उरुगायाय दाशत् ।

7.100.01c प्र यः सत्राचा मनसा यजात एतावन्तं नर्यमाविवासात् ॥

7.100.01a nū marto dayate saniṣyan yo viṣṇava urugāyāya dāśat |
7.100.01c pra yaḥ satrācā manasā yajāta etāvantaṁ naryam āvivāsāt ||

7.100.02a त्वं विष्णो सुमतिं विश्वजन्यामप्रयुतामेवयावो मतिं दाः ।

7.100.02c पर्चो यथा नः सुवितस्य भूरेरश्वावतः पुरुश्चन्द्रस्य रायः ॥

7.100.02a tvaṁ viṣṇo sumatiṁ viśvajanyām aprayutām evayāvo matiṁ dāḥ |
7.100.02c parco yathā naḥ suvitasya bhūrer aśvāvataḥ puruścandrasya rāyaḥ ||

7.100.03a त्रिर्देवः पृथिवीमेष एतां वि चक्रमे शतर्चसं महित्वा ।

7.100.03c प्र विष्णुरस्तु तवसस्तवीयान्त्वेषं ह्यस्य स्थविरस्य नाम ॥

7.100.03a trir devaḥ pṛthivīm eṣa etāṁ vi cakrame śatarcasam mahitvā |
7.100.03c pra viṣṇur astu tavasas tavīyān tveṣaṁ hy asya sthavirasya nāma ||

7.100.04a वि चक्रमे पृथिवीमेष एतां क्षेत्राय विष्णुर्मनुषे दशस्यन् ।

7.100.04c ध्रुवासो अस्य कीरयो जनास उरुक्षितिं सुजनिमा चकार ॥

7.100.04a vi cakrame pṛthivīm eṣa etāṁ kṣetrāya viṣṇur manuṣe daśasyan |
7.100.04c dhruvāso asya kīrayo janāsa urukṣitiṁ sujanimā cakāra ||

7.100.05a प्र तत्ते अद्य शिपिविष्ट नामार्यः शंसामि वयुनानि विद्वान् ।

7.100.05c तं त्वा गृणामि तवसमतव्यान्क्षयन्तमस्य रजसः पराके ॥

7.100.05a pra tat te adya śipiviṣṭa nāmāryaḥ śaṁsāmi vayunāni vidvān |
7.100.05c taṁ tvā gṛṇāmi tavasam atavyān kṣayantam asya rajasaḥ parāke ||

7.100.06a किमित्ते विष्णो परिचक्ष्यं भूत्प्र यद्ववक्षे शिपिविष्टो अस्मि ।

7.100.06c मा वर्पो अस्मदप गूह एतद्यदन्यरूपः समिथे बभूथ ॥

7.100.06a kim it te viṣṇo paricakṣyam bhūt pra yad vavakṣe śipiviṣṭo asmi |
7.100.06c mā varpo asmad apa gūha etad yad anyarūpaḥ samithe babhūtha ||

7.100.07a वषट् ते विष्णवास आ कृणोमि तन्मे जुषस्व शिपिविष्ट हव्यम् ।

7.100.07c वर्धन्तु त्वा सुष्टुतयो गिरो मे यूयं पात स्वस्तिभिः सदा नः ॥

7.100.07a vaṣaṭ te viṣṇav āsa ā kṛṇomi tan me juṣasva śipiviṣṭa havyam |
7.100.07c vardhantu tvā suṣṭutayo giro me yūyam pāta svastibhiḥ sadā naḥ ||

7.101.01a तिस्रो वाचः प्र वद ज्योतिरग्रा या एतद्दुह्रे मधुदोघमूधः ।

7.101.01c स वत्सं कृण्वन्गर्भमोषधीनां सद्यो जातो वृषभो रोरवीति ॥

7.101.01a tisro vācaḥ pra vada jyotiragrā yā etad duhre madhudogham ūdhaḥ |
7.101.01c sa vatsaṁ kṛṇvan garbham oṣadhīnāṁ sadyo jāto vṛṣabho roravīti ||

7.101.02a यो वर्धन ओषधीनां यो अपां यो विश्वस्य जगतो देव ईशे ।

7.101.02c स त्रिधातु शरणं शर्म यंसत्त्रिवर्तु ज्योतिः स्वभिष्ट्य१स्मे ॥

7.101.02a yo vardhana oṣadhīnāṁ yo apāṁ yo viśvasya jagato deva īśe |
7.101.02c sa tridhātu śaraṇaṁ śarma yaṁsat trivartu jyotiḥ svabhiṣṭy a1sme ||

7.101.03a स्तरीरु त्वद्भवति सूत उ त्वद्यथावशं तन्वं चक्र एषः ।

7.101.03c पितुः पयः प्रति गृभ्णाति माता तेन पिता वर्धते तेन पुत्रः ॥

7.101.03a starīr u tvad bhavati sūta u tvad yathāvaśaṁ tanvaṁ cakra eṣaḥ |
7.101.03c pituḥ payaḥ prati gṛbhṇāti mātā tena pitā vardhate tena putraḥ ||

7.101.04a यस्मिन्विश्वानि भुवनानि तस्थुस्तिस्रो द्यावस्त्रेधा सस्रुरापः ।

7.101.04c त्रयः कोशास उपसेचनासो मध्व श्चोतन्त्यभितो विरप्शम् ॥

7.101.04a yasmin viśvāni bhuvanāni tasthus tisro dyāvas tredhā sasrur āpaḥ |
7.101.04c trayaḥ kośāsa upasecanāso madhva ścotanty abhito virapśam ||

7.101.05a इदं वचः पर्जन्याय स्वराजे हृदो अस्त्वन्तरं तज्जुजोषत् ।

7.101.05c मयोभुवो वृष्टयः सन्त्वस्मे सुपिप्पला ओषधीर्देवगोपाः ॥

7.101.05a idaṁ vacaḥ parjanyāya svarāje hṛdo astv antaraṁ taj jujoṣat |
7.101.05c mayobhuvo vṛṣṭayaḥ santv asme supippalā oṣadhīr devagopāḥ ||

7.101.06a स रेतोधा वृषभः शश्वतीनां तस्मिन्नात्मा जगतस्तस्थुषश्च ।

7.101.06c तन्म ऋतं पातु शतशारदाय यूयं पात स्वस्तिभिः सदा नः ॥

7.101.06a sa retodhā vṛṣabhaḥ śaśvatīnāṁ tasminn ātmā jagatas tasthuṣaś ca |
7.101.06c tan ma ṛtam pātu śataśāradāya yūyam pāta svastibhiḥ sadā naḥ ||

7.102.01a पर्जन्याय प्र गायत दिवस्पुत्राय मीळ्हुषे ।

7.102.01c स नो यवसमिच्छतु ॥

7.102.01a parjanyāya pra gāyata divas putrāya mīlhuṣe |
7.102.01c sa no yavasam icchatu ||

7.102.02a यो गर्भमोषधीनां गवां कृणोत्यर्वताम् ।

7.102.02c पर्जन्यः पुरुषीणाम् ॥

7.102.02a yo garbham oṣadhīnāṁ gavāṁ kṛṇoty arvatām |
7.102.02c parjanyaḥ puruṣīṇām ||

7.102.03a तस्मा इदास्ये हविर्जुहोता मधुमत्तमम् ।

7.102.03c इळां नः संयतं करत् ॥

7.102.03a tasmā id āsye havir juhotā madhumattamam |
7.102.03c ilāṁ naḥ saṁyataṁ karat ||

7.103.01a संवत्सरं शशयाना ब्राह्मणा व्रतचारिणः ।

7.103.01c वाचं पर्जन्यजिन्वितां प्र मण्डूका अवादिषुः ॥

7.103.01a saṁvatsaraṁ śaśayānā brāhmaṇā vratacāriṇaḥ |
7.103.01c vācam parjanyajinvitām pra maṇḍūkā avādiṣuḥ ||

7.103.02a दिव्या आपो अभि यदेनमायन्दृतिं न शुष्कं सरसी शयानम् ।

7.103.02c गवामह न मायुर्वत्सिनीनां मण्डूकानां वग्नुरत्रा समेति ॥

7.103.02a divyā āpo abhi yad enam āyan dṛtiṁ na śuṣkaṁ sarasī śayānam |
7.103.02c gavām aha na māyur vatsinīnām maṇḍūkānāṁ vagnur atrā sam eti ||

7.103.03a यदीमेनाँ उशतो अभ्यवर्षीत्तृष्यावतः प्रावृष्यागतायाम् ।

7.103.03c अख्खलीकृत्या पितरं न पुत्रो अन्यो अन्यमुप वदन्तमेति ॥

7.103.03a yad īm enām̐ uśato abhy avarṣīt tṛṣyāvataḥ prāvṛṣy āgatāyām |
7.103.03c akhkhalīkṛtyā pitaraṁ na putro anyo anyam upa vadantam eti ||

7.103.04a अन्यो अन्यमनु गृभ्णात्येनोरपां प्रसर्गे यदमन्दिषाताम् ।

7.103.04c मण्डूको यदभिवृष्टः कनिष्कन्पृश्निः सम्पृङ्क्ते हरितेन वाचम् ॥

7.103.04a anyo anyam anu gṛbhṇāty enor apām prasarge yad amandiṣātām |
7.103.04c maṇḍūko yad abhivṛṣṭaḥ kaniṣkan pṛśniḥ sampṛṅkte haritena vācam ||

7.103.05a यदेषामन्यो अन्यस्य वाचं शाक्तस्येव वदति शिक्षमाणः ।

7.103.05c सर्वं तदेषां समृधेव पर्व यत्सुवाचो वदथनाध्यप्सु ॥

7.103.05a yad eṣām anyo anyasya vācaṁ śāktasyeva vadati śikṣamāṇaḥ |
7.103.05c sarvaṁ tad eṣāṁ samṛdheva parva yat suvāco vadathanādhy apsu ||

7.103.06a गोमायुरेको अजमायुरेकः पृश्निरेको हरित एक एषाम् ।

7.103.06c समानं नाम बिभ्रतो विरूपाः पुरुत्रा वाचं पिपिशुर्वदन्तः ॥

7.103.06a gomāyur eko ajamāyur ekaḥ pṛśnir eko harita eka eṣām |
7.103.06c samānaṁ nāma bibhrato virūpāḥ purutrā vācam pipiśur vadantaḥ ||

7.103.07a ब्राह्मणासो अतिरात्रे न सोमे सरो न पूर्णमभितो वदन्तः ।

7.103.07c संवत्सरस्य तदहः परि ष्ठ यन्मण्डूकाः प्रावृषीणं बभूव ॥

7.103.07a brāhmaṇāso atirātre na some saro na pūrṇam abhito vadantaḥ |
7.103.07c saṁvatsarasya tad ahaḥ pari ṣṭha yan maṇḍūkāḥ prāvṛṣīṇam babhūva ||

7.103.08a ब्राह्मणासः सोमिनो वाचमक्रत ब्रह्म कृण्वन्तः परिवत्सरीणम् ।

7.103.08c अध्वर्यवो घर्मिणः सिष्विदाना आविर्भवन्ति गुह्या न के चित् ॥

7.103.08a brāhmaṇāsaḥ somino vācam akrata brahma kṛṇvantaḥ parivatsarīṇam |
7.103.08c adhvaryavo gharmiṇaḥ siṣvidānā āvir bhavanti guhyā na ke cit ||

7.103.09a देवहितिं जुगुपुर्द्वादशस्य ऋतुं नरो न प्र मिनन्त्येते ।

7.103.09c संवत्सरे प्रावृष्यागतायां तप्ता घर्मा अश्नुवते विसर्गम् ॥

7.103.09a devahitiṁ jugupur dvādaśasya ṛtuṁ naro na pra minanty ete |
7.103.09c saṁvatsare prāvṛṣy āgatāyāṁ taptā gharmā aśnuvate visargam ||

7.103.10a गोमायुरदादजमायुरदात्पृश्निरदाद्धरितो नो वसूनि ।

7.103.10c गवां मण्डूका ददतः शतानि सहस्रसावे प्र तिरन्त आयुः ॥

7.103.10a gomāyur adād ajamāyur adāt pṛśnir adād dharito no vasūni |
7.103.10c gavāṁ maṇḍūkā dadataḥ śatāni sahasrasāve pra tiranta āyuḥ ||

7.104.01a इन्द्रासोमा तपतं रक्ष उब्जतं न्यर्पयतं वृषणा तमोवृधः ।

7.104.01c परा शृणीतमचितो न्योषतं हतं नुदेथां नि शिशीतमत्रिणः ॥

7.104.01a indrāsomā tapataṁ rakṣa ubjataṁ ny arpayataṁ vṛṣaṇā tamovṛdhaḥ |
7.104.01c parā śṛṇītam acito ny oṣataṁ hataṁ nudethāṁ ni śiśītam atriṇaḥ ||

7.104.02a इन्द्रासोमा समघशंसमभ्य१घं तपुर्ययस्तु चरुरग्निवाँ इव ।

7.104.02c ब्रह्मद्विषे क्रव्यादे घोरचक्षसे द्वेषो धत्तमनवायं किमीदिने ॥

7.104.02a indrāsomā sam aghaśaṁsam abhy a1ghaṁ tapur yayastu carur agnivām̐ iva |
7.104.02c brahmadviṣe kravyāde ghoracakṣase dveṣo dhattam anavāyaṁ kimīdine ||

7.104.03a इन्द्रासोमा दुष्कृतो वव्रे अन्तरनारम्भणे तमसि प्र विध्यतम् ।

7.104.03c यथा नातः पुनरेकश्चनोदयत्तद्वामस्तु सहसे मन्युमच्छवः ॥

7.104.03a indrāsomā duṣkṛto vavre antar anārambhaṇe tamasi pra vidhyatam |
7.104.03c yathā nātaḥ punar ekaś canodayat tad vām astu sahase manyumac chavaḥ ||

7.104.04a इन्द्रासोमा वर्तयतं दिवो वधं सं पृथिव्या अघशंसाय तर्हणम् ।

7.104.04c उत्तक्षतं स्वर्य१ं पर्वतेभ्यो येन रक्षो वावृधानं निजूर्वथः ॥

7.104.04a indrāsomā vartayataṁ divo vadhaṁ sam pṛthivyā aghaśaṁsāya tarhaṇam |
7.104.04c ut takṣataṁ svarya1m parvatebhyo yena rakṣo vāvṛdhānaṁ nijūrvathaḥ ||

7.104.05a इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभिः ।

7.104.05c तपुर्वधेभिरजरेभिरत्रिणो नि पर्शाने विध्यतं यन्तु निस्वरम् ॥

7.104.05a indrāsomā vartayataṁ divas pary agnitaptebhir yuvam aśmahanmabhiḥ |
7.104.05c tapurvadhebhir ajarebhir atriṇo ni parśāne vidhyataṁ yantu nisvaram ||

7.104.06a इन्द्रासोमा परि वां भूतु विश्वत इयं मतिः कक्ष्याश्वेव वाजिना ।

7.104.06c यां वां होत्रां परिहिनोमि मेधयेमा ब्रह्माणि नृपतीव जिन्वतम् ॥

7.104.06a indrāsomā pari vām bhūtu viśvata iyam matiḥ kakṣyāśveva vājinā |
7.104.06c yāṁ vāṁ hotrām parihinomi medhayemā brahmāṇi nṛpatīva jinvatam ||

7.104.07a प्रति स्मरेथां तुजयद्भिरेवैर्हतं द्रुहो रक्षसो भङ्गुरावतः ।

7.104.07c इन्द्रासोमा दुष्कृते मा सुगं भूद्यो नः कदा चिदभिदासति द्रुहा ॥

7.104.07a prati smarethāṁ tujayadbhir evair hataṁ druho rakṣaso bhaṅgurāvataḥ |
7.104.07c indrāsomā duṣkṛte mā sugam bhūd yo naḥ kadā cid abhidāsati druhā ||

7.104.08a यो मा पाकेन मनसा चरन्तमभिचष्टे अनृतेभिर्वचोभिः ।

7.104.08c आप इव काशिना संगृभीता असन्नस्त्वासत इन्द्र वक्ता ॥

7.104.08a yo mā pākena manasā carantam abhicaṣṭe anṛtebhir vacobhiḥ |
7.104.08c āpa iva kāśinā saṅgṛbhītā asann astv āsata indra vaktā ||

7.104.09a ये पाकशंसं विहरन्त एवैर्ये वा भद्रं दूषयन्ति स्वधाभिः ।

7.104.09c अहये वा तान्प्रददातु सोम आ वा दधातु निर्ऋतेरुपस्थे ॥

7.104.09a ye pākaśaṁsaṁ viharanta evair ye vā bhadraṁ dūṣayanti svadhābhiḥ |
7.104.09c ahaye vā tān pradadātu soma ā vā dadhātu nirṛter upasthe ||

7.104.10a यो नो रसं दिप्सति पित्वो अग्ने यो अश्वानां यो गवां यस्तनूनाम् ।

7.104.10c रिपु स्तेन स्तेयकृद्दभ्रमेतु नि ष हीयतां तन्वा३ तना च ॥

7.104.10a yo no rasaṁ dipsati pitvo agne yo aśvānāṁ yo gavāṁ yas tanūnām |
7.104.10c ripu stena steyakṛd dabhram etu ni ṣa hīyatām tanvā3 tanā ca ||

7.104.11a परः सो अस्तु तन्वा३ तना च तिस्रः पृथिवीरधो अस्तु विश्वाः ।

7.104.11c प्रति शुष्यतु यशो अस्य देवा यो नो दिवा दिप्सति यश्च नक्तम् ॥

7.104.11a paraḥ so astu tanvā3 tanā ca tisraḥ pṛthivīr adho astu viśvāḥ |
7.104.11c prati śuṣyatu yaśo asya devā yo no divā dipsati yaś ca naktam ||

7.104.12a सुविज्ञानं चिकितुषे जनाय सच्चासच्च वचसी पस्पृधाते ।

7.104.12c तयोर्यत्सत्यं यतरदृजीयस्तदित्सोमोऽवति हन्त्यासत् ॥

7.104.12a suvijñānaṁ cikituṣe janāya sac cāsac ca vacasī paspṛdhāte |
7.104.12c tayor yat satyaṁ yatarad ṛjīyas tad it somo 'vati hanty āsat ||

7.104.13a न वा उ सोमो वृजिनं हिनोति न क्षत्रियं मिथुया धारयन्तम् ।

7.104.13c हन्ति रक्षो हन्त्यासद्वदन्तमुभाविन्द्रस्य प्रसितौ शयाते ॥

7.104.13a na vā u somo vṛjinaṁ hinoti na kṣatriyam mithuyā dhārayantam |
7.104.13c hanti rakṣo hanty āsad vadantam ubhāv indrasya prasitau śayāte ||

7.104.14a यदि वाहमनृतदेव आस मोघं वा देवाँ अप्यूहे अग्ने ।

7.104.14c किमस्मभ्यं जातवेदो हृणीषे द्रोघवाचस्ते निरृथं सचन्ताम् ॥

7.104.14a yadi vāham anṛtadeva āsa moghaṁ vā devām̐ apyūhe agne |
7.104.14c kim asmabhyaṁ jātavedo hṛṇīṣe droghavācas te nirṛthaṁ sacantām ||

7.104.15a अद्या मुरीय यदि यातुधानो अस्मि यदि वायुस्ततप पूरुषस्य ।

7.104.15c अधा स वीरैर्दशभिर्वि यूया यो मा मोघं यातुधानेत्याह ॥

7.104.15a adyā murīya yadi yātudhāno asmi yadi vāyus tatapa pūruṣasya |
7.104.15c adhā sa vīrair daśabhir vi yūyā yo mā moghaṁ yātudhānety āha ||

7.104.16a यो मायातुं यातुधानेत्याह यो वा रक्षाः शुचिरस्मीत्याह ।

7.104.16c इन्द्रस्तं हन्तु महता वधेन विश्वस्य जन्तोरधमस्पदीष्ट ॥

7.104.16a yo māyātuṁ yātudhānety āha yo vā rakṣāḥ śucir asmīty āha |
7.104.16c indras taṁ hantu mahatā vadhena viśvasya jantor adhamas padīṣṭa ||

7.104.17a प्र या जिगाति खर्गलेव नक्तमप द्रुहा तन्वं१ गूहमाना ।

7.104.17c वव्राँ अनन्ताँ अव सा पदीष्ट ग्रावाणो घ्नन्तु रक्षस उपब्दैः ॥

7.104.17a pra yā jigāti khargaleva naktam apa druhā tanvaṁ1 gūhamānā |
7.104.17c vavrām̐ anantām̐ ava sā padīṣṭa grāvāṇo ghnantu rakṣasa upabdaiḥ ||

7.104.18a वि तिष्ठध्वं मरुतो विक्ष्वि१च्छत गृभायत रक्षसः सं पिनष्टन ।

7.104.18c वयो ये भूत्वी पतयन्ति नक्तभिर्ये वा रिपो दधिरे देवे अध्वरे ॥

7.104.18a vi tiṣṭhadhvam maruto vikṣv i1cchata gṛbhāyata rakṣasaḥ sam pinaṣṭana |
7.104.18c vayo ye bhūtvī patayanti naktabhir ye vā ripo dadhire deve adhvare ||

7.104.19a प्र वर्तय दिवो अश्मानमिन्द्र सोमशितं मघवन्सं शिशाधि ।

7.104.19c प्राक्तादपाक्तादधरादुदक्तादभि जहि रक्षसः पर्वतेन ॥

7.104.19a pra vartaya divo aśmānam indra somaśitam maghavan saṁ śiśādhi |
7.104.19c prāktād apāktād adharād udaktād abhi jahi rakṣasaḥ parvatena ||

7.104.20a एत उ त्ये पतयन्ति श्वयातव इन्द्रं दिप्सन्ति दिप्सवोऽदाभ्यम् ।

7.104.20c शिशीते शक्रः पिशुनेभ्यो वधं नूनं सृजदशनिं यातुमद्भ्यः ॥

7.104.20a eta u tye patayanti śvayātava indraṁ dipsanti dipsavo 'dābhyam |
7.104.20c śiśīte śakraḥ piśunebhyo vadhaṁ nūnaṁ sṛjad aśaniṁ yātumadbhyaḥ ||

7.104.21a इन्द्रो यातूनामभवत्पराशरो हविर्मथीनामभ्या३विवासताम् ।

7.104.21c अभीदु शक्रः परशुर्यथा वनं पात्रेव भिन्दन्सत एति रक्षसः ॥

7.104.21a indro yātūnām abhavat parāśaro havirmathīnām abhy ā3vivāsatām |
7.104.21c abhīd u śakraḥ paraśur yathā vanam pātreva bhindan sata eti rakṣasaḥ ||

7.104.22a उलूकयातुं शुशुलूकयातुं जहि श्वयातुमुत कोकयातुम् ।

7.104.22c सुपर्णयातुमुत गृध्रयातुं दृषदेव प्र मृण रक्ष इन्द्र ॥

7.104.22a ulūkayātuṁ śuśulūkayātuṁ jahi śvayātum uta kokayātum |
7.104.22c suparṇayātum uta gṛdhrayātuṁ dṛṣadeva pra mṛṇa rakṣa indra ||

7.104.23a मा नो रक्षो अभि नड्यातुमावतामपोच्छतु मिथुना या किमीदिना ।

7.104.23c पृथिवी नः पार्थिवात्पात्वंहसोऽन्तरिक्षं दिव्यात्पात्वस्मान् ॥

7.104.23a mā no rakṣo abhi naḍ yātumāvatām apocchatu mithunā yā kimīdinā |
7.104.23c pṛthivī naḥ pārthivāt pātv aṁhaso 'ntarikṣaṁ divyāt pātv asmān ||

7.104.24a इन्द्र जहि पुमांसं यातुधानमुत स्त्रियं मायया शाशदानाम् ।

7.104.24c विग्रीवासो मूरदेवा ऋदन्तु मा ते दृशन्सूर्यमुच्चरन्तम् ॥

7.104.24a indra jahi pumāṁsaṁ yātudhānam uta striyam māyayā śāśadānām |

7.104.24c vigrī̍vāso̱ mūra̍devā ṛdantu̱ mā te dṛ̍śa̱n sūrya̍m u̱ccara̍ntam ||

7.104.25a प्रति॑ चक्ष्व॒ वि च॒क्ष्वेन्द्र॑श्च सोम जागृतम् ।

7.104.25c रक्षो॑भ्यो व॒धम॑स्यतम॒शनिं॑ यातु॒मद्भ्य॑ः ॥

7.104.25a prati̍ cakṣva̱ vi ca̱kṣvendra̍ś ca soma jāgṛtam |
7.104.25c rakṣo̍bhyo va̱dham a̍syatam a̱śani̍ṁ yātu̱madbhya̍ḥ ||

Notes by Detlef Eichler (detlefeichler(at)gmx.net):

1. Please note that this PDF file is not for commercial use and released only for personal scholarly activity.

2. This combined version of Rigveda is from two ITRANS files which I have created on the basis of The Aufrecht/van Nooten/Holland (Samhita) version of the Rigveda. (http://www.people.fas.harvard.edu/~witzel/onlineRV.htm)

3. The used fonts are Ancient Sanskrit 99 and URW Palladio IT. In the the word dū̱raü̍pabdo̱ (7.021.02c) the font Times New Roman is used for the character ü to show Hiatus between a and u. For the numbers of Maṇḍala, Sūkta, and Mantra at the beginning of each line (7.001.01a) the font Times New Roman is used.

4. Last updated: 26 March 2009